CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथर्ववेदसंहितायाः

चतुर्दश-पञ्चदश-षोडश-काण्डानि

अभिनवसायणभाष्य-समन्वितानि

भाष्यकाराः

वेद-दर्शनाचार्याः महामण्डलेश्वराः

श्रीमत्-स्वामि-गङ्गेश्वरानन्दा उदासीनाः

सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः

तथा

म० म० पं० नवलकिशोर - काङ्करः

सद्गुरु-गङ्गेश्वर-इण्टरनेशनल वेदमिशन

बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वीर राघवन जी को
सप्रेम भेंट —
— स्वामी आनन्द
22/6/95

संस्कृत महाविद्यालय
9-1-98
विद्या भवन, नई दिल्ली

येणाच्च तं
मम्मटक
वेदं का त्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शौनकीयायाः

अथर्ववेदसंहितायाः

चतुर्दश-पञ्चदश-षोडश-काण्डानि

अभिनवसायणभाष्यसहितानि

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
1039

ा-
ाधजिगां-
ायणाच
मम्म
र्ववेदं का

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

श्री गुरुगङ्गेश्वरग्रन्थमाला पुष्प–२८

शौनकीयायाः

अथर्ववेदसंहितायाः

चतुर्दशं काण्डम्

अभिनवसायणभाष्येण समन्वितम्

卐

भाष्यकाराः

वेद-दर्शनाचार्य – महामण्डलेश्वर–

श्रीस्वामि-गङ्गेश्वरानन्दा उदासीनाः

❖

सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः

तथा

विद्यावाचस्पतिः कविशिरोमणिः गद्यसम्राट्

महामहिमोपाध्यायः

आचार्य - नवलकिशोर - काङ्करः

卐

प्रकाशकः

सद्गुरु गङ्गेश्वर इण्टरनेशनल वेदमिशन

तुलसीनिवास, चर्चगेट, बम्बई–२०

१९८३

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पुस्तकप्राप्तिस्थानानि

तुलसी-निवास, फ्लैट ३१, डी रोड़, चर्चगेट, बम्बई–२०
गुरु गङ्गेश्वरधाम, तिडके कॉलोनी, त्र्यम्बकरोड, नासिक–२
गङ्गेश्वरधाम, १३ पार्क एरिया, करोलबाग, नई दिल्ली-५
चतुर्वेदसंस्थान, श्रौतमुनिनिवास, वृन्दावन (मथुरा)

[अस्य ग्रन्थस्य सर्वविधा अधिकाराः प्रकाशकाधीनाः]

मुद्रक
श्री शङ्कर आर्ट प्रिण्टर्स, जयपुर

Bhawan's Sri Sankara Vidya ...
1039

प्रथमं संस्करणम्
५००

मूल्यम्
त्रिंशद् रूप्यकाणि
विदेशेषु पञ्चदश डालराणि

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्पादकीयम्

वन्दे वन्दारु-मन्दारममन्दानन्द-चिन्मयम् ।
दुर्दैव-दमनं दिव्यं सद्गुरोः पादपङ्कजम् ।।

निखिलमिदं जगच्चेतनाचेतनाञ्चितमित्यवितथं वचः शास्त्रपार-दृश्वनां मनीषिणाम् । तत्र चेतनतत्त्वस्य निर्णिनाययिषया वसुधातलजल-जासनैरनवीनैर्मुनिपुङ्गवैः प्रवर्त्तिता शास्त्रपरम्परा दर्शन-सरणिमधिरूढा, अचेतनवस्तूनामुपयुयोजयिषया च तैराविष्कृता सा विज्ञानाभिख्यया ख्याता जाता । किन्तूभयोरप्येतयोर्जीवातुभूतः शाखा-प्रशाखा-तच्छाखिकादिभि-रत्यन्तं वितन्तन्यमानः प्रचुरप्रथिमानमावहन् विजेजीयते वेदशास्त्रसन्तानः । अयं परमः प्रत्नोऽपि नितान्तं नूत्नो महानक्षयोऽपूर्वः कोऽपि ज्ञानविज्ञान-निधिरस्माकम् । एतदुपज्ञमेवाखण्डेऽपि क्षोणीखण्डे निखिलानां विद्यानां प्रसारकर्मेत्यत्रापि नास्ति कस्यचन मतिवैमत्यम् । एतदाश्रयेणैव वर्णाश्रम-धर्मभवनानि सुस्थिराणि, एतदाविष्कृतमेव भारतीयत्व-रक्षणौपयिकं कर्मजातम्, अनेनैव च सम्पूर्णो वाङ्मयप्रपञ्चो वैभवशाली समभिधीयते । किमन्यत्, अस्माकं संस्कृतेः, सभ्यतायाः, शिष्टाचारस्य, सामाजिककार्य-कलापस्यापि च मूलं स्रोतोऽत्रैव विद्यते ।

प्रारम्भे सोऽयं वेद एक एवाविभक्तरूपोऽवर्त्तिष्ट । समये समायाते पुनर्महर्षिणा व्यासेन महता प्रयासेन यज्ञविधानविधया ऋग्-यजुः-सामाथर्व-वेद-नामभिरयं रूपचतुष्टयत्वं लंम्भितः । अत्रापि ब्रह्मवेदापरपर्यायोऽयमथर्व-वेदोऽनेकदृष्टचा समेषु वेदेषु राजानतीति द्वादशकाण्डस्याभिनव-सायणभाष्य-सम्पादकीयेऽहं बहुशः प्रत्यपीपदम् । सर्वेषामेतेषां वेदग्रन्थानां भाषा परम-प्राचीना, नितान्तं दुरूहा, साम्प्रतं लुप्तव्यवहारा चेति तद्रहस्यमधिजिगां-सवो विद्वांसः श्रुतिशास्त्रभाष्यमेवाश्रयन्ते, भाष्याणाञ्च सायणाच ... तं भाष्यमेव सनातनं, ब्राह्मण-कल्पसूत्रादिसम्मतं प्रामाणिकञ्च मन्म... महात्मानः सन्तः । किन्तु विंशकाण्डेषु विततमिममखिलमथर्ववेदं का... त्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ख्यासुरप्याचार्यः सायणो न जाने कैर्विघ्नैर्निघ्नीकृतः पञ्चम–नवम–दशम–द्वादशादिषोडशकाण्डानाम्, अष्टमकाण्डस्य कतिपयसूक्तानां विंशकाण्डस्य च षडुत्तरैकशतसूक्तानां भाष्यं नालेलिखिष्ट, न चान्येन केनचन तदुत्तर-भाविना कृतिना श्रौतशास्त्रीयां तत्सरणिमनुसृत्य तादृशं भाष्यं समस्रक्ष्यत। परं साम्प्रतं कलिबल-कलुषितां श्रौतशास्त्र-परम्परां पुनरुद्धर्त्तुं प्रचारयितुञ्च गृहीतावतारा इव भगवन्तः शङ्कराचार्याः, प्रज्ञाचक्षुषोऽपि चिराराधित-राधिका-हृदयवल्लभानुग्रहलब्ध-दिव्यज्योतिषः, शताधिकवर्षायुषः, पदवाक्य-प्रमाण-पारावार-पारीणाः, आराध्यचरणा महामण्डलेश्वरपदालङ्करणाः स्वामिवर्याः श्रीगङ्गेश्वरानन्दोदासीना वेद-दर्शनाचार्यास्तृणत्याज्यं परि-त्यज्य वार्धक्यवृद्धमपि शैथिल्यसमृद्धं तान्वं तनुत्वं मनोबलसमेधितेन समुत्साहेन नातिद्राघीयसाऽनेहसा समेषामेषां काण्डानामभिनवं भाष्यमिद-मतन्तनिषत, माञ्चापारकृपा-पीयूष-पृषद्भिराप्लावयन्त इवैषां परिष्करण-सम्पादन-संशोधनादिकर्मणि न्ययोयूजिषत। अस्तीदं स्वामिपादानां भाष्य-प्रतिज्ञापद्यमाद्यम्–

अभिनवमिदं भाष्यं सायणकृतिसन्निभम्।
अनुपलब्धतद्भाष्यस्थाने निर्मीयतेऽधुना।। इति।

तदत्र प्रस्तुते चतुर्दशे काण्डे लोकोत्तर-संवित्तीर्थराजाभिषेक-सम-वाप्त-दिव्यदृष्टिरेका विदुषी ऋषिका सवितृसुतायाः सूर्याया विवाहोदन्तं चित्रयाञ्चकार। येन निश्चेचीयामहे यदारम्भिके युगे देवसमाजेऽपि साम्प्रतिकीव वैवाहिकी परम्परा प्रचलिताऽवर्वृतीत्। हन्त, तदानीमपि कन्याजनिमाकर्ण्य लोका न प्रसादसुमुखा जायन्ते स्म। अमुमरुन्तुदमुदन्तं हृदि कृत्वैव लम्बकूर्चाः स्थविरास्तु रोदनमप्यारभन्ते स्म, यदेनसः शान्त्यै समुद्वाहसमये सवितुरग्नेश्च प्रार्थना क्रियते स्म—

यदीमे केशिनो जना गृहे ते समनर्त्तिषू रोदेन कृण्वतोऽघम्।
अग्निष्ट्वा तस्मादेनसः सविता च प्रमुञ्चताम्।।

(अथर्व० १४।२।५९) इति।

[...] विवाहमण्डपे वैतानं वीतिहोत्रं साक्षीकृत्य वध्वाः पाणिं गृह्णन् देव-[...]ऽपि सम्प्रतीव प्रतिजानीते स्म–

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् ।
तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह
प्रजया च धनेन च ।। (अथर्व० १४।१।४८) इति ।

सम्पन्नेऽथ विवाहसंस्कारविधौ बान्धवाः कन्यामपीदानीमिव तदानीमुपदिशन्त आशीर्भिरभिनन्दन्ति स्म—

आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।
पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ।।
यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा ।
एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य ।।
सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु ।।
ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ।।

(अथर्व० १४।१।४२-४४)

संस्कारविधेः समाप्तेरनन्तरं रुक्मप्रस्तरणं बहुवर्णं किंशुककुसुमैश्च सुसाधितं रथमारुह्य श्वशुरालयमागतायां नवपरिणीतायां तत्र तस्याः स्वागतसमारोहः, गृहवृद्धाभिराशीःकुसुमवर्षणं यौतकवस्तुप्रदर्शनमित्यादिकं सर्वमप्याधुनिकप्रथाया नातिभिन्नमविद्यत । किमन्यत्, तदानीं देवयुगेऽपि साम्प्रतिकीं सामाजिकीं रीतिमनुकुर्वत्यः कुलवत्यः सौभाग्यरात्रिसुखविलसितान्यनुभवितुं नववधूं केलिभवने नीत्वा सुखशय्यायामुपवेशयन्त्यस्तामेवं भणन्ति स्म—

आरोह तल्पं सुमनस्यमानेह प्रजां जनय पत्ये अस्मै ।
इन्द्राणीव सुबुधा बुध्यमाना ज्योतिरग्रा उषसः प्रतिजागरासि ।।
देवा अग्रे न्यपद्यन्त पत्नीः समस्पृशन्त तन्वस्तनूभिः ।
सूर्येव नारि विश्वरूपा महित्वा प्रजावती पत्या सं भवेह ।। इति ।

(अथर्व० १४।२।३१-३२)

अस्मिन् वधूवरयोरेकत्र शयनावसरे स्वजनैर्वरसम्बोधनमपि ... तं ...
तिकीमेव प्रथामनुकुरुते स्म । हन्त, इदानीमिव तदानीमपि विघटनक ...
कलहप्रियाणां समाजकण्टकानां लोकानामभावो नावृतत्, ये ...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कर्मणि वर-कन्यापक्षयोर्नानाविधन्यूनतां त्रुटिञ्च दर्शयित्वा मिथो मनोमालिन्यमुत्पाद्यामोमुदिषत, किन्तूभयपक्षीया विवेकिनोऽनेके लोकास्तु विवाहकर्मणि सञ्जातस्यानभीप्सितकार्यजातस्य समस्तं दोषजातं मध्यस्थभूते जने सम्पात्य स्वयं निरागसो जायन्ते स्म—

यद् दुष्कृतं यच्छमलं विवाहे वहतौ च यत् ।
तत् सम्भलस्य कम्बले मृज्महे दुरितं वयम् ।।
सम्भले मलं सादयित्वा कम्बले दुरितं वयम् ।
अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ।।

(अथर्व० १४।२।६६–६७)

एवं सामाजिकरीतीनामुपलब्धिहेतोरपि चतुर्दशकाण्डमिदं विशिष्टं महत्त्वं भजते ।

अथ पञ्चदशे काण्डे मन्त्रकृदनूचानो महर्षिरथर्वा व्रात्यमहिमानमवर्णयत् । यद्यपि धर्मशास्त्रानुसारं संस्काररहितः, षोडशवर्षादूर्ध्वमप्यकृतव्रतबन्धो भ्रष्टगायत्रीको जनो व्रात्योऽभिधीयते । मनुरप्येवं मनुते— **"अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः । सावित्रीपतिता व्रात्याः"** इति । अत एव **"व्रात्यः संस्कारहीनः स्यात्"** इत्यमरोक्तिः सङ्गच्छते । शब्दकल्पद्रुमकारेणापि **"व्रातात् संस्कारसमूहात् चयवते इति व्रात्यः"** इत्येव प्रतिपादितम् । तेन च व्रात्यो नाम उपनयनादिसंस्कारशून्यो वैतानं जातवेदसमुपासितुञ्चानधिकारी पतितः पुरुषः इत्येव प्रसिद्धिः । परन्तु जनमतमिदमनादृत्यात्र व्रात्यशब्देन यज्ञेश्वरः, देवप्रियः, ब्राह्मण-क्षत्रिययोर्वर्चसो मूलभूतश्च परमात्मा प्रतिपादितोऽथर्वणा महर्षिणा । व्रात्याधीनमेव निखिलं जगत्, स एव हि जगन्नियामकः, स एव च गणाध्यक्षो देवाधिदेवः । यां दिशं व्रात्यश्चलति विश्वं जगद् विश्वे देवाश्च तमनुचलन्ति, तस्मिन् स्थितेऽथ सर्वे तिष्ठन्तीत्यत्र काण्डे व्रात्यमहिमा मननीय एव मनस्विभिः ।

नातिवितते षोडशे काण्डेऽथ विभिन्नाः काम्यप्रयोगमन्त्राः सन्दृब्धा- महर्षिणा । तत्र कतिपये शान्त्युदकसम्पादने, कतिचन अभिचारकर्म- ...शान्तिकर्मणि, अपरे मन्त्राश्च दुःस्वप्नदर्शनशान्तावुपयुज्यन्ते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य काण्डस्य कतिपयैर्मन्त्रैरायुष्कामो माणवको यज्ञोपवीतकर्मणि कुङ्कुम-चन्दन-सर्वौषध्यादिना शरीरं समालभ्यात्मानमभिमन्त्रयते, कतिचनमन्त्रैश्च आयुषोऽभिवृद्धये समुद्यन्तं सवितारमुपतिष्ठते । चक्षुरादीन्द्रियदाढर्च्यकामा अपि लोका मध्येऽरण्यमस्य कतिपयमन्त्रैः सर्वौषधिमभिमन्त्र्यानुलोमं प्रलिम्पन्तीति काण्डमपीदं परमामुपयोगितां बिभर्त्ति ।

समेषामेषां विलुप्तभाष्याणां काण्डानां वास्तवमन्त्राभिप्राय-व्याचिख्यासयाऽभिनवसायणभाष्यमिदं विलिख्य तुरीयवेदार्थाधिजिगमिषा-कृष्टचेतसां सचेतसां महान्तमुपकारं कुर्वाणाः सर्वशास्त्रनदीष्णाः पूज्यपादा इमे स्वामिश्रीगङ्गेश्वरानन्दमहाराजाः कैरक्षरैरभिनन्दनीयाः ? अथवा न केवलं शुष्काभिनन्दनवाक्यार्पणेनैतेषामानृण्यं सम्पादयितुं शक्यते । एतेषा-मुपकारभारभुग्नं कोविदकुलन्तु न कदापि मस्तकमुत्थापयितुं शाशकीतीति ।

अथ चैतेषां शिष्यवर्यैर्निरन्तरञ्च गुरुचरणसेवायां संलग्नैर्वेदान्ता-चार्यैः स्वामिश्रीगोविन्दानन्दोदासीनैरेतत्सम्पादनकर्मण्यस्मत्सहयोगं विधाय भृशमुपकृतोऽहमेतेभ्यः शतशो धन्यवादान् वितरामि । येन च बम्बईस्थेन "सद्गुरु–गङ्गेश्वर–इण्टरनेशनल–वेदमिशन" इत्यभिख्यया विख्यातेन संस्थानेनास्य भाष्यस्य प्रकाशनार्थं सम्पूर्णो यो द्रव्यव्ययभारो व्यूढस्तदर्थं तस्मै अपि धन्यवादाः समर्प्यन्ते । पर्यवसाने चैतत्प्रारूप (प्रूफ) निरीक्षणादौ जीर्णकलेवरस्य मम सर्वविधं साहाय्यमाचरता येनाहं वीतचिन्तो विहितस्तं लेखन-सम्पादनादिनिपुणमस्मज्ज्येष्ठसूनुम् एम.ए., पी-एच.डी. पदजुषं डा० नारायणशास्त्रिकाङ्करं व्याकरण-साहित्य-साङ्ख्ययोगाचार्य-मप्यहं शुभाशिषां राशिभिः संवर्धयामि । एतत्सहयोगमन्तराऽस्येदृशं मुद्रणं कठिनमेवावर्त्तत ।

अथान्ते श्रुति-श्रुत्यङ्गविचार-चातुरी-धुरीणेभ्यः कोविदतल्लजेभ्यो मनसा वचसा कर्मणा चानुकम्पमानेभ्यो मानवसुलभस्खलनकृते क्षमार्थनां प्रस्तुवानो विरमति स्वनियोगादयम्—

चतुर्वेदसंस्थानम्
श्रौतमुनिनिवासः, वृन्दावनम्

विद्वत्-किङ्करः
नवलकिशोरका...

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्रीसद्गुरुवन्दना

(१)

अभिनव-सायणभाष्य-प्रणेतृवर्यान् मनीषिमूर्धन्यान् ।
गङ्गेश्वरगुरुपादान् स्तौति गोविन्दानन्दोऽयम् ।।

(२)

विद्वत्सम्मानदक्षानशरण–जनता- रक्षणे दत्तचित्तान्
वेदे वेदाङ्गशास्त्रे सुरगुरुसमतां गाहमानानमानान् ।
श्रीमद्गङ्गेश्वराख्यान्मुनिजनमुकुटान् सद्गुरून्नम्रमौलि–
र्गोविन्दानन्दनामा चरणयुगरजः-सेवको नन्नमीति ।।

(३)

श्रीस्वामि–गङ्गेश्वर–पूज्यपादान्
महर्षिकल्पान् श्रुति-शुभ्र-मूर्त्तीन् ।
साक्षादहो भौम-हिरण्यगर्भान्
एतानहं नौमि विनम्रशिष्यः ।।

श्रीसद्गुरुसेवासंलग्नो
गोविन्दानन्द उदासीनः
वेदान्ताचार्यः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

भाष्यलेखकाः

वेद-दर्शनाचार्या महामण्डलेश्वराः

श्रीगङ्गेश्वरानन्दस्वामिनः

उदासीनाः



धर्माचार-विचार-चारुचरिताः साद्गुण्य-पुण्यालयाः
शुद्धाहार - विहार - हृद्यहृदयास्तेजः - प्रकर्षोदयाः ।
लुप्तं भाष्यमवेक्ष्य सायणकृतं वेदस्य ये ब्रह्मणो
नूत्नं भाष्यमलेलिखुर्हि त इमे सन्त्यत्र गङ्गेश्वराः ॥

—काङ्करः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

शौनकीयायाम् अथर्ववेदसंहितायाम्

चतुर्दशं काण्डम्

मङ्गलम्

विश्ववन्द्यपदो वन्दे विबुधान् वेद-विश्रुतान् ।
पञ्च हेरम्ब–वैकुण्ठ–शक्ति–शङ्कर–भास्करान् ।।१।।

श्रौतवंशसमुद्भूतः श्रौतमार्ग–प्रवर्त्तकः ।
भक्तिवित्ति–समुच्चेता श्रीचन्द्रः पातु सद्गुरुः ।।२।।

स्वान्तध्वान्तमपाकुर्वन् वेदविज्ञान–भानुभिः ।
सर्वं समीहितं देयाद्रामानन्दो दिवाकरः ।।३।।

अभिनवमिदं भाष्यं सायण-कृतिसन्निभम् ।
अनुपलब्ध-तद्भाष्य-स्थाने निर्मीयते मया ।।४।।

प्रथमं सूक्तम्

चतुःषष्टयृचस्यास्य सूक्तस्य सावित्री सूर्या ऋषिका । प्रथमादिपञ्चर्चां सोमः, षष्ठ्याः स्वविवाहः, सप्तम्यादिषोडशानां षड्विंश्या अष्टाविंश्यादिसप्तत्रिंशतश्चात्मा, त्रयोविंश्याः सोमार्कौ, चतुर्विंश्याश्चन्द्रमाः, पञ्चविंश्या नृणां विवाहमन्त्राशिषो वधूवासः–संस्पर्शमोचनञ्च, सप्तविंश्याश्च वधूवासः-संस्पर्शमोचनं देवताः । प्रथमादित्रयोदशानां षोडश्यादितृचस्य द्वाविंश्याः पञ्चविंश्यादिचतसृणां त्रिंशी-पञ्चत्रिंशी-षट्त्रिंशीनामेकचत्वारिंश्यादिचतसृणामेकपञ्चाशी-द्विपञ्चाशी-द्विषष्टि-त्रिषष्टीनाञ्चानुष्टुप्, चतुर्दश्या विराट् प्रस्तारपङ्क्तिः, पञ्चदश्या आस्तारपङ्क्तिः, एकोनविंशी-विंशी-चतुर्विंशी-द्वात्रिंशी-त्रयस्त्रिंशी-सप्तत्रिंश्येकोनचत्वारिंशी–चत्वारिंशी-सप्तचत्वारिंश्येकोनपञ्चाशी–पञ्चाशी–त्रिपञ्चाशी–षट्पञ्चाशी– सप्तपञ्चाशीनाम् [अष्टपञ्चाश्येकोनषष्टयेकषष्टीनाञ्च] त्रिष्टुप् । एकविंशी-षट्चत्वारिंश्योर्जगती, त्रयोविंश्येकत्रिंशी-पञ्चचत्वारिंशीनां बृहतीगर्भा त्रिष्टुप्, एकोनत्रिंशी-पञ्चपञ्चाश्योः पुरस्ताद्बृहती, चतुस्त्रिंश्याः प्रस्तारपङ्क्तिः, अष्टात्रिंश्याः पुरोबृहती त्रिपदा

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

परोष्णिक्, [अष्टचत्वारिंश्याः पथ्यापङ्क्तिः] चतुष्पञ्चाशी-चतुःषष्ट्योर्भूरिक्-त्रिष्टुप्, षष्ट्याश्च परानुष्टुप्त्रिष्टुप् छन्दांसि ।

विवाहपरमेतत् काण्डम् । तत्र वक्ष्यमाणानि कर्माणि भवन्ति । तेषु तत्तन्मन्त्रविनियोगाः सूत्रकारेण प्रायोऽन्वर्थमेव कृतास्ते कौशिके दशमेऽध्याये विस्तरेण प्रपञ्चितास्तत्रैव द्रष्टव्याः । अत्र तु कर्मक्रमस्य मन्त्रवद् दिग्दर्शनम् ।

सूक्तारम्भे सूर्या नाम या सूर्यरूपा सवितृपुत्री देवी तस्या विवाहस्य कथा वर्णिता । कर्मक्रमस्तु यथा वक्ष्यते ।

विवाहः । स कुमार्याः पितृगृहे । **'सत्येनोत्तभिता०'** इति षोडश, **'पूर्वापरम्'** (अ. १४,१,२३;२४) इति द्वे इत्यष्टादशभिराज्यहोमः । आगमकृशरं कुमारी-माशयति (अ. २,३६) । हस्तगृहीतशरावसम्पुटं सानुचरं कञ्चिद् वरं प्रति प्रेषयति (अ.१४,१,३१) । ब्राह्मणप्रेषणम् (अ. १४,१,३१) । कुमारीरक्षार्थं पालप्रेषणम् (अ. १४।१।३४) । उदकग्रहणार्थं व्रजनम् । अप्सु लोष्टं प्रक्षिपति (अ.१४।१।३७) । अवगाहनम् (अ. १४।१।३८) । उदकघटपूरणम् (अ. १४।१।३८) । उदक-घटम् उदाहाराय प्रयच्छति (अ. १४।१।३९) । शाखायां घटनिधानम् । तेनोदकेन सर्वोदकार्थकरणम् । आज्यहोमः (अ. १४।१।१७) । कुमारीकेशविचर्तनम् (अ. १४।१।५८) । ईशानकोणे तिष्ठन्त्याः कुमार्याः उष्णोदकेन आप्लावनम् । (अ. १४।२।६५) । शीतोदकेन सेचनम् (अ. १४।१;३५,४३) । वाससाऽङ्गानि प्रमार्ष्टि, तत् कुमारीपालाय प्रयच्छति (अ. १४।२।६६–६७) । तद्वासस्तुम्बर-दण्डेन गृहीत्वा गोपाटे प्रक्षिपति । अहतेन वाससा तामाच्छादयति (अ.१४।१।४५, ५३) । यज्ञोपवीतवद् वाधूयं वस्त्रं बध्नाति । केशप्रलेखनम् (अ. १४।२।६८) । योक्त्रस्य कटिप्रदेशे बन्धनम् (अ. १४।१।४२;२;७०) । ज्येष्ठीमधुमणे रक्तसूत्रेण बन्धनम् अनामिकायाम् (अ. १।३४) । कन्यादानादनन्तरमुपाध्यायः कुमारीं हस्ते गृहीत्वा कौतुकगृहान्निर्णयति । शाखायां युगं धारयति (अ. १४।१।२०) । दक्षिणतस्तत् पुरुषो धारयति । कन्याया ललाटप्रदेशे हिरण्यबन्धनम् (१४।१।४०,-४१) । तदुपरि युगच्छिद्राद्दुदकनिनयनम् । कुमार्या अश्मारोहणम् (अ. १४।१।४७) । तया लाजहोमः (अ. १४।२ ६३) । वरेण पाणिग्रहणम् (अ० १४।१।४८-५२) । वरः कन्याम् अग्निं त्रिः परिणयति (अ. १४।१।३९) । सप्त लेखा-लेखनम् (अ. ५।१।६) । तासु वधूमुत्क्रामयति । तल्पे उपवेशयति (अ. १४।२।३१;१,६०) । उपविष्टायास्तस्याः पादौ सुहृत् प्रक्षालयति । कुमारी कटिवेष्टितं योक्त्रं मोचयति (अ. १४।१।५७;५८) । तद्योक्त्रे भृत्याः संरभन्ते । ये जयन्ति ते बलीयांसो मन्यन्ते । वधूः सर्वौषधीर्वरमूर्ध्नि पलाशपत्रेणावपति (अ. १४।२।५३–५८) । कुमारीं तल्पादुत्थापयति (अ. १४।१।५९,६०,६२) । इति विवाहः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथोद्वाहः। तत्र वरस्य गृहे वधूनयनम्। तद्यथा। वधूवरौ यानमारोहयति (अ० १४।१।६१;२,३०)। कर्त्ता अग्रे व्रजति (अ० १४।२।८;१,६४)। दक्षिणेन पादेन प्रक्रामति अध्वानम् (अ० १४।२।११;१,३४)। तेनैवाह्ना यद्यन्याप्यूढा तर्हि वधूवस्त्रस्य दशाखण्डं गृहीत्वा चतुष्पथे क्षिप्त्वा दक्षिणेन पादेन तदुपरि तिष्ठति तत् प्रायश्चित्तम् (अ० १४।२।७४। उभयोरूढयोः शुभकामः सन् जपं कुर्यात्। (अ० १४।२।४६)। अन्तरा ब्रह्माणम् अतिक्रमयतः। यानस्य विनिष्करणम् (अ० १४।२।४७)। अध्वनि तीर्थे आयाते लोष्टं प्रक्षिप्य तत उत्तरति (अ० १४।२.६)। महावृक्षेषु दृष्टेषु जपति (अ० १४।२।९)। वध्वीक्षणार्थं कुदृक्षु स्त्रीष्वागतासु ताः प्रति जपति (अ० १४।२।२८)। द्वैभेदं (सिन्धुसङ्गमं) दृष्ट्वा जपति (अ० १४।२।७)। ओषधीनदीक्षेत्रवनेषु दृष्टेषु जपति (अ० १४।२।७)। श्मशाने दृष्टे जपति (अ० १४।२।७३) अध्वनि सुप्तायां वध्वां प्रबोधयति मन्त्रेण (अ० १४।२।७५)। वर-पितृगृह आसन्नागते जपति (१४।२।१२)। गृहमागते याने तद् अद्भिः सम्प्रोक्ष्य वलीवर्दौ विमोचयति (अ० १४।२।१६)। निर्ऋत्यपनोदाय पत्नीशालां प्रोक्षति (अ० १४।२।१९)। दक्षिणतो गृहपार्श्वे गोमयपिण्डेऽश्मानं स्थापयति (अ० १४।१।४७)। तस्योपरि पलाशस्य यत् पर्णत्रितयं तस्मान्मध्यमपर्णं गृहीत्वा स्थापयति, तस्योपरि घृतं, घृतस्योपरि दूर्वाग्राणि, तदुपरि वधूं स्थापयति (अ० १४।१।४७)। वधूं प्रपाद्य वरगृहे प्रवेशयति (अ० १४।२.२६;१,,२१।६३;६४)। पूर्णपात्रेण कुम्भफलेन अक्षतसहितेन प्रवेशः। अग्निं प्रज्वाल्य ततो हस्तग्रहणं कृत्वा वरो वधूं परिणयति (अ० १४।२।१७;१८)। अग्निसरस्वतीपितृसूर्यदेवमित्रवरुणेभ्यो नमस्कुर्वतीमनुमन्त्रयते (अ० १४।२।२०;४६)। कश्चिद् रोहितचर्म आहरति (अ० १४।२।२१)। उपस्तृतस्य तस्योपरि बल्वजम् उपस्तृणीते, तस्योपरि वधूमारोहयति उपवेशयति च (अ० १४।२।२३)। दक्षिणोत्तरम् उपस्थं कुरुते वधूः। ब्राह्मणायनं कुमारं शुभनामकं तस्या उपस्थे उपवेशयति (अ० १४।२।२४)। कुमाराय फलमोदकादि दत्वा तमुत्थापयति (अ० १४।२.२५)। 'तेन भूतेन' (६।७८) इत्यादिना वरवध्वौ क्रमेण जुहुतः (अ० ५।२४;६।,७८;८२।१४।२।१–५;४५)। सम्पातानानयति। उदपात्रे उत्तरान् सम्पातान् आनयति। उदपात्रं वरवध्वोरञ्जल्योर्निनयति (अ० १४।२।४५)। 'तेन भूतेन' (६।७८) इति रसान् सम्पात्य तान् स्थालीपाकञ्च जायापती उपसर्पयति। तत एकस्मिन् स्थाने स्वजनैः सह उपविश्य मिष्टान्नस्य सहाशनं कुर्यात् पतिः। तेनैव सूक्तेन (६।७८) यवानाम् आज्यमिश्राणां पूर्णाञ्जलिं जुहोति। इत्युद्वाहः। [illegible]

अथ चतुर्थिकाकर्म। तद्यथा। **'सप्त मर्यादाः'** (अ० ५।१।६) इति वरो व्रीहीन् जुहोति विवाहाग्नौ। **'अक्ष्यौ नौ'** (अ० ७।३७) इति परस्परं वरवध्वा[illegible]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षिणी अञ्जाते। **'महीमूषु'** (अ० ७।६।२) इति वरवध्वौ खट्वामालम्भयति आचार्यः। आरोहयति (अ० १४।२।३१) तत्र च तामुपवेशयति (अ० १४।२।२३)। संवेशयति च (अ०१४।२।३२)। तौ वस्त्रेण आच्छादयति (अ० ७।३८)। ताविभिमुखौ करोति (अ० १४।२।३७)। **'इहेमौ'** (अ० १४।२।६४) इति वरवध्वौ त्रिः संनुदति। मदुघमणि पिष्ट्वा औक्षे प्रक्षिप्य वधूवरौ परस्परं सञ्ज्च्छेते (अ० १।३४।१४।२;७१;७२)। **'ब्रह्मजज्ञानम्'** (अ० ४।१) इत्यङ्गुष्ठेन वरः प्रजननदेशं स्पृशति। खट्वाया उत्थापयति वरो वधूम् (अ० १४।२।४३)। अहतवस्त्रं वरवध्वौ परिधापयति आचार्यः (अ० १४।१। ४५;५३;५५)। वधूसीमन्ते शष्पं निदधाति वरः (अ० १४।१।५५;५६)। व्रीहियवौ सीमन्ते निदधाति अमन्त्रकम्। दर्भपिञ्जूल्या सीमन्तं विचृतति। शणशकलने वधूकेशान् परिवेष्टयति। सर्वेण काण्डेन आज्यं जुहोति वरः। प्रायश्चित्तमेतत्। शुल्कद्रव्यं पृथक् करोति। इदं तव इदं मामकीनमिति (अ० १४।१।३२)। वाधूयं वस्त्रं ददतं वरमनुमन्त्रयते (अ० १४।१।२५–३०)। आचार्यस्तत् प्रतिगृह्णाति (अ० १४।२।४१;४२)। तत् स्थाणावासजति (अ० १४।२।४८)। तद् गृहीत्वा गच्छति (अ० १४।२।४९)। तद् वृक्षं प्रनिच्छादयति (अ० १४।२।५०)। सर्वे स्नानं कुर्वन्ति। (अ० १४।२।४५)। तेन वाधूयेनाच्छादयत्यात्मानमाचार्यः (अ० १४।२।५१)। **'नवं वसानः'** (अ० १४।२।४४) इति जपित्वा आचार्यो गृहं गच्छति। कुमार्यां नीयमानायां पितृगृहे रोदने सति **'जीवं रुदन्ति'** (अ० १४।१।४६) इत्यनया **'यदीमे केशिनः'** (अ० १४।२।५९-६२) इति चतसृभिश्चाज्यं जुहोति। तत् प्रायश्चित्तम्। इति चतुर्थिकाकर्म।

सत्येनोत्तभिता भूमिः सूर्येणोत्तभिता द्यौः।
ऋतेनादित्यास्तिष्ठन्ति दिवि सोमो अधि श्रितः ॥१॥

पदपाठः

सत्येन। उत्तभिता। भूमिः। सूर्येण। उत्तभिता। द्यौः। ऋतेन। आदित्याः। तिष्ठन्ति। दिवि। सोमः। अधि। श्रितः ॥१॥

सत्येन ब्रह्मणानन्तात्मना। ब्रह्मा खलु देवानां मध्ये सत्यभूतः। तेनाधःस्थितेन **भूमिः उत्तभिता** उपरि स्तम्भिता। यथाधो न पतेत् तथा कृता। यद्वा। सत्येन अनृतप्रतियोगिना धर्मेण भूमिरुत्तम्भितोद्धृता फलिता भवतीत्यर्थः। असति सत्ये भूम्यां सस्यादयो न फलन्ति। तथा **सूर्येण** देवेन **द्यौः उत्तम्भिता**। सूर्यो हि द्युस्थानत्वाद् दिवं दधार। **ऋतेन** यज्ञेन **आदित्याः** अदितेः पुत्रा देवाः **तिष्ठन्ति**। यज्ञेन यजमानदत्तेन खल्वाहुत्या देवा उपजीवन्ति। **दिवि** द्युलोके **सोमः** देवानामा-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्यायनकारी वल्लीरूपो देवतारूपश्च **अधिश्रितः** परितिष्ठति । इति स्वपतिं सोमं सूर्या स्तौति । मन्त्रोऽयं सायणेनैव व्याख्यातः (ऋ. १०।८५।१) ।

सोमेनादित्या बलिनः सोमेन पृथिवी मही ।

अथो नक्षत्राणामेषामुपस्थे सोम आहितः ।।२।।

पदपाठः

सोमेन । आदित्याः । बलिनः । सोमेन । पृथिवी । मही । अथो इति । नक्षत्राणाम् । एषाम् । उपऽस्थे । सोमः । आऽहितः ।।२।।

सोमेन आदित्याः अदितेः पुत्राः इन्द्रादयः **बलिनः** भवन्ति । ऐन्द्रवायवादिग्रह-परिग्रहादिति भावः । तथा **सोमेन** आहुत्यात्मनाग्नौ हुतेन **पृथिवी** भूमिः **मही** महती भवति । आहुत्या वृष्टिद्वारेण सस्यादिसम्पत्तेः । **अथो** अपि चायं सोमः **नक्षत्राणामेषाम्** । न क्षं त्रायन्त इति नक्षत्रा ग्रहचमसादयः । तेषामेषाम् **उपस्थे सोमः** रसात्मकः **आहितः** । यद्वा । प्रसिद्धानामेव नक्षत्राणामुपस्थ उपस्थाने द्युलोके सोम आहितः । 'तृतीयस्यामितो दिवि सोम आसीत्तं गायत्र्याहरत्' (तै. ब्रा. ३।२।१।१) इत्यादिश्रुतेः । देवतारूपसोमपक्षे । सोमेनादित्या देवा बलिनो बलवन्तो भवन्ति तस्यैकैककलास्वादनात् । 'प्रथमां पिवते वह्निर्द्वितीयां पिवते रविः' इत्यादिस्मृतेः । सोमेन पृथिवी मही । अमृतसेकेनौषध्याद्यभिवृद्ध्या पृथिव्या बलवत्त्वम् । चन्द्रस्य नक्षत्राणामुपस्थे स्थितिः प्रसिद्धा । मन्त्रोऽयं सायणेनैव व्याख्यातः (ऋ.१०।८५।२) ।

सोमं मन्यते पपिवान् यत्संपिषन्त्योषधिम् ।

सोमं यं ब्रह्माणो विदुर्न तस्याश्नाति पार्थिवः ।।३।।

पदपाठः

सोमम् । मन्यते । पपिऽवान् । यत् । सम्ऽपिषन्ति । ओषधिम् । सोमम् । यम् । ब्रह्माणः । विदुः । न । तस्य । अश्नाति । पार्थिवः ।।३।।

तं **सोमं** मन्यते । कः । यः **पपिवान्** । वर्धनकामार्थं चिकित्साद्यर्थं पीतः सोमो येन । **यत्** यमित्यर्थः । यं सोमम् ओषधिं वल्लीरूपं **संपिषन्ति** सामर्थ्याद्रासायनिकाः । न च साक्षात् सोमः । तर्हि कः । उच्यते । **सोमं** हि तं मन्यते यं ब्रह्माणः । यद् ब्रह्मशब्दो ब्राह्मणशब्दपर्यायोऽस्ति । 'कुतो नु चरसि ब्रह्मन्' 'तस्मै मा ब्रूया निधिपाय ब्रह्मन्' इत्यादि प्रयोगात् । ब्राह्मणा इत्यर्थः । ते चर्त्विजो यजमानश्च यागसाधनभूतं संस्कर्तुं **विदुः** जानन्ति तस्य अंशम् । यद्वा । कर्मणि षष्ठी । तं सोमं **पार्थिवः** याज्ञिकजनातिरिक्तः कश्चनापि अयज्वा न **अश्नाति** । यज्वैवैनं भक्षयितुमर्हति

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नान्यः, तस्यैव देवरूपत्वादित्यर्थः। एवमोषधिपक्षे। अथ चन्द्रपक्षे उच्यते। तं सोमं मन्यते पपिवान्. पीतवान्, यजमानो यद्यमोषधिरूपं संपिषन्त्यभिषवग्रावभिरध्वर्य्वादयो यजमानश्च। न च स सोमः। कस्तर्हि। यं ब्रह्माणो ब्राह्मणा अभिज्ञा दैवज्ञा विदुः कथयन्ति चन्द्रमसं न तस्याश्नाति पार्थिवः देवेभ्योऽन्यो मनुष्यादिः। देवा अग्न्यादयो रश्मयो वा। यज्ञार्हसोमस्यासोमत्वं न निन्दार्थं, अपि तु इतरस्य स्तुत्यै इति मन्तव्यम्। 'अपशवो वा अन्ये गोअश्वेभ्यः' (तै. सं. ५।२।९।४) इत्यादिवत्। एवमत्र सोम्या उभयथा योज्याः। स्वल्पेन पाठभेदेन मन्त्रोऽयं ऋग्वेदेऽपि पठ्यते (ऋ. १०।८५।३)।

यत्त्वा सोम प्रपिबन्ति तत आ प्यायसे पुनः।

वायुः सोमस्य रक्षिता समानां मास आकृतिः॥४॥

पदपाठः

यत्। त्वा। सोम। प्रऽपिबन्ति। ततः। आ। प्यायसे। पुनरिति। वायुः। सोमस्य। रक्षिता। समानाम्। मासः। आऽकृतिः॥४॥

हे देव **सोम**! **यत्** यदा **त्वा** त्वां **प्रपिबन्ति** ओषधिरूपं त्रिष्वपि सवनेषु **ततः** अनन्तरमेव **पुनः आप्यायसे**। 'आप्यायस्व सम्' (ऋ. सं. १।९१।१६) इति प्रातः सवने, 'सं ते पयांसि' (ऋ. सं. १।९१।१८) इत्युत्तरयोः सवनयोराप्यायसे। किञ्च **वायुः** तव सोमस्य **रक्षिता**। यथा न शुष्यति तथा। वायुः शोषकः प्रसिद्धो लोके। किञ्च **मासः**। 'मसी परिमाणे'। मस्यते परिमीयते इति मासः सोमः। स च समानां संवत्सराणाम् **आकृतिः** आकर्त्ता व्यवच्छेदको भवति। संवत्सरे संवत्सरे वसन्तादिकालेषु अनुष्ठीयमानत्वात् 'वसन्ते वसन्ते ज्योतिषा यजेत' इति श्रुतेः। यद्वा। सोमाधारवनस्पतिविकारग्रहद्वारेण वायुः सोमरसस्य रक्षिता भवति। 'वायुगोपा वनस्पतयः' इति श्रुतेः। एवं वल्लीरूपसोमपक्षे योजना। चन्द्रपक्षे तु हे देव सोम! यद् यदा त्वा त्वां प्रपिबन्ति रश्मयोऽपरपक्षे ततोऽनन्तरमेव पूर्वपक्षे पुनराप्यायसे। वायुः च सोमस्य तव रक्षिता। वाय्वधीनत्वाच्चन्द्रगतेः। किञ्च समानां संवत्सराणां मासः। षष्ठ्येकवचनमेतत्। मासस्य आकृतिश्च कर्त्ता त्वं चासि। एकैककलाह्रासवृद्धिभ्यां हि मासः पूर्यते तैः संवत्सर इति। व्याचख्यौ मन्त्रमिमं सायणः। ऋ. १०।८५।५)।

आच्छद्विधानैर्गुपितो बार्हतैः सोम रक्षितः।

ग्राव्णामिच्छृण्वन् तिष्ठसि न ते अश्नाति पार्थिवः॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आच्छत्ऽविधानैः । गुपितः । बार्हतैः । सोम । रक्षितः । ग्राव्णाम् । इत् । शृण्वन् । तिष्ठसि । न । ते । अश्नाति । पार्थिवः ॥५॥

हे **सोम आच्छंद्विधानैः** । आच्छादयन्ति विधानानि येषां विद्यन्ते त आच्छद्विधानाः, तैः **गुपितः** । तथा **बार्हतैः** गुपितः । स्वानभ्राजाङ्घार्यादिभिः सप्तभिः सोमपालैः रक्षितः त्वम् । 'एते वा अमुष्मिँल्लोके सोममरक्षन्' (तै. सं. ६।१।१०।५) इति ब्राह्मणम् । **ग्राव्णामिच्छृण्वन्** अभिषवग्राव्णां ध्वनिं शृण्वन्नेव तिष्ठसि । **ते** त्वां **पार्थिवः** पार्थिवो जनः **न अश्नाति** । न हि द्युस्थश्चन्द्ररूपः सोमोऽन्यत्यैः पानयोग्यो भवति । 'चन्द्रमा वै सोमोदेवानामन्नं तं पौर्णमास्यामभिषुण्वन्ति' (श० ब्रा० ११।१।५।३) इति वाजसनेयकम् । मन्त्रमिमं सायणो व्याचख्यौ (ऋ० १०।८५।४)

चित्तिरा उपबर्हणं चक्षुरा अभ्यञ्जनम् ।

द्यौर्भूमिः कोश आसीद् यदयात् सूर्या पतिम् ॥६॥

पदपाठः

चित्तिः । आः । उपऽबर्हणम् । चक्षुः । आः । अभिऽअञ्जनम् । द्यौः । भूमिः । कोशः । आसीत् । यत् । अयात् । सूर्या । पतिम् ॥६॥

चित्तिः देवता उपबर्हणम् **आः** आसीत् । चक्षुः **अभ्यञ्जनम् आ** आसीत् । तथा हि वृत्रस्य कनीनिका परापतत् त्रिककुन्नाम पर्वते । तेन त्रैककुदेनाञ्जनसजातीयेन चक्षुषी आञ्जते । तच्चक्षुरेवाञ्जनमासीदिति । **द्यौः** च **भूमिः** च **कोशः आसीत्** । कोशस्थानीये अभूताम् । **यत्** यदा **सूर्या पतिं** स्वकीयं नवं भर्तारं सोमम् **अयात्** अगच्छत् तदैवमुपकरणान्यासन् । व्याचख्यौ मन्त्रमिमं सायणः (ऋ० १०।८५।७)

रैभ्यासीदनुदेयी नाराशंसी न्योचनी ।

सूर्याया भद्रमिद् वासो गाथयैति परिष्कृता ॥७॥

पदपाठः

रैभी । आसीत् । अनुऽदेयी । नाराशंसी । निऽओचनी । सूर्यायाः । भद्रम् । इत् । वासः । गाथया । एति । परिष्कृता ॥७॥

आभिः सूर्या स्वविवाहमस्तौदित्युक्तम् । सूर्या सावित्री ब्रूते रैभी । रैभ्यः काश्चनर्चः । 'रैभीः शंसति रेभन्तो वै देवाश्चर्षयश्च स्वर्गं लोकमायन्' (ऐ० ब्रा[illegible]

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६।३२) इत्यादि ब्राह्मणविहिता रैभ्यः। सा रैभी **अनुदेयी आसीत्**। दीयमानवधूविनोदनायानुदीयमाना वयस्यासीत्। तथा **नाराशंसी**। 'प्राता रत्नम्' (ऋ० १।१२५।१) इत्यादिका मनुष्याणां स्तुतयो नाराशंस्यः। सा नाराशंसी **न्योचनी**। उचतिः सेवाकर्मा। सा वधूशुश्रूषार्थं दीयमाना दास्यभवत्। **सूर्यायाः** मम **भद्रं वासः** विचित्रं दुकूलादिकमाच्छादनयोग्यं वस्त्रं **गाथया परिष्कृता** परिष्कृतम् अलङ्कृतमेति। 'गाथा गीयते' इत्यादि ब्राह्मणोक्ता गाथा। तया **गाथया** यत् परिष्कृतमस्ति तद् वासोऽभवदिति। लिङ्गव्यत्ययश्छान्दसः। यद्वा परिष्कृता इति न्योचनीविशेषणम्। परन्तु 'परिष्कृतम्' इति ऋक्पाठः (१०।८५।६)

स्तोमा आसन् प्रतिधयः कुरीरं छन्द ओपशः।

सूर्याया अश्विनो वराग्निरासीत् पुरोगवः ॥८॥

पदपाठः

स्तोमाः। आसन्। प्रतिऽधयः। कुरीरम्। छन्दः। ओपशः। सूर्यायाः। अश्विना। वरा। अग्निः। आसीत्। पुरःऽगवः ॥८॥

सूर्याया रथस्य **स्तोमाः** त्रिवृदादयः **प्रतिधयः आसन्**। प्रतिधीयन्त इति प्रतिधय ईषातिर्यगायतकाष्ठादयः। तथा **कुरीरं छन्दः** कुरीरनामकं छन्दोऽनसः **ओपशः** अभवत्। येनोपशेरते स ओपशः। तादृशायाः **सूर्यायाः अश्विना** अश्विनौ **वरा** वरौ आस्तामिति शेषः। तस्या विवाहे **पुरोगवः** पुरोगन्ता पुरतो गन्ता यः पूर्वमेव प्रस्तावार्थं गच्छति तत्स्थानीयः **अग्निरासीत्**। 'प्रजापतिर्वै सोमाय राज्ञे दुहितरं प्रायच्छत् सूर्यां सावत्रीं तस्यै सर्वे देवा वरा आगच्छन्'' (ऐ० ब्रा० ४।७) इत्यादि हि ब्राह्मणम्। अत्रायमभिप्रायः। प्रजापतिः सविता स्वदुहितरं सोमाय प्रायच्छत्। सोमाय दास्यामीति मनीषामकरोत्। तस्मिन् समये पुत्र्या उपचारार्थं प्रदानान्युक्तान्यभवन्। तथा च सत्यश्विनौ प्रबलौ सन्तावाजि पुरतो गत्वा तामलभेतामिति। उत्तरत्रापि 'सोमो वधूयुरभवत्' इत्यादिनायमेवार्थः स्पष्टो भविष्यति। व्याचख्यौ मन्त्रमिमं सायणः (ऋ० १०।८५।८)

सोमो वधूयुरभवदश्विनास्तामुभा वरा।

सूर्यां यत् पत्ये शंसन्तीं मनसा सविताददात् ॥९॥

पदपाठः

सोमः। वधूऽयुः। अभवत्। अश्विना। आस्ताम्। उभा। वरा। [सू]र्याम्। यत्। पत्ये। शंसन्तीम्। मनसा। सविता। अददात् ॥९॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सोमो वधूयुः वधूकामो वरः **अभवत्** । तस्मिन् समये **अश्विना** अश्विनौ **उभा** उभौ **वरा** वरौ **आस्ताम्** अभूताम् । **यत्** यदा **सूर्यां पत्ये शंसन्तीं** पतिं कामयमानाम् । पर्याप्तयौवनामित्यर्थः । सूर्यां **मनसा** सहिताय सोमाय वराय **सविता** तत्पिता अददात् प्रादात्, दित्सां चकार । मन्त्रोऽयं सायणेनैव व्याख्यातः । (ऋ. १०। ८५।९) ।

मनो अस्या अन आसीद् द्यौरासीदुत च्छदिः ।
शुक्रावनड्वाहावास्तां यदयात् सूर्या पतिम् ।।१०।।

पदपाठः

मनः । अस्याः । अनः । आसीत् । द्यौः । आसीत् । उत । छदिः । शुक्रौ । अनड्वाहौ । आस्ताम् । यत् । अयात् । सूर्या । पतिम् ।।१०।।

अस्याः सूर्यायाः पत्युर्गृहं गच्छन्त्याः **अनः** रथः **मनः आसीत्** । या पतिगृहं त्वया गच्छामीति मतिरस्ति सा अन आसीत् । **उत** अपि च तस्याः अनसः **द्यौः** द्युलोकः छदिः उपर्यपिधानम् **आसीत्** । **शुक्रौ** दीप्तौ सूर्याचन्द्रमसौ **अनड्वाहौ** रथस्य वोढारौ **आस्ताम्** अभवताम् । **यत्** यदा **सूर्या पतिं** सोमं सोमभवनमिति यावत् । अत एव ऋक्संहितायां 'गृहम्' इति पठ्यते । (ऋ० १०।८५।१०) । **अयात्** अगात् ।

ऋक्सामाभ्यामभिहितौ गावौ ते सामनावैताम् ।
श्रोत्रे ते चक्रे आस्तां दिवि पन्थाश्चराचरः ।।११।।

पदपाठः

ऋक्ऽसामाभ्याम् । अभिऽहितौ । गावौ । ते । सामनौ । ऐताम् । श्रोत्रे इति । ते । चक्रे इति । आस्ताम् । दिवि । पन्थाः । चराचरः ।।११।।

हे सूर्ये देवि ! **ते** तव **ऋक्सामाभ्याम्** अभिधानीस्थानाभ्याम् **अभिहितौ गावौ** गोस्थानीयौ सूर्याचन्द्रमसौ **सामनौ** सामानौ सन्तौ **ऐताम्** अगच्छताम् । अनोवाहौ पत्युर्गृहं प्रति अगच्छताम् । **ते** तव **श्रोत्रे** वरस्य गुणग्राहिणी श्रोत्रे एव **चक्रे** आस्ताम् । मनोरूपस्य रथस्य श्रोत्रे चक्रे अभवताम् इत्यर्थः । **दिवि पन्थाश्चराचरः** चलाचलोऽत्यन्तं गमनसाधनभूतो मार्गोऽभूत् । रथसञ्चारप्रदेशो द्युलोक आसीत् । 'स्वल्पेन पाठभेदेन ऋक्संहितायां पठचतेऽयं मन्त्रः (ऋ० १०।८५।११) ।

शुची ते चक्रे यात्या व्यानो अक्ष आहतः ।
अनो मनस्मयं सूर्यारोहत् प्रयती पतिम् ।।१२।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

शुची इति । ते । चक्रे इति । यात्याः । विऽआनः । अक्षः । आऽहतः । अनः । मनस्मयम् । सूर्या । आ । अरोहत् । प्रऽयती । पतिम् ॥१२॥

यात्याः गच्छन्त्याः **ते** तव अनसः **चक्रे** चङ्क्रमणशीले रथाङ्गे **शुची** श्रोत्रे आस्ताम् । **व्यानः** तव व्यानो वायुः **अक्षः** । उभयरथचक्रच्छिद्रगामिनी या काष्ठा सा च रथस्य सर्वं भारं वहति । सोऽक्षो व्यानोऽभूत् । **मनस्मयं** मनोमयम् **अनः** शकटं **सूर्या पतिं** सोमं प्रति **प्रयती** प्रकर्षेण गच्छन्ती **आरोहत्** आरूढवती । पतिं प्रति जिगमिषोर्मनोरूपस्य रथस्य पत्युर्गुणश्राविणी श्रोत्रे एव चक्रे अभूतां व्यानो धारको वायुश्चेष्टकोऽक्षोऽभूदित्यर्थः । व्याचख्यौ सायणो मन्त्रमिमम् (ऋ० १०। ८५।१२) ।

सूर्याया वहतुः प्रागात् सविता यमवासृजत् ।
मघासु हन्यन्ते गावः फल्गुनीषु व्युह्यते ॥१३॥

पदपाठः

सूर्यायाः । वहतुः । प्र । अगात् । सविता । यम् । अवऽअसृजत् । मघासु । हन्यन्ते । गावः । फल्गुनीषु । वि । उह्यते ॥१३॥

सोमाय प्रदित्सितायाः **सूर्यायाः** वहतुः कन्या-प्रियार्थं दातव्यो गवादिपदार्थो वहतुः । स च **प्रागात्** तस्या अपि पूर्वमगच्छत् । **यं** वहतुं **सविता** अस्याः पिता **अवासृजत्** अवसृष्टवान् । प्रादादित्यर्थः । कदा सागच्छत् कदा वहतुरित्युभयोः काल उच्यते । **मघासु** मघानक्षत्रेषु **गावः** सवित्रा दत्ता गावः सोमगृहं प्रति **हन्यन्ते** प्रेष्यन्ते–इत्यर्थः । दण्डैस्ताडचन्ते प्रेरणार्थमिति वा । **हन् धातुर्हि गत्यर्थकोऽपि पठचते** । अथवा मघासु मघानक्षत्रोपलक्षितेषु माघदिवसेषु तु गावः रविरश्मयः हन्यन्ते शैत्यप्रभावेण मन्दतां यान्ति । अतः न तस्मिन् समये सर्वं कार्यं सुविधापूर्वकं सम्पद्यते । तस्मादेव **फल्गुनीषु** पूर्वोत्तरफल्गुन्योः नक्षत्रयोः सवितुः सकाशात् **विउह्यते** विशेषेण नीयते रथेन सोमगृहं प्रति । मन्त्रोऽयं पाठभेदेन ऋग्वेदेऽपि प्राप्यते (ऋ० १०।८५।१३) ।

यदश्विना पृच्छमानावयातं त्रिचक्रेण वहतुं सूर्यायाः ।
क्वैकं चक्रं वामासीत् क्व देष्ट्राय तस्थथुः ॥१४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यत् । अश्विना । पृच्छमानौ । अयातम् । त्रिऽचक्रेण । वहतुम् । सूर्यायाः । क्वऽ । एकम् । चक्रम् । वाम् । आसीत् । क्वऽ । देष्ट्राय तस्थथुः ॥१४॥

अश्विना अश्विनौ **यत्** यदा **पृच्छमानौ** सवितारं प्रष्टुम् **अयातम्** अगच्छतम् । केन साधनेनायातं तदुच्यते । **त्रिचक्रेण** चक्रत्रययुक्तेन रथेन । किं पृच्छमानौ । **सूर्यायाः वहतुम्**, विवाहमित्यर्थः । तथा हे अश्विनौ ! **वां** भवतोः संप्रति दृश्यमानमिदम् **एकं चक्रं क्व आसीत्** पुरा । **क्व** वां युवां **देष्ट्राय** दानाय प्रवृत्तौ **तस्थथुः** इत्यश्विनोर्निवासं पृच्छति । उत्तरार्द्धपाठः ऋग्वेदे स्वल्पेन पाठभेदेन पठ्यते (ऋ० १०।८५।१४) ।

यदयातं शुभस्पती वरेयं सूर्यामुप ।
विश्वे देवा अनु तद् वामजानन् पुत्रः पितरमवृणीत पूषा ॥१५॥

पदपाठः

यत् । अयातम् । शुभः । पती इति । वरेऽयम् । सूर्याम् । उप । विश्वे । देवाः । अनु । तत् । वाम् । अजानन् । पुत्रः । पितरम् । अवृणीत । पूषा ॥१५॥

हे **शुभस्पती** उदकस्य स्वामिनौ **यत्** यौ **अयातम्** अगच्छतम् । कं प्रति । **वरेयं** वरणीयायाः सूर्यायाः सम्बन्धिनं वरैर्याचितव्यं वा । सवितारमित्यर्थः । किमर्थम् । **सूर्याम् उप** गन्तुम् । **तत्** तदानीं **वां** युवां सवितारं प्रति गच्छन्तौ **विश्वे** सर्वे **देवाः अनु अजानन्** अनुज्ञातवन्तः । तथा **पितरं पुत्रः** अश्विनोः पुत्रः **पूषा अवृणीत** वृतवान् । स्वल्पेन पाठभेदेन ऋग्वेदे पठ्यतेऽयं मन्त्रः (ऋ० १०।८५।१५) ।

द्वे ते चक्रे सूर्ये ब्रह्माण ऋतुथा विदुः ।
अथैकं चक्रं यद् गुहा तदद्धातय इद् विदुः ॥१६॥

पदपाठः

द्वे इति । ते । चक्रे इति । सूर्ये । ब्रह्माणः । ऋतुऽथाः । विदुः । अथ । एकम् । चक्रम् । यद् । गुहा । तत् । अद्धातयः । इत् । विदुः ॥१६॥

अथ स्वयमेव स्वात्मानं प्रति सूर्या वदति । हे **सूर्ये ते** तव **द्वे चक्रे** प्रज्ञाते पुरा दृष्टे द्वे एव चन्द्रसूर्यात्मके **ऋतुथा** ऋतुषु विनिर्दिष्टे चक्रे **ब्रह्माणः** ब्राह्मणाः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदुः जानन्ति । **अथैकं चक्रं** तृतीयं संवत्सरात्मकं **गुहा** गुहायां निहितं **यत्** अस्ति **तदद्धातय इत्** । एतन्मेधाविनामसु पठितम् (नि० ३।१५।२१) । मेधाविन एव विदुः जानन्ति । व्याचख्यौ मन्त्रमिमं सायणः (ऋ० १०।८५।१६) ।

अर्यमणं यजामहे सुबन्धुं पतिवेदनम् ।
उर्वारुकमिव बन्धनात् प्रेतो मुञ्चामि नामुतः ।।१७।।

पदपाठः

अर्यमणम् । यजामहे । सुऽबन्धुम् । पतिऽवेदनम् । उर्वारुकम्ऽइव । बन्धनात् । प्र । इतः । मुञ्चामि । न । अमुतः ।।१७।।

वयम् **अर्यमणम्**, अरीन् मन्देहाद्यसुरान् तमो वा यच्छति नियच्छतीति अर्यमा सूर्यः । 'असौ वा आदित्योऽर्यमा' (तै०सं० २।३।४।१) इति श्रुतेः । आदित्यं देवं **यजामहे** पूजयामः । कीदृशम् । **सुबन्धुम्**, शोभनवन्धनम्, पत्युः प्रणयवन्धनकारिणमित्यर्थः तथा **पतिवेदनम्** पत्युः प्रज्ञापकं प्रापकं वा ।

अहं कन्याजनक; इमां कन्यां साम्प्रतम् **इतः** पितृगृहात् **बन्धनात्** वृन्तसम्पर्क-बन्धनात् **उर्वारुकम् इव** कर्कटिकाफलं यथा तद्वत् **प्रमुञ्चामि** पृथक् करोमि, किन्तु **अमुतः न** तस्मादस्याः पतिभवनात् न पृथक् करोमि । लोके यथा कर्कटीफलं वृन्तात् कश्चन पृथक् करोति तद्वदहमेनां कन्यामस्मद्गृहात् पृथक् करोमि परन्तु पतिकुलान्नैव पृथक् करोमि । तत्र त्वस्याः विशेषं बन्धनं स्थापयामीति तात्पर्यार्थः । अर्यमणम् ऋ गतौ (जु०) धातोः 'अर्यः स्वामिवैश्ययोः' (पा०सू० ३।१।१०३) सूत्रेण यत्-प्रत्ययः । अर्योपपदात् माङ् माने (जु०) धातोश्च 'श्वन्नुक्षन्पूषन्०' (उ० १।१५९) इत्यनेन कनिन्प्रत्ययः । पाठभेदेन ऋग्वेदेऽपि प्राप्यतेऽयं मन्त्रः (ऋ० ७।५९।१२) ।

प्रेतो मुञ्चामि नामुतः सुबद्धाममुतस्करम् ।
यथेयमिन्द्र मीढ्वः सुपुत्रा सुभगासति ।।१८।।

पदपाठः

प्र । इतः । मुञ्चामि । न । अमुतः । सुऽबद्धाम् । अमुतः । करम् । यथा । इयम् । इन्द्र । मीढ्वः । सुऽपुत्रा । सुऽभगा । असति ।।१८।।

हे तनये ! इतः पितृकुलात् **प्र मुञ्चामि** त्वां पृथक् करोमीत्यर्थः । **नामुतः** । [भ]र्तृगृहान्न प्रमुञ्चामि । अमुतः भर्तृगृहे तु त्वां सुबद्धां सुस्थिरां **करम्** करोमि— [इति] तात्पर्यम् । **यथेयं** कन्या हे **इन्द्र मीढ्वः** सेक्तः **सुपुत्रा** सुसन्तानवती, **सुभगा**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सुष्ठुभाग्या च असति भवति तथा कुरु इति शेषः । व्याख्यातोऽयं मन्त्रः सायणेन (ऋ० १०।८५।२५) ।

प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
ऋतस्य योनौ सुकृतस्य लोके स्योनं ते अस्तु सहसंभलायै ।।१९।।

पदपाठः

प्र । त्वा । मुञ्चामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवाः । ऋतस्य । योनौ । सुऽकृतस्य । लोके । स्योनम् । ते । अस्तु । सहऽसंभलायै ।।१९।।

अहं त्वां त्वां कुमारिकां **वरुणस्य पाशात्** सवितृबन्धनात् स्वपितुः सवितुः स्नेहबन्धनात् **'वरुण एव सविता'** (जै० उप० ४।१२।१।३) इतिश्रुतेः । **प्रमुञ्चामि** मोचयामि, मुक्तां करोमि । **येन** स्नेहसूत्रबन्धनेन **सुशेवाः**, शेवमिति सुखनामैतत् । शोभनसुखः । पितृस्नेहसुखप्रदाता इत्यर्थः **सविता** सूर्यः **त्वा** त्वाम् **अबध्नात्** बन्धने कृतवान् । हे कन्ये ! **ऋतस्य** सत्यव्यवहारस्य वास्तविकसुखस्येत्यर्थः । **योनौ** गृहभूते **सुकृतस्य लोके** सुन्दरकर्मलोके गृहस्थाश्रमे इत्यर्थः **सहसंभलायै ते** सम्भाषिकाभिः वयस्याभिः सह तुभ्यं तत्र **स्योनं** सुखम् **अस्तु** भवतु । सह+सम्+भलधातोरच्, ततस्टाप् । स्वल्पेन पाठभेदेन पठ्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।८५।२५) ।

भगस्त्वेतो नयतु हस्तगृह्याश्विना त्वा प्र वहतां रथेन ।
गृहान् गच्छ गृहपत्नी यथासो वशिनी त्वं विदथमा वदासि ।।२०।।

पदपाठः

भगः । त्वा । इतः । नयतु । हस्तऽगृह्य । अश्विना । त्वा । प्र । वहताम् । रथेन । गृहान् । गच्छ । गृहऽपत्नी । यथा । असः । वशिनी । त्वम् । विदथम् । आ । वदासि ।।२०।।

हस्तगृह्यः ग्राह्यहस्तः भगः भगो देवः पूषेति ऋक्पाठः (ऋ० १०।८५।२६) । **त्वा** त्वाम् **इतः** पितृगेहात् **नयतु** प्रापयतु । **अश्विना** अश्विनौ **त्वा** त्वां **रथेन** यानेन **प्र वहतां** प्रगमयताम् । **गृहान्** भर्तृसम्बन्धिनो गेहान् **गच्छ त्वं गृहपत्नी यथासः** भवसि स्वगृहस्वामिनी भवसि । **वशिनी** सर्वेषां गृहगतान् [illegible] प्रापयित्री पत्युर्वशे वर्त्तमाना वा **विदथं** पतिगृहम् **अवदासि** आवदसि गृहसि[illegible] भृत्यादिजनमावद ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

इह प्रियं प्रजायै ते समृध्यतामस्मिन् गृहे गार्हपत्याय जागृहि ।
एना पत्या तन्वं१ संस्पृशस्वाथ जिर्विर्विदथमा वदासि ।।२१।।

पदपाठः

इह । प्रियम् । प्रऽजायै । ते । सम् । ऋध्यताम् । अस्मिन् । गृहे । गार्हऽपत्याय । जागृहि । एना । पत्या । तन्वऽम् । सम् । स्पृशस्व । अथ । जिर्विः । विदथम् । आ । वदासि ।।२१।।

हे वधु ! ते तव **इह** अस्मिन् पतिकुले **प्रियं प्रजया** सह **समृध्यताम्** । **अस्मिन् गृहे** गार्हपत्याय गृहपतित्वाय **जागृहि** बुध्यस्व । **एना** अनेन **पत्या** सह **तन्वं** स्वीयं शरीरं **संस्पृशस्व** संस्पृष्टं कुरु, पत्या सह संसृष्टा भवेत्यर्थः । **अथ** तथा तदनन्तरं वा **जिर्विः** वार्धक्यं गता त्वं यद्वा जॄ स्तुतौ, स्तवनीया त्वं **विदथं** विज्ञानं वेदितव्यं कर्म यद्वा विदन्त्यत्र लोकाः स्वस्वकर्मेति विदथः गार्हस्थ्यधर्ता तम् । **आवदासि** आभिमुख्येन ब्रूयाः । स्वल्पेनोत्तरार्धपाठेन ऋग्वेदेऽप्ययं पठ्यते मन्त्रः (ऋ० १०।८५।२७) ।

इहैव स्तं मा वि यौष्टं विश्वमायुर्व्यश्नुतम् ।
क्रीडन्तौ पुत्रैर्नप्तृभिर्मोदमानौ स्वस्तकौ ।।२२।।

पदपाठः

इह । एव । स्तम् । मा । वि । यौष्टम् । विश्वम् । आयुः । वि । अश्नुतम् । क्रीडन्तौ । पुत्रैः । नप्तृऽभिः । मोदमानौ । सुऽअस्तकौ ।।२२।।

इहैव स्तम् इहैव अस्मिँल्लोके स्तं भवतम् । **मा वियौष्टं** मा पृथग्भूतम् । **विश्वमायुर्व्यश्नुतं** पूर्णं जीवनं प्राप्नुतम् । किञ्च **पुत्रैर्नप्तृभिः** पुत्र-पौत्रादिभिः सह **क्रीडन्तौ** खेलन्तौ विहरन्तौ इत्यर्थः । **स्वस्तकौ** शोभनगृहवन्तौ 'स्वगृहे' इति ऋक्पाठः (ऋ० १०।८५।४२) युवां **मोदमानौ** भवतमिति शेषः ।

पूर्वापरं चरतो माययैतौ शिशू क्रीडन्तौ परि यातोऽर्णवम् ।
विश्वान्यो भुवना विचष्ट ऋतूँरन्यो विदधज्जायसे नवः ।।२३।।

पदपाठः

पूर्वऽअपरम् । चरतः । मायया । एतौ । शिशू इति । क्रीडन्तौ । परि । यातः । अर्णवम् । विश्वा । अन्यः । भुवना । विऽचष्टे । ऋतून् । अन्यः । विऽदधत् । जायसे । नवः ।।२३।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कश्चित् पूर्वं गच्छति सूर्यः, अन्यस्तमनु चरति चन्द्रमाः। एवं **पूर्वापरं** पौर्वापर्येण, **मायया** स्वप्रज्ञानेन, **एतौ** आदित्यचन्द्रौ **चरतः** गच्छतो दिवि। तौ **शिशू**। शिशुवद् भ्रमणाज्जायमानत्वाद्वा शिशू इत्युच्येते। शिशू सन्तौ **क्रीडन्तौ** विहरन्तौ **अर्णवं परियातः** अन्तरिक्षे परिभ्रमतः। **तयोरन्यः** आदित्यः **विश्वा भुवना** विश्वानि भुवनानि **अविचष्टे** अभिपश्यति। **ऋतून्** वसन्तादीन् **अन्यः** चन्द्रमाः **विदधत्** कुर्वन् मासान् अर्धमासांश्च कुर्वत् **नवः जायसे** नवीनः इव पुनर्जायते। वचनव्यत्ययश्छान्दसः। यद्यप्युभयोरपि पुनर्जनिरस्ति तथापि सूर्यस्य सर्वदा प्रवृद्धेरुदयो नाभिप्रेतः। चन्द्रस्य तु ह्रासवृद्धिसद्भावात् पुनः पुनर्जायते इत्युक्तिर्युक्ता। **'चन्द्रमा वै जायते पुनः'** (तै० ब्रा० ३।९।५।४) इत्यादिश्रुतेः। मन्त्रोऽयं स्वल्पेन पाठभेदेन ऋग्वेदेऽपि पठ्यते (ऋ० १०।८५।१८)। अथर्वसंहितायास्त्रयोदशे काण्डे त्वस्य पूर्वार्धभाग एवं पठितः—"विश्वान्यो भुवना निचष्टे हैरण्यैरन्यं हरितो वहन्ति।" इति।

नवो नवो भवसि जायमानोऽह्नां केतुरुषसामेष्यग्रम्।
भागं देवेभ्यो विदधास्यायन् प्र चन्द्रमस्तिरसे दीर्घमायुः ॥२४॥

पदपाठः

नवःऽनवः। भवसि। जायमानः। अह्नाम्। केतुः। उषसाम्। एषि। अग्रम्। भागम्। देवेभ्यः। वि। दधासि। आऽयन्। प्र। चन्द्रमः। तिरसे। दीर्घम्। आयुः ॥२४॥

हे चन्द्रदेव! त्वं प्रतिदिनं **जायमानः** एकैककलाधिक्येनोत्पद्यमानः सन् **नवःनवः** प्रतिदिनं नूतनः एव **भवसि** दृष्टिपथमायासीत्यर्थः। तथा **अह्नां** दिवसानां **केतुः** प्रज्ञापकः प्रतिपदादीनां तिथीनां चन्द्रकलाह्रासवृद्ध्यधीनत्वात्। तादृशस्त्वम् उषसां प्रभातीनाम् **अग्रम् एषि** प्रयासि। तथा त्वं **देवेभ्यः** इन्द्रादिहविर्भुग्भ्यः **भागं** हविर्भागं **विदधासि** करोषि। उभयपक्षान्ते किं कुर्वन्। **आयन्** प्रतिदिन ह्रासवृद्ध्या पक्षान्तमभिगच्छन्। **चन्द्रमः** हे चन्द्रदेव! त्वं **दीर्घम् आयुः** दीर्घजीवनं **तिरसे** वर्धयसि। पाठभेदेन ऋग्वेदेऽपि लभ्यतेऽयं मन्त्रः (ऋ० १०।८५।१९)।

परा देहि शामुल्यं ब्रह्मभ्यो वि भजा वसु।
कृत्यैषा पद्वती भूत्वा जाया विशते पतिम् ॥२५॥

पदपाठः

परा। देहि। शामुल्यम्। ब्रह्मऽभ्यः। वि। भज। वसु। कृत्या। एषा। पत्ऽवती। भूत्वा। आ। जाया। विशते। पतिम् ॥२५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शामुल्यम् । शामलमित्यर्थः । शमलं शारीरं मलम् । शरीरावच्छन्नस्य मलस्य धारकं वस्त्रं **परादेहि** परात्यज । धृतप्रायश्चित्तार्थं **ब्रह्मभ्यः** ब्राह्मणेभ्यः **वसु** धनं **विभज** प्रयच्छेत्यर्थः । किमर्थं वधूवासःपरित्याग इति चेत् उच्यते । **एषा कृत्या पद्वती** पादवती सती **जाया भूत्वा पतिं विशते** । कृत्यारूपवासःप्रवेशात् कृत्या जाया भूत्वा विशत इत्युपचर्यते । अतस्तत्परित्यागे कृत्यैव त्यक्ता भवतीत्यर्थः । यदि वधूवासः स्वयं निधत्ते तदैवं भवतीति वधूवासःसंस्पर्शनं निन्दायुक्तम् । 'भूत्वा' । इति स्थाने 'भूत्व्या' इति ऋक्पाठः (ऋ० १०।८५।२९) ।

नीललोहितं भवति कृत्यासक्तिर्व्य॒ज्यते ।।
एधन्ते अस्या ज्ञातयः पतिर्बन्धेषु बध्यते ।।२८।।

पदपाठः

नीलऽलोहितम् । भवति । कृत्या । आसक्तिः । वि । अज्यते । एधन्ते । अस्याः । ज्ञातयः । पतिः । बन्धेषु । बध्यते ।।२८।।

कृत्या अभिचाराभिमानिनी देवता **नीललोहितं भवति** । नीलं च लोहितं च तस्या रूपं भवतीत्यर्थः । सा कृत्या **आसक्तिः** आसक्तास्यां संबद्धा **व्यज्यते** । त्यज्यत इत्यर्थः । तस्यां कृत्यायामपगतायाम् **अस्याः** वध्वाः **ज्ञातयः एधन्ते** वर्धन्ते । **पतिः** च **बन्धेषु** सांसारिकेषु **बध्यते** । मन्त्रमिमं सायणो व्याचख्यौ (ऋ० १०।८५।२८) ।

अश्लीला तनूर्भवति रुशती पापयामुया ।
पतिर्यद् वध्वो॑३वाससः स्वमङ्गमभ्यूर्णु॑ते ।।२७।।

पदपाठः

अश्लीला । तनूः । भवति । रुशती । पापया । अमुया । पतिः । यत् । वध्वऽः । वाससः । स्वम् । अङ्गम् । अभिऽऊर्णुते ।।२७।।

अत्रापि वधूवासःसंस्पर्शनिन्दोच्यते । **तनूः** वरस्य सम्बन्धिनी देहयष्टिः **अश्लीला** श्रीरहिता भवति । कथं स्याच्चेदित्युच्यते । **रुशती** । रुशदिति वर्णनाम । दीप्तया **अमुया** अनया **पापया** पापरूपया कृत्यया युक्ता चेत्तनूः । तदेवाह । **पतिर्यत्** स्वामी यदि **वध्वो वाससः** वधूवस्त्रात् **स्वमङ्गं** स्वशरीरम् **अभ्यूर्णुते** आच्छादयति । स्वल्पेन पाठभेदेन ऋग्वेदे पठ्यतेऽयं मन्त्रः (ऋ० १०।८५।३०) ।

आशसनं विशसनमथो अधिविकर्तनम् ।
सूर्यायाः पश्य रूपाणि तानि ब्रह्मोत शुम्भति ।।२८।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आऽशसनम् । विऽशसनम् । अथो इति । अधिऽविकर्त्तनम् । सूर्यायाः । पश्य । रूपाणि । तानि । ब्रह्मा । उत । शुम्भति ॥२८॥

आशसनं तूषाधानम् । तच्चान्यवर्णं भवति । **विशसनं** शिरसि निधीयमानम् । तादृशं दशान्ते निधीयमानम् **अधिविकर्त्तनं** यत् त्रिधा वासो विकृन्तन्ति । तान्याशसनादीनि वासांस्यवस्थितानि **सूर्यायाः रूपाणि** भवन्ति । **तानि पश्य** । एवं भूतान्याशसनादीनि पुरा सूर्या स्वशरीरे स्थितान्यमङ्गलानि वासांसि विधत्ते । **उत** अथ, उत-अपि-अथशब्दाः वेदे समानार्थाः (**निरुक्तभाष्यम्** २।६) तानि रूपाणि सूर्यावित् **ब्रह्मा** ब्राह्मण एव तस्माद्वाससः सकाशात् पृथक्कृत्य **शुम्भति** दीपयति, शोभयति । अर्थात् सूर्यावित् ब्राह्मण एव तस्माद् वाससः सकाशात् तानि रूपाणि अपनयतीति । स्वल्पेन पाठभेदेन ऋग्वेदेऽपि प्राप्यतेऽयं मन्त्रः (ऋ० १०।८५।३५) ।

तृष्टमेतत् कटुकमपाष्ठवद् विषवन्नैतदत्तवे ।
सूर्यां यो ब्रह्मा वेद स इद् वाधूयमर्हति ॥२९॥

पदपाठः

तृष्टम् । एतत् । कटुकम् । अपाष्ठऽवत् । विषऽवत् । न । एतत् । अत्तवे । सूर्याम् । यः । ब्रह्मा । वेद । सः । इत् । वाधूऽयम् । अर्हति ॥२९॥

अनयापि वधूवस्त्रपरित्यागः प्रतिपाद्यते । **एतत्** वस्त्रं **तृष्टं** दाहजनकम् । तथैतत् **कटुकम्** अप्रियम् । तथा **अपाष्ठवत्** । अपाष्ठमपस्थितमृजीपम्, तद्वत् । तथा **विषवत्** । नैतद्वस्त्रम् **अत्तवे** अत्तव्यम् । अनुपयोग्यम् । **यो ब्रह्मा** ब्राह्मणः **सूर्याम्** इदानीं प्रस्तुतां देवीं **वेद** विद्यात् सम्यग् जानीयादित्यर्थः, **सः इत्** स एव **वाधूयं** वधूवस्त्रम् **अर्हति** । स्तोकेन पाठभेदेन लभ्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।८५।३४) ।

स इत् तत् स्योनं हरति ब्रह्मा वासः सुमङ्गलम् ।
प्रायश्चित्तिं यो अध्येति येन जाया न रिष्यति ॥३०॥

पदपाठः

सः । इत् । तत् । स्योनम् । हरति । ब्रह्मा । वासः । सुऽमङ्गलम् । प्रायश्चित्तिम् । यः । अधिऽएति । येन । जाया । न । रिष्यति ॥३०॥

स इत् स एव **ब्रह्मा** ब्राह्मणः 'ब्रह्मा परिवृढः श्रुततः' इति निरुक्तम् (१.३), यद्वा 'ब्रह्मा सर्वविद्यः' (निरु० १.३) **स्योनं** सुखकरं, **सुमङ्गलं** श्रेयोविधायि **तत्**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वासः तद्वस्त्रं **हरति** गृह्णाति **यः प्रायश्चित्तिः** पापनिवारणार्थं प्रायश्चित्यभिधाना ऋचः **अध्येति** पठति। प्राय-चित्तिपदयोः समासे **'पारस्करप्रभृतीनि च संज्ञायाम्'** (पा० ६।१।१५७) इति सूत्रेण सुट्। **येन** यासाम् ऋचां पाठेन **जाया** वधूः नवागता वधूः इत्यर्थः। **न रिष्यति** कष्टं **न** लभते इति तात्पर्यम्। रिष् हिंसायां (दि०) धातोर्लट्।

युवं भगं संभरतं समृद्धमृतं वदन्तावृतोद्येषु ।
ब्रह्मणस्पते पतिमस्यै रोचय चारु सम्भलो वदतु वाचमेताम् ।।३१।।

पदपाठः

युवम् । भगम् । सम् । भरतम् । सम्ऽऋद्धम् । ऋतम् । वदन्तौ । ऋतऽउद्येषु । ब्रह्मणः । पते । पतिम । अस्यै । रोचय । चारु । सम्ऽभलः । वदतु । वाचम् । एताम् ।।३१।।

हे नववधूवरौ ! **युवं** युवां कीदृशौ **ऋतोद्येषु** ऋतवद् वचप्। सत्यभाषणव्यवहारेषु, अर्थात् गृहकर्मसु **ऋतं** सत्यं **वदन्तौ** कथयन्तौ सदैव सत्यभाषणं कुर्वन्तौ इत्यर्थः। **भगम्** ऐश्वर्यम्। धननामसु (निघं० २।१०) पाठात् धनं वा। अथवा 'यज्ञो भगः' (श० ब्रा० ६।३।१।१९) यज्ञफलं कीदृशं **समृद्धं** प्रभूतवृद्धिसंवलितम्। **संभरतम्**। सम्यग् धारयतम्। **ब्रह्मणस्पते** हे यज्ञपते, यद्वा 'एष वै ब्रह्मणस्पतिर्य एष तपति' (श० ब्रा० १४।१।२।१५) हे सवितः ! 'ब्रह्मणः पाता वा पालयिता वेति' यास्कः (निरु० १०।१)। ब्रह्मन्-पतिपदयोः समासे षष्ठ्या अलुक्। विसर्जनीयस्य सत्वं च। **अस्यै** नवविवाहितायै कन्यायै **पतिं** भर्त्तारं **रोचय** प्रसादय। पत्यौ अस्याः प्रीतिः समुद्भवेत्तथा कुरु इत्यर्थः। यद्वा अस्याः कृते पतिं प्रसादय। **संभलः** सम्यक् भाषणकर्त्ता, भल परिभाषण-हिंसादानेषु (भ्वा०) धातोः अच्। यद्वा। सम्यक् निरीक्षकः। भल निरूपणे धातोः अच्। अथवा। रलयोर्डलयोरभेदत्वात् संभरः संभर्त्ता धारकः पतिः एतां नवविवाहितां पत्नीं प्रति **चारु वाचं** मधुरां वाणीं **वदतु** कथयतु।

इहेदसाथ न परो गमाथेमं गावः प्रजया वर्धयाथ ।
शुभं यतीरुस्रियाः सोमवर्चसो विश्वे देवाः क्रन्निह वो मनांसि ।।३२

पदपाठः

इह । इत् । असाथ । न । परः । गमाथ । इमम् । गावः । प्रऽजया । वर्धयाथ । शुभम् । यतीः । उस्रियाः । सोमऽवर्चसः । विश्वे । देवाः । क्रन् । इह । वः । मनांसि ।।३२।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

गावः हे धेनवः ! यद्वा 'इमे लोका गौः' (श०ब्रा० ६।५।२।१७) हे लोकाः ! यूयम् **इह इद्** अत्रैव **असाथ** भवत तिष्ठत इत्यर्थः। **परः** दूरं **न गमाथ** न गच्छत। लोडर्थे गम्लृगतौ (भ्वा०) धातोर्लेट्, दीर्घश्छान्दसः। **इमं** नवविवाहितं **प्रजया**। अपत्यनामसु पाठात् पुत्रपौत्रादिसन्तत्या। प्रपूर्वकात् जनी प्रादुर्भावे (दि०) धातोः 'उपसर्गे च संज्ञायाम्' (पा० सू० ३।२।९९) इत्यनेन डः प्रत्ययः। स्त्रियां टाप् च। **वर्धयाथ** वर्धयत। **शुभंयतीः** कल्याणं गच्छन्त्यः, **उस्रियाः** उस्रियेति गोनाम (निघं० २।११)। ऊर्ध्वं स्रवति गच्छति क्षीरदधिनवनीतक्रमेणेति उस्रा, उस्रैव उस्रिया, स्वार्थे घः पृषोदरादित्वात्। घस्येयः (पा० सू० ७।१।२), 'यस्येति च' (पा० सू० ६।४।१४८) इत्याकारलोपः। गावः। कीदृश्यः। **सोमवर्चसः** सोमवत् तेजस्विन्यः। तथा **विश्वे देवाः** समस्ताः द्योतमानाः इन्द्रादयो देवाः। इह लोके गृहस्थाश्रमे इत्यर्थः। **वः** युष्माकं वरवध्वोः इत्यर्थः। **मनांसि** हृदयानि, ऋन् कुर्वन्तु, संयोजयन्त्वित्यर्थः।

इमं गावः प्रजया संविशाथायं देवानां न मिनाति भागम्।
अस्मै वः पूषा मरुतश्च सर्वे अस्मै वो धाता सविता सुवाति ॥३३॥

पदपाठः

इमम्। गावः। प्रऽजया। सम्। विशाथ। अयम्। देवानाम्। न। मिनाति। भागम्। अस्मै। वः। पूषा। मरुतः। च। सर्वे। अस्मै। वः। धाता। सविता। सुवाति ॥३३॥

गावः हे धेनवः ! यद्वा हे लोकाः ! **इमं** नवोद्वाहं **प्रजया** सन्तत्या सह, यद्वा 'प्रजा वै विश्वज्योतिः' (श० ब्रा० ६।५।३।५) सर्वविधप्रकाशेन सह, **संविशाथ** सम्यक् प्रविशत। अर्थात् एतद्गेहे युष्माकं समागमनं नवोद्वाहितस्यास्य सन्तानवृद्धिकरं प्रकाशकरं वा भवेदिति। तथा **अयम्** एष जनः **देवानां** यज्ञभुजाम् इन्द्रादीनां **भागं** हविर्भागं, **न मिनाति** न नाशयेत्। मिनातिः वधकर्मेति निघण्टुः (२।१९) लिङर्थे लट् छान्दसः। अयं सदैव यज्ञं कुर्वाणस्तिष्ठेदिति भावः। **पूषा** 'इयं वै पृथिवी पूषा' (मैत्रा० २।५।५) पृथ्वी देवता। यद्वा सूर्यः, चकारः समुच्चयार्थः, **मरुतः** 'चत्वारिंशन्मरुतो देवाः' (जै० १।३४) चत्वारिंशत्संख्याकाः मरुतो देवाः, 'त्रिर्वै सप्त सप्त मरुतः' इति काठकसंहिता (३७।४) श्रुतेश्च। **सर्वे** एते सर्वे देवाः **वः** युष्मान् **अस्मै** नवोद्विवाहिताय प्रेरयेयुः। तथा **धाता** प्रजापतिर्धाता (श०ब्रा० ९।५।१।३८) प्रजापतिर्देवः **सविता** सर्वप्रेरकः सवितृदेवश्चापि **अस्मै** एतत्कृते **वः** युष्मान् **सुवाति** प्रेरयेत्।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनृक्षरा ऋजवः सन्तु पन्थानो येभिः सखायो यन्ति नो वरेयम् ।
सं भगेन समर्यम्णा सं धाता सृजतु वर्चसा ।।३४।।

पदपाठः

अनृक्षरा । ऋजवः । सन्तु । पन्थानः । येभिः । सखायः । यन्ति । नः । वरेऽयम् । सम् । भगेन । सम् । अर्यम्णा । सम । धाता । सृजतु । वर्चसा ।।३४।।

हे देवाः **पन्थानः** मार्गाः, **अनृक्षराः** ऋक्षरः कण्टक उच्यते । कण्टकरहिताः **ऋजवः** अकुटिलाश्च **सन्तु** । **येभिः** यैः पथिभिः **नः** अस्माकं **सखायः** वरप्रेषिताः, **वरेयं** वरैर्याचितव्यं पितरं प्रति **यन्ति** गच्छन्ति ते पन्थानः इति । किञ्च **धाता** प्रजापतिर्देवः **भगेन** भगदेवेन सह एकीभूय अस्मान् **वर्चसा** तेजसा **संसृजतु** संयोजयतु तथा स **अर्यम्णा** देवेन सम्मिल्य चास्मान् वर्चसा संयोजयतु । पाठभेदेनोपलभ्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।८५।२३) ।

यच्च वर्चो अक्षेषु सुरायां च यदाहितम् ।
यद् गोष्वश्विना वर्चस्तेनेमां वर्चसावतम् ।।३५।।

पदपाठः

यत् । च । वर्चः । अक्षेषु । सुरायाम् । च । आऽहितम् । यत् । गोषु । अश्विना । वर्चः । तेन । इमाम् । वर्चसा । अवतम् ।।३५।।

यत् वर्चः तेजः, **अक्षेषु** द्यूतक्रीडायाम् । चकारः समुच्चयार्थः । **यत्** तेजः, **सुरायां** मदिरापाने । ऐश्वर्ये-इत्यपि कश्चित् । **आहितं** संहितं वर्त्तते । **यत् च वर्चः** तेजः, **गोषु** धेनुषु । यद्वा 'इन्द्रियं वै वीर्यं गावः' (श०ब्रा० ५।४।३।१०) इन्द्रिय-सम्बन्धिपराक्रमे निहितं विद्यते । अर्थात् यद्धि चेतसः समाकर्षणं द्यूतक्रीडायां, सुरापाने, ऐन्द्रियसुखे च वर्त्तते **तेन वर्चसा** तेन तेजसा, मनसः समाकर्षणेनेत्यर्थः । **अश्विना** हे नासत्यौ देवौ, **इमां** नवोढ्वाहाम् **अवतम्** रक्षतम् । यद्वा । अवधातुः (भ्वा०) रक्षणकान्तिप्रीतिदीप्त्यादिष्वपि पठ्यते । तेन तेजसा इमां शोभयतम् ।

येन महानघ्न्या जघनमश्विना येन वा सुरा ।
येनाक्षा अभ्यषिच्यन्त तेनेमां वर्चसावतम् ।।३६।।

पदपाठः

येन । महाऽनघ्न्याः । जघनम् । अश्विना । येन । वा । सुरा । येन । अक्षाः । अभिऽअसिच्यन्त । तेन । इमाम् । वर्चसा । अवतम् ।।३६।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

येन वर्चसा तेजसा, समाकर्षणेन वा, **महानघ्न्याः** सर्वथा अहिंसनीयायाः, निर्दोषायाः इत्यर्थः । अस्याः वध्वाः **जघनं** कटयधोभागप्रदेशः। हनहिंसागत्योः (अ०) धातोः 'हन्तेः शरीरावयवे द्वे च' (उ० ५।३२) इत्यनेन अच् प्रत्ययः धातोर्द्वित्वञ्च । 'जघनं जङ्घन्यते' इति निरुक्तम् (९।२) अभ्यषिच्यते, अभिसंयुज्यते, इत्यर्थः। **येन** वा सुरा मदिरा, ऐश्वर्यं वा अभ्यषिच्यते। **येन** च तेजसा **अक्षाः** द्यूतक्रीडनकाः, व्यवहाराः वा **अभ्यषिच्यन्त**, अभिषिक्ता भवन्ति। **अश्विना** हे अश्विदेवौ, **तेन वर्चसा** तेजसा **इमां** नववधूम् **अवतम्**, शोभयतं रक्षतं वा।

यो अनिध्मो दीदयदप्स्व१न्तर्यं विप्रास ईडते अध्वरेषु ।
अपां नपान्मधुमतीरपो दा याभिरिन्द्रो वावृधे वीर्या॑वान् ॥३७॥

पदपाठः

यः । अनिध्मः । दीदयत् । अप्ऽसु । अन्तः । यम् । विप्रासः । ईडते । अध्वरेषु । अपाम् । नपात् । मधुऽमतीः । अपः । दाः । याभिः । इन्द्रः । ववृधे । वीर्यऽवान् ॥३७॥

उत्तरार्धस्य प्रत्यक्षकृतत्वादेकवाक्यतायै युष्मच्छब्देन समानार्थो भवच्छब्दः प्रथमार्धेऽध्याहार्यः । **यः** भवान् अपां नपात् **अप्स्वन्तः** अपां मध्ये मेघस्थाने **अनिध्मः** काष्ठवर्जितः सन् **दीदयत्** दीप्यते । **विप्रासः** मेधाविनः ऋत्विग्यजमानाः **अध्वरेषु** यागेषु **यं** भवन्तम् **ईडते** स्तुवन्ति । हे **अपांनपात्** स त्वं **मधुमतीः** मधुररसयुक्ताः **अपः** वृष्टिलक्षणाः, **दाः** अस्मभ्यं देहि । **याभिः** वसतीवर्यैकधनारूपाभिः सोमेन मिश्रिताभिः अद्भिः **इन्द्रः वीर्यवान्** शक्तिशाली सन् **ववृधे** वर्धते, ता अपो देहीति सम्बन्धः। 'वीर्यवान्' इत्यस्य स्थाने वीर्यायेति ऋक्पाठः (ऋ० १०।३०।४) ।

इदमहं रुशन्तं ग्राभं तनूदूषिमपोहामि ।
यो भद्रो रोचनस्तमुदचामि ॥३८॥

पदपाठः

इदम् । अहम् । रुशन्तम् । ग्राभम् । तनूऽदूषिम् । अप । ऊहामि । यः । भद्रः । रोचनः । तम् । उत् । अचामि ॥३८॥

अहं नवोढाहितो वरः, नवोढाहिता वधूर्वा, **रुशन्तं** हिंसन्तं रुश हिंसायां (तु०) धातोः शतृ । **तनूदूषिं** शरीरदूषकम् **इदम्** एतत् **ग्राभं** ग्राहम्, 'हृग्रहोर्भः'० इति वार्तिकेन भत्वम् । मलबन्धकग्राहिरोगादिकम्, अपव्यवहारजातमित्यपि कश्चित् । **अपोहामि** अपगमयामि । तथा **यः रोचनः** शोभनः, **भद्रः** कल्याणकारी व्यवहारः,

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तम्, शरीरसंवर्धकं स्वास्थ्यसञ्चयं वा **उदचामि** लभे, याचामि वा। अचुगतौ याचने च (भ्वा०) धातोर्लटि रूपम्।

आस्यै ब्राह्मणाः स्नपनीर्हरन्त्ववीरघ्नीरुदजन्त्वापः।
अर्यम्णो अग्निं पर्येतु पूषन् प्रतीक्षन्ते श्वशुरो देवरश्च ॥३९॥

पदपाठः

आ। अस्यै। ब्राह्मणाः। स्नपनीः। हरन्तु। अवीरऽघ्नीः। उत्। अजन्त। आपः। अर्यम्णः। अग्निम्। परि। एतु। पूषन्। प्रति। ईक्षन्ते। श्वशुरः। देवरः। च ॥३९॥

ब्राह्मणाः यज्ञकर्मसम्पादकाः ऋत्विजः, **अस्यै** नवोद्वाहायै, **स्नपनीः आपः** स्नानसामग्रीः आपः, **आहरन्तु** आनयन्तु। कीदृश्यः। **अवीरघ्नीः** न वीरघ्नीः, पुत्रपौत्रादिसन्ततिक्षेमकारिण्यः इत्यर्थः, याभिः पुत्रादीनां हानिर्न भवेत् तादृश्यः आपः ते ऋत्विजः **उदजन्तु** प्राप्नुवन्तु। एतदर्थंमानयन्तु इत्यर्थः। आपः प्रजाः इत्यपि कश्चित्। 'पुत्रो वै वीरः' इतिशतपथश्रुतिः (३।३।१।१२)। सा **अर्यम्णः** **'यज्ञो वै अर्यमा'** (तै०ब्रा० २।३।५।४) इति श्रुतेः यज्ञस्य अग्निं त्रेताग्निमित्यर्थः। **पर्येतु** परिक्रामतु। वैतानाग्निं सेवतामिति भावः। **पूषन्** हे सवितः, इमां **श्वशुरः** भर्तुः पिता, **देवरः** भर्तुः भ्राता च सर्वे एव कुटुम्बिनः **प्रतीक्षन्ते**, प्रतीक्षमाणाः तिष्ठन्ति। अर्यम्णः। अर्योपपदात् माङ्माने (दि०) धातोः 'श्वन्नुक्षन्पूषन्०' (उ० १।६५) इत्यनेन औणादिकः कनिन्प्रत्ययः।

शं ते हिरण्यं शमु सन्त्वापः शं मेथिर्भवतु शं युगस्य तर्द्म।
शं त आपः शतपवित्रा भवन्तु शमु पत्या तन्वं१सं स्पृशस्व ॥४०॥

पदपाठः

शम्। ते। हिरण्यम्। शम्। ऊं इति। सन्तु। आपः। शम्। मेथिः। भवतु। शम्। युगस्य। तर्द्म। शम्। ते। आपः। शतऽपवित्राः। भवन्तु। शम्। ऊं इति। पत्या। तन्वऽम्। सम्। स्पृशस्व ॥४०॥

हे नवविवाहिते! **ते** तुभ्यं, **हिरण्यं** तेजः 'तेजो वै हिरण्यम्' (तै० ब्रा० १।८।९।१) इति श्रुतेः। यद्वा हिरण्योपलक्षितम् ऐश्वर्यं, **शं** सुखकरं **भवतु**। **आपः** जलानि अपि **शं** सुखकराणि **सन्तु** भवन्तु। यद्वा। 'आपोऽन्नम्' (ऐ०ब्रा० ६।३०)। अन्नानि सुखप्रदानि सन्तु। उकारः समुच्चयार्थः। **मेथिः** पशुबन्धनाय नियतो यूप-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दण्ड: । मेथृ सङ्गमे (भ्वा०) धातोः इन् । यद्वा मेथृ मेधाहिंसनयोः (भ्वा०) धातोः इन् । मेथिः आक्रोशः इत्यपि कश्चित् । **शं भवतु**, श्रेयस्करो भवतु । **युगस्य** रथाङ्गदेशस्य **तर्द्म** छिद्रं, **शं** सुखकारि भवतु । तर्द्म, तर्द हिंसायां (भ्वा०) धातोर्मनिन् । यद्वा । युगस्य पतिपत्नीयुग्मस्य यत् किमपि कष्टकरं कर्म तदपि सुखकरमेव भूयात् । **शतपवित्राः** बहूदकाः नद्यः **आपः** जलानि, बहूदकानां नदीनां जलानीत्यर्थः, **ते** तुभ्यं **शं** सुखकराणि **भवन्तु** 'आपः पवित्रमुच्यन्ते, शतपवित्राः बहूदकाः' इति निरुक्तम् (५।२) । यद्वा शतपवित्राः इति अपां विशेषणम् । शतैः असंख्यातैः मन्त्रपाठैः पवित्रताङ्गताः आपः शं भवन्तु । उः समुच्चयार्थः । तथा हे नवोढाहे ! त्वं **पत्या** आत्मनो भर्त्रा सह **तन्वं** स्वकीयं शरीरं **संस्पृशस्व** सम्यग् योजय । तदपि संस्पर्शनं शं सुखकरं भूयात् ।

खे रथस्य खेनसः खे युगस्य शतक्रतो ।
अपालामिन्द्र त्रिष्पूत्वाकृणोः सूर्यत्वचम् ।। ४१ ।।

पदपाठः

खे । रथस्य । खे । अनसः । खे । युगस्य । शतक्रतो इति शतऽक्रतो ।
अपालाम् । इन्द्र । त्रिः । पूत्वा । अकृणोः । सूर्यऽत्वचम् ।। ४१ ।।

अनया अपालां सूर्यसदृशप्रभामकरोदित्याह । **शतक्रतो** हे शतसंख्याकयज्ञ ? बहुविधप्रज्ञ वा हे **इन्द्र** ! **रथस्य** स्वकीयस्य **खे** पृथुतरे छिद्रे तथा **अनसः** शकटस्य **खे** तदपेक्षयाल्पे छिद्रे **युगस्य खे** चाल्पतरे सूक्ष्मे छिद्रे रथशकटयुगानां छिद्रेषु त्वग्दोषपरिहाराय **त्रिः** त्रिवारं निष्कर्षणेन **पूत्वा** शोधयित्वा ततः **अपालाम्** एतन्नामिकाम् अत्रिसुतां ब्रह्मवादिनीं **सूर्यत्वचं** सूर्यसमानत्वचम् **अकृणोः** अकरोः । कल्याणतमरूपप्रभामकरोः इत्यर्थः । शाटचायनब्राह्मणे स्पष्टमभिहितः—" **तां खे रथस्यात्यबृहत्सा गोधाभवत्तां खेऽनसोऽत्यबृहत्सा संश्लिष्टकाभवत्तदेषाभ्यनूच्यते खे रथस्य खेऽनस इति । तस्यै ह यत्कल्याणतमं रूपाणां तद्रूपमास**" इति त्वग्दोषापनयनाय अक्षादिद्वारेष्वतिकर्षणमिति । यस्त्वग्दोषदूषितः सन्नेतत्सूक्तं पठति तस्य त्वग्दोषमपगमय्य सूर्यसदृशकान्तिमिन्द्रः करोतीति । स्वल्पेन पाठभेदेन ऋग्वेदे पठचतेऽयं मन्त्रः (ऋ० ८।९१।७) ।

आशासाना सौमनसं प्रजां सौभाग्यं रयिम् ।
पत्युरनुव्रता भूत्वा सं नह्यस्वामृताय कम् ।। ४२ ।।

पदपाठः

आऽशासाना । सौमनसम् । प्रऽजाम् । सौभाग्यम् । रयिम् । पत्युः ।
अनुऽव्रता । भूत्वा । सम् । नह्यस्व । अमृताय । कम् ।। ४२ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे सद्योविवाहिते ! त्वं **सौमनसं** प्रसन्नमनस्कत्वम्, **प्रजां** सन्ततिम्, **सौभाग्यं** सर्वाणि सौभाग्यानि ऐश्वर्याणि तथा **रयिं** धनम् **आशासाना** कामयमाना सती, **पत्युः** भर्त्तुः, **अनुव्रता** अनुकूलाचरणा **भूत्वा**, भर्त्तुरनुकूलमाचरणं कुर्वतीत्यर्थः। **कं** सुखपूर्वकम्, **अमृताय** अमृतत्वप्राप्त्यै, **संनह्यस्व** संनद्धा भव। यदि त्वं मनसः प्रसन्नतां, सन्ततिसुखं, सौभाग्यसुखं धनादिकञ्च वाञ्छसि तर्हि पत्युरनुकूलं वर्त्तस्व। अनेन त्वं **'यदमृतं तद् ब्रह्म'** (गो० ब्रा० १।३।४) इति श्रुतेः ब्रह्मसायुज्यं लप्स्यसे इत्यर्थः।

यथा सिन्धुर्नदीनां साम्राज्यं सुषुवे वृषा ।
एवा त्वं सम्राज्ञ्येधि पत्युरस्तं परेत्य ॥ ४३ ॥

पदपाठः

यथा । सिन्धुः । नदीनाम् । साम्ऽराज्यम् । सुसुवे । वृषा । एव । त्वम् । सम्ऽराज्ञी । एधि । पत्युः । अस्तम् । पराऽइत्य ॥ ४३ ॥

हे नवोद्वाहे ! **यथा सिन्धुः** स्यन्दनशीलः समुद्रः। कीदृशः। **वृषा** बलवान् वर्षिता वा, **नदीनां** सरितां **साम्राज्यं** सार्वभौमताम् आधिपत्यमित्यर्थः, **सुषुवे** प्राप। यद्वा यथा समुद्रो नदीनां कृते साम्राज्यं सुषुवे उत्पादयामास, **एवा** एवम्, **त्वं** नवविवाहिता वधूः, **पत्युः** भर्त्तुः, **अस्तं** गृहम्, **'अस्तमिति गृहनाम'** (निघं० ३।४)। **परेत्य** प्राप्य गत्वेत्यर्थः। **सम्राज्ञी** गृहेश्वरी सती **एधि** वर्धस्व, गृहस्वामिनी भवेत्यर्थः।

सम्राज्ञ्येधि श्वशुरेषु सम्राज्ञ्युत देवृषु ।
ननान्दुः सम्राज्ञ्येधि सम्राज्ञ्युत श्वश्र्वाः ॥ ४४ ॥

पदपाठः

सम्ऽराज्ञी । एधि । श्वशुरेषु । सम्ऽराज्ञी । उत । देवृषु । ननान्दुः । सम्ऽराज्ञी । एधि । सम्ऽराज्ञी । उत । श्वश्र्वाः ॥ ४४ ॥

हे नवविवाहिते ! त्वं **श्वशुरेषु** पूजनीयेषु पत्युः पितृजनेषु, **सम्राज्ञी** अधीश्वरी, **एधि** भव। **देवृषु** पत्युः कनिष्ठभ्रातृषु, **सम्राज्ञी** अधीश्वरी भव। **उत** अपि च **ननान्दुः** पत्युः भगिन्याः **सम्राज्ञी** अधीश्वरी भव। **उत** तथा **श्वश्र्वाः** पत्युर्मातुरपि **सम्राज्ञी** अधीश्वरी सती **एधि** वर्धस्व। अर्थात् त्वं स्वकीयेन शुभाचरणेन सर्वेषामेषां मनांसि आहर, येन सर्वेषु गृहजनेषु तवैव प्रभुता भवेदित्यर्थः। व्याख्यातोऽयं मन्त्रः सायणेन (ऋ० सं० १०।८५।४६) पाठभेदतः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

या अकृन्तन्नवयन् याश्च तत्निरे या देवीरन्ताँ अभितोददन्त ।
तास्त्वा जरसे सं व्ययन्त्वायुष्मतीदं परि धत्स्व वासः ।। ४५ ।।

पदपाठः

याः । अकृन्तन् । अवयन् । याः । च । तत्निरे । याः । देवीः । अन्तान् । अभितः । अददन्त । ताः । त्वा । जरसे । सम् । व्ययन्तु । आयुष्मती । इदम् । परि । धत्स्व । वासः ।। ४५ ।।

हे नवागते ! **याः** योषितः इदं वस्त्रसूत्रम्, **अकृन्तन्** वेष्टितवत्यः, कृतीवेष्टने (रु०) धातोः रूपम् । **याश्च** स्त्रियः तानि सूत्राणि वस्त्रनिर्माणार्थं **तत्निरे** व्यतन्वन्, वस्त्रसूत्राणि विस्तारितवत्यः इत्यर्थः । तथा **याः** स्त्रियः **अवयन्** । वेञ् तन्तुसन्ताने (भ्वा०) धातोः रूपम् । सूत्राणि ओतवत्यः । वस्त्ररूपेण सूत्राणि सम्पादयामासुः । **याः देवीः** याश्च द्योतमानाचरणाः स्त्रियः **अभितः** वस्त्रं परितः, **अन्तान्** परिधान-वसनान्तप्रदेशान्, **अददन्त** दत्तवत्यः । वस्त्रान्तभागेषु चित्रकलादिस्वरूपं स्थापितवत्यः इत्यर्थः । **ताः** कलावत्यो देव्यः, **त्वा** त्वां, **जरसे** वृद्धावस्थायै वृद्धावस्थापर्यन्तं जीवनायेत्यर्थः । **सं व्ययन्तु** अनेन नवीनवस्त्रेण त्वाम् आच्छादयन्तु । अतः **आयुष्मती** पूर्णमायुर्लभमाना त्वम् इदं **वासः** नूतनमेतत् परिधानं **परिधत्स्व** परिधारय ।

जीवं रुदन्ति वि नयन्त्यध्वरं दीर्घामनु प्रसितिं दीध्युर्नरः ।
वामं पितृभ्यो य इदं समीरिरे मयः पतिभ्यो जनये परिष्वजे।४६।

पदपाठः

जीवम् । रुदन्ति । वि । नयन्ति । अध्वरम् । दीर्घाम् । अनु । प्रऽसितिम् । दीध्युः । नरः । वामम् । पितृऽभ्यः । ये । इदम । सम्ऽईरिरे । मयः । पतिऽभ्यः । जनये । परिऽस्वजे ।।४६।।

ये नरः पतयः जायानां **जीवं** जीवनमुद्दिश्य **रुदन्ति** । रोदनेनापि जायानां जीवनमेवाशासत इत्यर्थः । **ताः** जायाः **अध्वरं** यज्ञं **विनयन्ति** निवेशयन्ति, किञ्च तासु **दीर्घां** महतीं **प्रसितिं** भुजयोः प्रबन्धनम् **अनुदीध्युः** अनुदधति । इदं **वामम्** एतद् वननीयमपत्यं **पितृभ्यः समीरिरे** संप्रेरयन्ति च । तेभ्यः **पतिभ्यः** ताः स्त्रियः, **जनये** सन्तानोत्पत्तये **परिष्वजे** परिष्वङ्गार्थं **मयः** सुखं कुर्वन्तीति शेषः । पाठभेदेन पठ्यतेऽयं मन्त्रः ऋग्वेदेऽपि (ऋ० १०।४०।१०) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्योनं ध्रुवं प्रजायै धारयामि तेऽश्मानं देव्याः पृथिव्या उपस्थे ।
तमा तिष्ठानुमाद्या सुवर्चा दीर्घं त आयुः सविता कृणोतु ।।४७।।

पदपाठः

स्योनम् । ध्रुवम् । प्रऽजायै । धारयामि । ते । अश्मानम् । देव्याः । पृथिव्याः । उपऽस्थे । तम् । आ । तिष्ठ । अनुऽमाद्या । सुऽवर्चाः । दीर्घम् । ते । आयुः । सविता । कृणोतु ।।४७।।

हे नवोढे ! अहं त्वदीयो भर्त्ता **ते** तव, **प्रजायै** सन्तानवृद्धचै, **देव्याः** द्योतनगुणवत्याः **पृथिव्याः** विस्तृतायाः भूमेः, **उपस्थे** क्रोडे, **अश्मानं** पाषाणं **धारयामि** स्थापयामि । कीदृशम् । **स्योनं** सुखकरं, **ध्रुवं** स्थिरञ्च । साम्प्रतं त्वं तं पाषाणम् **आतिष्ठ** आरोह । तथा **अनुमाद्या** आनन्दमनुभवितुं योग्या सती त्वं **सुवर्चाः** शोभना तेजस्विनी स्याः । **सविता** सर्वप्रेरको भगवान् सूर्यः **ते** तव **आयुः** जीवनं **दीर्घं** चिरप्रवृद्धं, **कृणोतु** करोतु । अश्मानम्, अशूङ् व्याप्तौ सङ्घाते च (स्वा०) धातोः बाहुलकात् मन् प्रत्ययः । अनुमाद्या, अनुपूर्वकात् मदी हर्षे (दि०) धातोर्ण्यत् । स्त्रियां टाप् ।

येनाग्निरस्या भूम्या हस्तं जग्राह दक्षिणम् ।
तेन गृह्णामि ते हस्तं मा व्यथिष्ठा मया सह प्रजया च धनेन च ।।

पदपाठः

येन । अग्निः । अस्याः । भूम्याः । हस्तम् । जग्राह । दक्षिणम् । तेन । गृह्णामि । ते । हस्तम् । मा । व्यथिष्ठाः । मया । सह । प्रऽजया । च । धनेन । च ।।४८।।

येन प्रजोत्पादनोद्देश्येन **अग्निः** अग्निदेवः **अस्याः** **भूम्याः** पृथिव्याः, **हस्तं जग्राह** पाणिं गृहीतवान्, तेनवोद्देश्येन अहं त्वद्भर्त्ता **ते** त्वदीयं **दक्षिणं** वामेतरं, यद्वा मदनुकूलवर्त्तिनं **हस्तं** पाणिं, **गृह्णामि** धारयामि अङ्गीकरोमि । तव पाणिं गृहीत्वा त्वां पत्नीत्वेन वृणोमीत्यर्थः । अग्नि पृथिव्या भर्त्तारं मन्यन्ते तैत्तिरीया अपि 'अग्ने पृथिवीपते' (तै०ब्रा० ३।११।४।१) इति श्रुतेः । पृथ्वीमिमाम् अग्नेः पत्नीं स्वीकुर्वन्ति अथर्वविदोऽपि । 'पृथिव्यग्नेः पत्नी' (गो० ब्रा० २।२।९) इति हि ब्राह्मणम् । हे नवोढे ! त्वं **मया सह** निवासं कुर्वती **प्रजया च** सन्तत्या च, **धनेन च** सम्पत्या च **मा व्यथिष्ठाः** । एतदभावे न कदापि कष्टं प्राप्नुयाः । यथा पृथ्वी अग्नेः सांनिध्य-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मुपलभ्य बहुविधै रत्नैः रत्नादिभिश्च परिपूर्णा सती न कदापि कष्टमनुभवति तथैव त्वमपि सदा मया सह सुखसंवासमनुभवन्ती प्रजया धनेन च परिपूर्णा सती सुखानि अनुभूयाः। दक्षिणम्। दक्षगतिहिंसनयोः (भ्वा०) धातोः 'द्रुदक्षिभ्यामिनन्' (उ० २।२१८) इति औणादिकः इनन्प्रत्ययः।

देवस्ते सविता हस्तं गृह्णातु सोमो राजा सुप्रजसं कृणोतु।
अग्निः सुभगां जातवेदाः पत्ये पत्नीं जरदष्टिं कृणोतु ॥४९॥

पदपाठः

देवः। ते। सविता। हस्तम्। गृह्णातु। सोमः। राजा। सुऽप्रजसम्। कृणोतु। अग्निः। सुऽभगाम्। जातऽवेदाः। पत्ये। पत्नीम्। जरत्ऽअष्टिम्। कृणोतु ॥४९॥

हे नवोढ़ा हे भार्ये ! **सविता** सर्वप्रेरकः सूर्यो देवः, **ते** तव **हस्तं** पाणिं **गृह्णातु** धारयतु। **सोमो राजा** च त्वां **सुप्रजसं** शोभनसन्ततिवतीं **कृणोतु** करोतु। **जातवेदाः** यो जातान् सर्वान् वेत्ति स जातवेदाः, सर्वज्ञः इत्यर्थः। **अग्निः** अग्निदेवः इमां मदीयां **पत्नीं** जायां, **पत्ये** स्वभर्तृकृते **सुभगां** शोभनसौभाग्यवतीं तथा **जरदष्टिं** प्राप्तवार्धक्यां च **कृणोतु** करोतु। जरदष्टिम्। जरत्, जृष वयोहानौ (दि०) धातोर्बाहुलकात् औणादिकः अतिः प्रत्ययः। अष्टिः, अशूङ् व्याप्तौ (स्वा०) धातोः बाहुलकात् तिः। तयोश्च समासः। जरदष्टिं स्तुतिप्रवृत्तिवतीं भोजनवतीं वेत्यपि कश्चित्। 'जरतेः स्तुतिकर्मणः' इति निरुक्तम् (१०।१)। जरदष्टि जरापर्यन्तजीवनस्य अष्टि-र्व्याप्तिर्यस्यासौ जरदष्टिस्तम्। यद्वा। जरतो जीर्यतोऽपि अष्टिः सर्वव्यापारविषया व्याप्तिर्यस्य तादृशं दीर्घायुषम्। 'जीर्यतेरतृन्' (पा० सू० ३।२।१०४) इति अतृन्, जरत्। व्यत्ययेन भावे कर्तृप्रत्ययः—इत्यन्यत्र (अथर्वसं० २।२८।५) सायणः।

गृह्णामि ते सौभगत्वाय हस्तं मया पत्या जरदष्टिर्यथासः।
भगो अर्यमा सविता पुरंधिर्मह्यं त्वादुर्गार्हपत्याय देवाः ॥५०॥

पदपाठः

गृह्णामि। ते। सौभगऽत्वाय। हस्तम्। मया। पत्या। जरत्ऽअष्टिः। यथा। असः। भगः। अर्यमा। सविता। पुरम्ऽधिः। मह्यम्। त्वा। अदुः। गार्हऽपत्याय। देवाः ॥५०॥

हे वधु ! **ते** तव **हस्तम्** अहं **गृह्णामि**, गृभ्णामीति ऋक्पाठः (ऋ० १।८५।३६) किमर्थम्। **सौभगत्वाय** सौभाग्याय। **मया पत्या** त्वं **यथा जरदष्टिः** प्राप्त-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वार्धक्या **असः** भवसि । **भगो अर्यमा सविता पुरंधिः** एते **देवाः त्वा** त्वां **मह्यम्** भर्त्रे **अदुः** दत्तवन्तः । किमर्थम् । **गार्हपत्याय** । यथाहं गृहपतिः स्यामिति ।

भगस्ते हस्तमग्रहीत् सविता हस्तमग्रहीत् ।

पत्नी त्वमसि धर्मणाहं गृहपतिस्तव ।।५१।।

पदपाठः

भगः । ते । हस्तम् । अग्रहीत् । सविता । हस्तम् । अग्रहीत् । पत्नी । त्वम् । असि । धर्मणा । अहम् । गृहऽपतिः । तव ।।५१।।

हे नवोढ्वाहे ! **ते** तव, **हस्तं** पाणिं **भगः** भगदेव एव **अग्रहीत्** अगृह्णात् । यद्वा । नाहं तव पाणिमगृह्णाम् अपितु स्वयम् ऐश्वर्येणैव तव पाणिर्गृहीतः । अर्थात् साम्प्रतं त्वम् ऐश्वर्यपरिग्रहीता अभूः । एवमेव ते **हस्तं सविता** सर्वप्रेरकः प्रेरणा-प्रदाता देवः **अग्रहीत्** । इदानीं त्वं मे **पत्नी** पालनीया भार्या **असि** भवसि । **अहं** च **तव** ते **धर्मणा** धर्मेण धारणात्मकेन कर्मणा वा **गृहपतिः** गृहस्वामी जातोऽस्मीति शेषः ।

ममेयमस्तु पोष्या मह्यं त्वादाद् बृहस्पतिः ।

मया पत्या प्रजावति सं जीव शरदः शतम् ।।५२।।

पदपाठः

मम । इयम् । अस्तु । पोष्यां । मह्यम् । त्वा । अदात् । बृहस्पतिः । मया । पत्या । प्रजाऽवति । सम् । जीव । शरदः । शतम् ।।५२।।

मम इयं नवविवाहिता वधूः **पोष्या** मत्पालनीया **अस्तु** भवतु । अहमेवास्याः पालकः पोषकश्च भवेयं नान्यः इत्यर्थः । अथ प्रत्यक्षम् । हे वधु ! **बृहस्पतिः** बृहतां पालको देवः **त्वा** त्वां **मह्यं** भर्त्रे **अदात्** दत्तवान् । ममास्मिन् विवाहकर्मणि बृह-स्पतिः साक्ष्यभूतोऽस्तीत्यर्थः । अतः **प्रजावति** हे भाविसन्ततिसुखवति भार्ये ! **मया पत्या** सह त्वं, **शरदः शतं** शतं वर्षाणि **संजीव** जीवनं धारय ।

त्वष्टा वासो व्य१दधाच्छुभे कं बृहस्पतेः प्रशिषा कवीनाम् ।

तेनेमां नारीं सविता भगश्च सूर्यामिव परिधत्तां प्रजया ।।५३।।

पदपाठः

त्वष्टा । वासः । वि । अदधात् । शुभे । कम् । बृहस्पतेः । प्रऽशिषा । कवीनाम् । तेन । इमाम् । नारीम् । सविता । भगः । च । सूर्याम्ऽइव । परि । धत्ताम् । प्रऽजया ।।५३।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

बृहस्पते: बृहतां पत्युः, बृहत्याः वाचो वा पत्युः 'वाग् वै बृहती तस्या एष पतिस्तस्माद् बृहस्पतिः' (श० ब्रा० १४।४।१।२२) इति श्रुतेः। तथा **कवीनां** क्रान्तदर्शिनां मुनीनाम्। यद्वा। 'असौ वा आदित्यः कविः' (श० ब्रा० ६।७।२।४) इति वचनात् द्वादशादित्यानां **प्रशिषा** आशिषा अनुमत्या वा, **त्वष्टा** त्वष्टृ-देवः 'त्वष्टा रूपाणि विकरोति' (तै० सं० २।४।६।१) इति श्रुतेः। **शुभे** विवाहशुभ-कर्मणि, **वासः** अस्याः वध्वाः परिधानवसनम्। कीदृशम्। **कं** सुखकरं यद्वा कमिति क्रियाविशेषणम्, **व्यदधात्** ससुखं सम्पादयामास। **तेन** वाससा **सविता** सर्वप्रेरकः सूर्यो **भगश्च** देवः **इमाम्** एनां नवपरिणीतां नारीं वधूं, **प्रजया** सन्तत्या **सूर्यामिव** सूर्यतनयां सूर्यामिव **परिधत्ताम्** परितः धारयताम्, आच्छादयताम्–इत्यर्थः। परि-पूर्वकात् डुधाञ् धारणपोषणयोः (जु०) धातोर्लोट्। प्रशिषा, प्रपूर्वकात् शासु अनुशिष्टौ (अदा०) धातोः क्विप्, इत्वञ्च।

इन्द्राग्नी द्यावापृथिवी मातरिश्वा मित्रावरुणा भगो अश्विनोभा।
बृहस्पतिर्मरुतो ब्रह्म सोम इमां नारीं प्रजया वर्धयन्तु ॥५४॥

पदपाठः

इन्द्राग्नी इति। द्यावापृथिवी इति। मातरिश्वा। मित्रावरुणा। भगः। अश्विना। उभा। बृहस्पतिः। मरुतः। ब्रह्म। सोमः। इमाम्। नारीम्। प्रऽजया। वर्धयन्तु ॥५४॥

इन्द्राग्नी एतौ युग्मदेवौ, **द्यावापृथिवी** इमे युग्मदेव्यौ, **मातरिश्वा** पवनः, **मित्रावरुणा** मित्रो वरुणश्चेमौ युग्मदेवौ, **भगः**, **उभा अश्विनौ** उभौ नासत्यौ, **बृहस्पतिः** बृहतां पालको देवः, **मरुतः** एकोनपञ्चाशत्संख्याकाः मरुतः, **ब्रह्म** प्रजापतिः, **सोमश्चैते** सर्वे **इमां** नवोद्वाहां **नारीं** वधूं **प्रजया** सन्ततिप्रदानेन **वर्धयन्तु** समुन्नयन्तु।

बृहस्पतिः प्रथमः सूर्यायाः शीर्षे केशाँ अकल्पयत्।
तेनेमामश्विना नारीं पत्ये सं शोभयामसि ॥५५॥

पदपाठः

बृहस्पतिः। प्रथमः। सूर्यायाः। शीर्षे। केशान्। अकल्पयत्। तेन। इमाम्। अश्विना। नारीम्। पत्ये। सम्। शोभयामसि ॥५५॥

प्रथमो बृहस्पतिः बृहतां लोकानां पालकः आद्यो देवो बृहस्पतिः। यद्वा प्रथमः सर्वप्रथमं बृहस्पतिः **सूर्यायाः** सूर्यतनयायाः **शीर्षे** मस्तके, **केशान्** शिरोरुहान् **अकल्पयत्**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यरचयत्, केशप्रसाधनं चकारेत्यर्थः। **तेन** तस्मादेव वयमपि **इमां नारीं** नवविवाहितामेतां वधूं, **अश्विना** हे नासत्यदेवौ, **पत्ये** पतिगृहं गन्तुं, पत्युर्विनोदाय वा **संशोभयामसि** सम्यग् भूषयामः।

इदं तद्रूपं यदवस्त योषा जायां जिज्ञासे मनसा चरन्तीम्।
तामन्वर्तिष्ये सखिभिर्नवग्वैः क इमान् विद्वान् वि चचर्त पाशान्॥५६

पदपाठः

इदम्। तत्। रूपम्। यत्। अवस्त। योषा। जायाम्। जिज्ञासे। मनसा। चरन्तीम्। ताम्। अनु। अर्तिष्ये। सखिऽभिः। नवऽग्वैः। कः। इमान्। विद्वान्। वि। चचर्त। पाशान्॥५६॥

इदं दृश्यमानम् एतत्, **तद्रूपं** तत्सौन्दर्यं तस्याः सौन्दर्यं वा वर्त्तते, **यद्** रूपं **योषा** इयम् उद्वाहिता भार्या **अवस्त** आच्छादितवती, अधारयत इत्यर्थः। वस आच्छादने (अदा०) धातोर्लङ्। यद्वा साम्प्रतं विवाहे धारयति। लिङ्व्यत्ययश्छान्दसः। अहमस्याः पतिः **मनसा** स्वकीयेन हृदयेन **चरन्तीं** विचरन्तीम्, स्वातन्त्र्येण भ्रमन्तीमित्यर्थः। **जायां** वधूम् एनां, **जिज्ञासे** ज्ञातुं वाञ्छामि यदस्याः भ्रमणं किमर्थमस्तीति। यद्वा। स्वकीयं पातिव्रत्यं चरन्तीम् आचरन्तीमेतां जायामहं मनसा मनोयोगेन ज्ञातुमिच्छामि। अहं नवग्वैः नवीनगतिमद्भिः, नवनीतगतिमद्भिर्वा, नवनीतं प्रति येषां मनसो गतिरिदमस्माकमिति ते नवग्वाः तैः। **'नवग्वाः नवगतयो नवगीतयो वा'** इति यास्कः (निरु० ११।२)। सत्रयागमनुतिष्ठन्तो ये अङ्गिरसो नवभिर्मासैः कर्म समाप्य गतास्ते नवग्वाः–इति याज्ञिका आमनन्ति। ईदृशैः **सखिभिः** मित्रभूतैर्जनैः, जनानां परामर्शैरित्यर्थः। **ताम्** एतां परिणीताम् **अनुअर्त्तिष्ये** अनुगमिष्यामि। अस्याः अनुगमनं करिष्ये इत्यर्थः। साम्प्रतं **कः** तादृशः कोऽस्ति **विद्वान्** सर्वज्ञो जनः यः आवयोः दम्पत्योः **इमान् पाशान्** एतान् विवाहबन्धनपाशान्, **विचचर्त** विच्छेत्तुं समर्थः इत्यर्थः। विचचर्त विपूर्वकचृतीहिंसाग्रन्थनयोः (तु०) धातोर्लिटि रूपम्। नवग्वैः नवशब्दे उपपदे गमेर्भावे क्विपि। 'गमः क्वौ' (पा० ६।४।४०) इत्युनुनासिकलोपे 'ऊङ् च गमादीनामिति वक्तव्यम्' इति वार्तिकेन ऊकारान्तादेशः। नवभिः गूः गमनं येषां ते नवग्वाः, तैः। अकारोपजनश्छान्दसः। यद्वा। नवोपपदे गम्लृगतौ (भ्वा०) धातोर्बाहुलकात् औणादिको ड्वप्रत्ययः। योषा युमिश्रणामिश्रणयोः (अदा०) धातोर्बाहुलकात् औणादिकः सः। ततः स्त्रियां टाप्।

अहं वि ष्यामि मयि रूपमस्या वेददित् पश्यन् मनसः कुलायम्।
न स्तेयमद्मि मनसोदमुच्ये स्वयं श्रथ्नानो वरुणस्य पाशान्॥५७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अहम् । वि । स्यामि । मयि । रूपम् । अस्याः । वेदत् । इत् । पश्यन् । मनसः । कुलायम् । न । स्तेयम् । अद्मि । मनसा । उत् । अमुच्ये । स्वयम् । श्रथ्नानः । वरुणस्य । पाशान् ।

अहम् अस्याः नवोढायाः भर्त्ता, **अस्याः रूपं** सौन्दर्यं, **मनसः** आत्मनश्चेतसः **कुलायं** वासस्थानम्, आधारस्थलमित्यर्थः । यद्वा मनसोऽत्र विभक्तिव्यत्ययः । मनसा अन्तःकरणेन, आत्मनः आधारं **वेदत्** जानानः, तथा **पश्यन्** ईक्षमाणः, **इत्** एव, **मयि** आत्मनि, **विष्यामि** निश्चयेन धारयामि । हृदयेनाहमस्याः सौन्दर्यमभिनन्दामीत्यर्थः । अहमिदानीमिमाम् उद्वाह्य **मनसा** चेतसा अपि **स्तेयं** चौर्यं **न अद्मि**, न भक्षयामि । अर्थान्नाहमिदानीं मनसाऽपि चौर्योपभोगादिकं करिष्यामीति । तथाहं **वरुणस्य** देवस्य, **'रात्री वरुणः'** (काठ० २२।६) इति श्रुतेः रात्र्याः वा **पाशान्** बन्धनानि विघ्नान् इत्यर्थः । **स्वयम्** आत्मनैव **श्रथ्नानः** शिथिलितान् कुर्वन् **उदमुच्ये** मुक्तोऽहं भवामि । यद्वा मुक्तोऽभवम् । मुच्लृ मोक्षणे (तु०) धातोर्लङ् । श्रथ्नानः । श्रथ दौर्बल्ये (चुरा०) धातोः शानच् । व्यत्ययेन श्ना ।

प्र त्वा मुञ्चामि वरुणस्य पाशाद् येन त्वाबध्नात् सविता सुशेवाः ।
उरुं लोकं सुगमत्र पन्थां कृणोमि तुभ्यं सहपत्न्यै वधु ॥५८॥

पदपाठः

प्र । त्वा । मुञ्चामि । वरुणस्य । पाशात् । येन । त्वा । अबध्नात् । सविता । सुऽशेवाः । उरुम् । लोकम् । सुऽगम् । अत्र । पन्थाम् । कृणोमि । तुभ्यम् । सहऽपत्न्यै । वधु ॥५८॥

जातं प्राणिनं सवित्रा प्रेरितो वरुण आत्मपाशैर्बध्नाति । तस्मात् **वरुणस्य पाशात्** हे वधु ! **त्वा** त्वां **प्रमुञ्चामि** । येन पाशेन **त्वा** त्वां **सविता** वरुणस्य प्रेरकः **सुशेवाः** सुसुखतमः शेवमिति सुखनाम (निघं. ३।६) **अबध्नात्**, त्वद्बन्धनं कृतवान् । वधु हे जाये ! **तुभ्यं सहपत्न्यै** सहधर्मिण्यै पत्या सह वर्त्तमानायै **अत्र** अस्मिन् गृहस्थाश्रमे पतिभवने वा **पन्थां** मार्गं तु **सुगं** सुगमं सुखेन गन्तव्यं **कृणोमि** करोमि तथा **लोकं** निवासस्थानं वासमद्मेत्यर्थः 'इमे वै लोकाः विश्वा सद्मानि' (श० ब्रा० ६।७।३।१०) इति श्रुतेः **उरुं** विस्तृतं करोमि । पाठभेदेन ऋग्वेदे पठ्यतेऽयं मन्त्रः (ऋ० १०।८५।२४) ।

उद्यच्छध्वमप रक्षो हनाथेमां नारीं सुकृते दधात ।
धाता विपश्चित् पतिमस्यै विवेद भगो राजा पुर एतु प्रजानन् ॥५९

1039

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

उत् । यच्छध्वम् । अप । रक्षः । हनाथ । इमाम् । नारीम् । सुऽकृते । दधात । धाता । विपःऽचित् । पतिम् । अस्यै । विवेद । भगः । राजा । पुरः । एतु । प्रऽजानन् ।।५९।।

विवाहावसरे समायातेषु विघ्नकारिषु पठचतेऽयं मन्त्रः । हे वरयात्रिणो वीराः! यूयम् **उद्यच्छध्वम्**, उद्यम्य हस्ते शस्त्रादीनि धारयत, उत्थापयत इत्यर्थः । उत्पूर्वकात् यमु उपरमे (भ्वा०) धातोः 'इषुगमियमां छः' (पा० ७।३।७७) इति शिति छादेशः । **रक्षः** । रहसि क्षणोतीति रक्षः । यद्वा । रक्षन्त्यस्मात् । रक्षपालने (भ्वा०) धातोः असुन् (उ० ४।१८९) । विनाशकारिणो दुष्टान् इत्यर्थः । **अपहनाथ** मारयत । हन् (अ०) धातोर्लेटि रूपम् । तान् दुष्टान् हत्वा च **इमाम्** आनीयमानामेनां **नारीं** नववधूं, **सुकृते** पुण्ये कर्मणि स्वपतिसेवायामेव **दधात** स्थापयत । अर्थात् लुण्टाकानेतान् हत्वा अस्याः पुण्यं पतिव्रतधर्मं रक्षतेति । यतो **विपश्चित्** विद्वान् सर्ववेत्तेत्यर्थः, **धाता** विधाता प्रजापतिः, **अस्यै** स्त्रियै एनं **पतिं** भर्त्तारं **विवेद** प्रापितवान् । साम्प्रतं **राजा** राजमानो **भगः** एतन्नामको देवः ऐश्वर्यसञ्चयो वा, **प्रजानन्** सर्वमिदं जानानः **पुरः एतु** अस्या अग्रे यातु । इयं वैभवशालिनी भवतु इत्यर्थः ।

भगस्ततक्ष चतुरः पादान् भगस्ततक्ष चत्वार्युष्पलानि ।
त्वष्टा पिपेश मध्यतोनु वर्ध्रान्त्सा नो अस्तु सुमङ्गली ।।६०।।

पदपाठः

भगः । ततक्ष । चतुरः । पादान् । भगः । ततक्ष । चत्वारि । उष्पलानि । त्वष्टा । पिपेश । मध्यतः । अनु । वर्ध्रान् । सा । नः । अस्तु । सुऽमङ्गली ।।६०।।

भगो देवः, अस्यै नवोढायै सौभाग्यपर्यङ्कस्य **चतुरः** चतुःसङ्ख्याकान् **पादान्** पादस्थानीयान् आधारदण्डान् **ततक्ष** अकरोत् । तक्षतिः करोतिकर्मा इति निरुक्तम् (४।३) । तथा अयमेव **भगः चत्वारि** चतुःसङ्ख्याकानि **उष्पलानि** हिंसनाद् रक्षणकर्मणि व्यापृतानि तिर्यगवस्थितानि शिरोदण्ड-पाददण्डकाष्ठानि । वर्णव्यत्ययेन उत्पलानीति कश्चिद् व्याचख्यौ । उष्पलानि उष दाहे (भ्वा०) धातोः क्विप् । पल रक्षणे गतौ च (भ्वा०) धातोश्च अच् । **ततक्ष** संस्कृतवान् सम्पादयामासेत्यर्थः । **त्वष्टा देवः** विश्वकर्मेति यं पौराणिकाः कथयन्ति सः, **मध्यतः** पर्यङ्कस्य मध्ये **वर्ध्रान्** पर्यङ्कनिर्माणार्थं वृद्धिमुपगतान् रज्जुगुणान् । वर्ध्रान् इत्यत्र वृद्ध वृद्धौ (भ्वा०) धातोः औणादिको रन्प्रत्ययः । **अनुपिपेश** यथास्थानं स्थापितवान् । पिशअवयवे

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

व्यवस्थायां च (तु०) धातोः लिट् । ईदृशी **सा** सौभाग्यशय्या **नः** अस्माकं सर्वेषां कुटुम्बिनां कृते **सुमङ्गली** मङ्गलविधायिनी **अस्तु** भवतु ।

सुकिंशुकं वहतुं विश्वरूपं हिरण्यवर्णं सुवृतं सुचक्रम् ।
आ रोह सूर्ये अमृतस्य लोकं स्योनं पतिभ्यो वहतुं कृणु त्वम्।।

पदपाठः

सुऽकिंशुकम् । वहतुम् । विश्वऽरूपम् । हिरण्यऽवर्णम् । सुऽवृतम् । सुऽचक्रम् । आ । रोह । सूर्ये । अमृतस्य । लोकम् । स्योनम् । पतिभ्यः । वहतुम् । कृणु । त्वम् ।।६१।।

सूर्ये ! हे सूर्यतनये, **त्वं सुकिंशुकं** सुन्दरकिंशुकपुष्पैः सुसज्जितम्, किंशुककाष्ठनिर्मितं वा । पुनः कीदृशम् । **विश्वरूपम्** अनेकरूपोपेतम् । **हिरण्यवर्णं** काञ्चनवर्णं सुवर्णालङ्कारैर्युक्तं वा हितं रमणीयवर्णं वा । **सुवृतं** सुष्ठुवर्त्तनं **सुचक्रं** शोभनचक्रोपेतं **वहतुं** रथम्, वहति धारयति सारथिम् इति वहतुः तम् । वह प्रापणे (भ्वा०) धातोः 'एधिवह्योश्च तुः' (उ० १।७७) इत्यनेन तुः । 'वहतुं वाहनम्' इति निरुक्तम् (१२।१) **आरोह** आरूढा भव । तथा **त्वं पतिभ्यः** भर्तृचरणेभ्यः, आदरार्थे बहुवचनम् । आत्मनः प्रापणं यद्वा वहतुम् आत्मनो वहनं विवाहमित्यर्थः । **कृणु** कुरु । कीदृशम् **अमृतस्य लोकम्**, अमृतं हिरण्यम् (निघं० १।२) । हिरण्याद्यश्वैर्यस्य स्थानभूतम् । यद्वा अमृततुल्यं प्रियस्थानम् । पुनर्विशिनष्टि । **स्योनं** सुखकरञ्च । स्वल्पेन पाठभेदेन पठ्यतेऽयं मन्त्रः ऋग्वेदऽपि (ऋ० १०।८५।२०)

अभ्रातृघ्नीं वरुणापशुघ्नीं बृहस्पते ।
इन्द्रापतिघ्नीं पुत्रिणीमास्मभ्यं सवितर्वह ।। ६२ ।।

पदपाठः

अभ्रातृऽघ्नीम् । वरुण । अपशुऽघ्नीम् । बृहस्पते । इन्द्र । अपतिऽघ्नीम् । पुत्रिणीम् । आ । अस्मभ्यम् । सवितः । वह ।।६२।।

वरुण, हे वरुणदेव त्वम् इमां नवोढां वधूम् **अस्मभ्यम्** अस्माकं सर्वेषां हिताय **अभ्रातृघ्नीं** सहोदरादिभ्रातृॠणाम् अघातिनीम् **आवह** सम्यक् कुरु । हे **बृहस्पते** त्वम् एताम् **अपशुघ्नीं** गोवृषभादिपशूनामपि अघातिनीं रक्षणकारिणीमित्यर्थः, **हे इन्द्र** त्वमिमाम् **अपतिघ्नीं** पत्युः अहन्त्रीम् आनन्दवर्धयित्रीम् इति भावः । तथा **सवितः !** हे सर्वप्रेरकसूर्य ! त्वमिमां **पुत्रिणीं** सन्ततिवतीम् आवहेति सर्वत्र योज्यम् । अथवा आवह, एतादृशीमेनां विधायात्र आनय । अर्थात् हे वरुणादयो देवाः ! युष्माकं

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

कृपया अस्याः भ्रातरो न नश्यन्तु, गृहपशुधनं न नश्येत् तथैषा भर्त्तुरानन्दकारिणी पुत्रवती च भवेदिति ।

मा हिंसिष्टं कुमार्यं१ स्थूणे देवकृते पथि ।
शालाया देव्या द्वारं स्योनं कृण्मो वधूपथम् ।।६३।।

पदपाठः

मा । हिंसिष्टम् । कुमार्यऽम् । स्थूणे इति । देवऽकृते इति । पथि । शालायाः । देव्याः । द्वारम् । स्योनम् । कृण्मः । वधूऽपथम् ।।६३।।

स्थूणे स्तम्भवद् दृढे हे द्यावापृथिव्यौ ! **देवकृते** देवैः संपादिते **पथि** पतिगृहमार्गे एतां **कुमार्यं** कौमार्यमुपगतां कुमारीं नववधूं **मा हिंसिष्टं** मा नाशयतम् । अर्थात् मार्गे एषा स्वल्पमपि कष्टं नानुभवेत् । **देव्याः** द्योतनशीलायाः वयं सर्वे परिजनाः शालायाः द्वारं निवासस्थानद्वारदेशं **वधूपथं** वधूगमनमार्गं च **स्योनं** सुखकरं **कृण्मः** कुर्मः ।

ब्रह्मापरं युज्यतां ब्रह्म पूर्वं ब्रह्मान्ततो मध्यतो ब्रह्म सर्वतः ।
अनाव्याधां देवपुरां प्रपद्य शिवा स्योना पतिलोके विराज ।।६४।।

पदपाठः

ब्रह्म । अपरम् । युज्यताम् । ब्रह्म । पूर्वम् । ब्रह्म । अन्ततः । मध्यतः । ब्रह्म । सर्वतः । अनाव्याधाम् । देवऽपुराम् । प्रऽपद्य । शिवा । स्योना । पतिऽलोके । वि । राज ।। ६४ ।।

पतिगृहं गन्तुं प्रवृत्तो हे कन्यके ! **ब्रह्म** सत्यं 'सत्यं ब्रह्म' इति श्रुतिः (श० ब्रा० १४।८।५।१) यद्वा विज्ञानं मनोबोधः 'विज्ञानं ब्रह्मेति व्यजानात्' (तै० आ० ६।५।१) इतिश्रुतेः । तव **अपरम्** अपरभागे **युज्यतां** भवतु । तदेव **ब्रह्म** सत्यं विज्ञानं वा **पूर्वं** तव पूर्वभागे भवतु । **ब्रह्मैव अन्ततः मध्यतश्च** भवतु । **ब्रह्मैव** च **सर्वतः** त्वाम् अभितो भवतु । त्वम् **अनाव्याधां** ताडनपीडाशून्याम् । व्यध ताडने (दिवा०) धातोर्घञ् । **देवपुरां** कुलदेवतापुरीं कुलदेवीमन्दिरमित्यर्थः । **प्रपद्य** प्राप्य तत्रगत्वेत्यर्थः । **शिवा** मङ्गलमयी, **स्योना** सुखमयी च भूत्वा **पतिलोके** भर्त्तुर्गेहे **विराज** विराजमाना भूयाः ।

इति प्रथमेऽनुवाके प्रथमं सूक्तम्

इति प्रथमोऽनुवाकः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्वितीयं सूक्तम्

पञ्चसप्तत्यृचस्यास्य सूक्तस्य सावित्री सूर्या ऋषिका । प्रथमादिनवर्चां द्वादशादिचतुर्विंशतेः, सप्तत्रिंश्याद्येकोनचत्वारिंशतश्चात्मा, दशम्या यक्ष्मनाशनम्, एकादश्या दम्पत्योः परिपन्थिनाशनम्, षट्त्रिंश्याश्च देवा देवताः । प्रथमादिचतसृणां सप्तम्यष्टमी–दशम्येकादशी–षोडशीनामेकविंश्यादितृचस्य सप्तविंश्यादिचतसृणां पञ्चचत्वारिंशी–षट्चत्वारिंश्योस्त्रिपञ्चाश्यादितृचद्वयस्य त्रिषष्ट्यादिपञ्चानां द्विसप्ततितमत्रिसप्ततितमयोश्चानुष्टुप्, पञ्चमी-षष्ठी-द्वादश्येकत्रिंशी–चत्वारिंशीनां जगती, नवम्यास्त्र्यवसाना षट्पदा विराडत्यष्टिः, त्रयोदशीचतुर्दश्योः सप्तदश्यादितृचस्यैकचत्वारिंशी-द्विचत्वारिंश्येकोनपञ्चाश्येकषष्टी — सप्ततितमाचतुःसप्ततितमा-पञ्चसप्ततितमानां [चतुर्विंशी-पञ्चविंशी-द्वात्रिंशी-चतुस्त्रिंशी-षट्त्रिंश्यष्टात्रिंशीनाञ्च] त्रिष्टुप्, पञ्चदश्येकपञ्चाश्योर्भुरिगनुष्टुप्, विंश्याः पुरस्ताद्बृहती, [षड्विंश्या विराडनुष्टुप्], त्रयस्त्रिंश्या विराडास्तारपङ्क्तिः, पञ्चत्रिंश्याः पुरोबृहती त्रिष्टुप्, सप्तत्रिंश्येकोनचत्वारिंश्योर्भुरिक् त्रिष्टुप्, त्रिचत्वारिंश्यास्त्रिष्टुब्गर्भा पङ्क्तिः, चतुश्चत्वारिंश्याः प्रस्तारपङ्क्तिः. [सप्तचत्वारिंश्याः पथ्याबृहती], अष्टचत्वारिंश्याः सतःपङ्क्तिः [पञ्चाश्या उपरिष्टाद्बृहती], द्विपञ्चाश्या विराट् परोष्णिक्, एकोनषष्टी-षष्टी-द्विषष्टीनां पथ्यापङ्क्तिः, [अष्टषष्ट्याः विराट् पुर उष्णिक्], एकोनसप्ततितमायास्त्र्यवसाना षट्पदातिशक्वरी, एकसप्ततितमायाश्च बृहती छन्दांसि ।

तुभ्यमग्रे पर्यवहन्त्सूर्यां वहतुना सह ।
स नः पतिभ्यो जायां दा अग्ने प्रजया सह ॥१॥

पदपाठः

तुभ्यम् । अग्रे । परि । अवहन् । सूर्याम् । वहतुना । सह । सः । नः । पतिऽभ्यः । जायाम् । दाः । अग्ने । प्रऽजया । सह ॥१॥

हे अग्ने ! गन्धर्वाः **तुभ्यमग्रे पर्यवहन्** । प्रायच्छन्नित्यर्थः । काम् । **सूर्याम्** । केन सह । **वहतुना सह** । त्वं च तां सूर्यां वहतुना सह सोमाय प्रायच्छः । तद्वदिदानीमपि हे **अग्ने** ! **सः** त्वं **नः पतिभ्यः** अस्मभ्यं **जायां प्रजया सह दाः** देहि । स्वल्पेन पाठभेदेन ऋग्वेदेऽपि पठ्यतेऽयं मन्त्रः (ऋ० १०।८५।३८) ।

पुनः पत्नीमग्निरदादायुषा सह वर्चसा ।
दीर्घायुरस्या यः पतिर्जीवाति शरदः शतम् ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

पुनः । पत्नीम् । अग्निः । अदात् । आयुषा । सह । वर्चसा । दीर्घऽआयुः । अस्याः । यः । पतिः । जीवाति । शरदः । शतम् ।।२।।

पुनः स्वगृहीतां **पत्नीम् अग्निः आयुषा सह वर्चसा** च सह **अदात्** प्रायच्छत् । **अस्याः** अग्निदत्तायाः **यः पतिः** पुमान् सः **दीर्घायुः** सन् **शरदः शतं** शतसंवत्सरं **जीवाति** जीव्यात् ।

सोमस्य जाया प्रथमं गन्धर्वस्तेऽपरः पतिः ।
तृतीयो अग्निष्टे पतिस्तुरीयस्ते मनुष्यजाः ।।३।।

पदपाठः

सोमस्य । जाया । प्रथमम् । गन्धर्वः । ते । अपरः । पतिः । तृतीयः । अग्निः । ते । पतिः । तुरीयः । ते । मनुष्यऽजाः ।।३।।

इयं वधूः **प्रथमं सोमस्य जाया** अस्तीति शेषः । अर्थात् जातां कन्यां सोमः प्रथमभावी सन् प्राप्तवान् । तदनन्तरं हे जाये ! **गन्धर्वः ते** तव **अपरः पतिः** । **अग्निः तृतीयः पतिः ते** तव । पश्चात् **मनुष्यजाः** पतिः **तुरीयः** चतुर्थः । मन्त्रस्यास्य पूर्वार्धः पाठभेदेन ऋक्संहितायां पठ्यते (ऋ० १०।८५।४०) ।

सोमो ददद् गन्धर्वाय गन्धर्वो ददग्नये ।
रयिं च पुत्रांश्चादादग्निर्मह्यमथो इमाम् ।।

पदपाठः

सोमः । ददत् । गन्धर्वाय । गन्धर्वः । ददत् । अग्नये । रयिम् । च । पुत्रान् । च । अदात् । अग्निः । मह्यम् । अथो इति । इमाम् ।।४।।

सोमः गन्धर्वाय प्रथमं **ददत्** प्रादात् । **गन्धर्वः अग्नये अदत्** प्रादात् । **अथो** अपि च **अग्निः इमां** कन्यां **रयिं** धनं **पुत्रांश्च** **मह्यम् अदात्** ।

आवामगन्त्सुमतिर्वाजिनीवसू न्यश्विना हृत्सु कामा अरंसत ।
अभूतं गोपा मिथुना शुभस्पती प्रिया अर्यम्णो दुर्याँ अशीमहि ।।५।।

पदपाठः

आ । वाम् । अगन् । सुऽमतिः । वाजिनीवसु इति वाजिनीऽवसू । नि । अश्विना । हृत्ऽसु । कामाः । अरंसत । अभूतम् । गोपा । मिथुना । शुभः । पती इति । प्रियाः । अर्यमाः । दुर्यान् । अशीमहि ।।५।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वाजिनीवसू हे अन्नधनपदार्थौं **शुभस्पती** उदकस्य स्वामिनौ हे **अश्विना** हे अश्विनौ, **मिथुना** मिथुनौ परस्परं सहितौ **वां** युवां **सुमतिः आ अगन्** आगच्छतु। **हृत्सु** अस्मदीयेषु हृदयेषु. **कामाः** अभिलाषाः **नि अरंसत** निःशेषेण रमन्ताम्, पूर्णा भवन्त्वित्यर्थः। 'अयंसत' इति ऋक्पाठः (ऋ० १०।४०।१२) किञ्च युवां **गोपा** मम गोपायितारौ **अभूतं** भवतम्। अपि च **प्रियाः** सत्यो वयम् **अर्यम्णः** पत्युः **दुर्यान्** गृहान् **अशीमहि** प्राप्नुयाम।

सा मन्दसाना मनसा शिवेन रयिं धेहि सर्ववीरं वचस्य१म्।
सुगं तीर्थं सुप्रपाणं शुभस्पती स्थाणुं पथिष्ठामप दुर्मतिं हतम् ॥६॥

पदपाठः

सा। मन्दसाना। मनसा। शिवेन। रयिम्। धेहि। सर्वऽवीरम्। वचस्य१म्। सुऽगम्। तीर्थम्। सुऽप्रपानम्। शुभः। पती इति। स्थाणुम्। पथिऽस्थानम्। अप। दुःऽमतिम्। हतम् ॥६॥

हे वधु! **सा मन्दसाना** प्रमोदयित्री सा त्वं **शिवेन मनसा** शिवतमेन चित्तेन **रयिं** धनं **धेहि** धारय। कीदृशम्। **सर्ववीरं** समस्तवीरपुत्रैरुपेतम्, तथा **वचस्यम्** प्रशंसनीयम्, **शुभस्पती**! हे उदकस्य स्वामिनौ आश्विनौ! युवां **सुगं** सुखेन गन्तव्यं, **सुप्रपाणं** शोभनजलोपेतं **तीर्थं** तरणस्थानं पवित्रकूपादिकम् अस्मभ्यं कुरुतमिति शेषः। किं च **पथिष्ठां** मार्गस्थम् **स्थाणुं** शुष्कवृक्षादिकं, **दुर्मतिं** दुष्टं जनं च **अपहतम्** दूरे कुरुतम्। पाठभेदतः प्राप्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।४०।१३)।

या ओषधयो या नद्यो३ यानि क्षेत्राणि या वना।
तास्त्वा वधु प्रजावतीं पत्ये रक्षन्तु रक्षसः ॥७॥

पदपाठः

याः। ओषधयः। याः। नद्य१ः। यानि। क्षेत्राणि। या। वना। ताः। त्वा। वधु। प्रजाऽवतीम्। पत्ये। रक्षन्तु। रक्षसः ॥७॥

वधु हे भार्ये! **याः ओषधयः**, व्रीहियवादिफलपाकान्ताः, **याः नद्यः** गङ्गाद्याः सरितः, **या वना** यानि वनानि, **यानि** च **क्षेत्राणि** व्रीहियवादीनामुद्भवस्थानानि सन्ति **ताः** तानि सर्वाणि **पत्ये** मह्यं त्वद्भर्त्रे, मां त्वद्भर्तारं प्रसादयितुम् उपकर्तुं वा इत्यर्थः। **त्वा** त्वां कीदृशीं **प्रजावतीं** सन्तानोत्पादनक्षमां, **रक्षसः** राक्षसगणात् **रक्षन्तु** पालयन्तु। वना वनानीति निरुक्तम् (४।१५)।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एमं पन्थामरुक्षाम सुगं स्वस्तिवाहनम् ।
यस्मिन् वीरो न रिष्यत्यन्येषां विन्दते वसु ॥८॥

पदपाठः

आ । इमम् । पन्थाम् । अरुक्षाम । सुऽगम् । स्वस्तिऽवाहनम् । यस्मिन् । वीरः । न । रिष्यति । अन्येषाम् । विन्दते । वसु ॥८॥

इमं विवाहानन्तरं प्राप्तं **सुगं** सुखेन गमनीयं सुगमम् इत्यर्थः । तथा **स्वस्तिवाहनं** स्वस्ति वाहनं यस्य तं **पन्थां** पन्थानम् **आरुक्षाम** । आरूढा भवाम । इमं सुखकरं कल्याणप्रापकञ्च गृहस्थाश्रमं प्राप्नुमः इति शेषः । **वीरः** वीर विक्रान्तौ (चु०) धातोः कर्त्तरि अच् । 'वीरयति अमित्रान् वेतेर्वा स्याद् गतिकर्मणो वीरयतेर्वा (नि० १।३) कर्मण्यपुरुषः **यस्मिन्** गृहस्थाश्रममार्गे परिचलन् **न रिष्यति** परैः न हिंस्यते । स दुःखं न लभते इत्यर्थः । प्रत्युत स **अन्येषां** परेषां **वसु** धनं **विन्दते** प्राप्नोति ।

इदं सु मे नरः शृणुत ययाशिषा दंपती वाममश्नुतः ।
ये गन्धर्वा अप्सरसश्च देवीरेषु वानस्पत्येषु येऽधि तस्थुः
स्योनास्ते अस्यै वध्वै भवन्तु मा हिंसिषुर्वहतुमुह्यमानम् ॥९॥

पदपाठः

इदम् । सु । मे । नरः । शृणुत । यया । आऽशिषा । दंपती इति दम्ऽपती । वामम् । अश्नुतः । ये । गन्धर्वाः । अप्सरसः । च । देवीः । एषु । वानस्पत्येषु । ये । अधि । तस्थुः । स्योनाः । ते । अस्यै । वध्वैऽ । भवन्तु । मा । हिंसिषुः । वहतुम् । उह्यमानम् ॥९॥

नरः हे लोकनायकाः ! **मे** मम **इदं** निवेदनमेतत्, **शृणुत** आकर्णयत । **यया आशिषा** भवतां येन आशीर्वादेन **दंपती** नवोद्वाहौ वधूवरौ **वामं** सुन्दरं वैभवम् **अश्नुतः** प्राप्नुतः, तथा भवद्भिः विधातव्यम् इति शेषः । **ये च गन्धर्वाः** गन्धर्वजातीयाः देवगणाः **चकारः** समुच्चयार्थः । **देवीः** द्योतमानाः **अप्सरसः** आदित्यरश्मयः, 'तस्य मरीचयोऽप्सरसः' (श० ब्रा० ९।४।१'८) इति श्रुतेः । अप्सरोजातीया देवस्त्रियो वा । तथा **ये** देवाः **एषु** एतेषु दृश्यमानेषु **वानस्पत्येषु** वनवृक्षादिषु **अधितस्थुः** निवसन्ति, **ते** सर्वे **अस्यै** नवविवाहितायै **स्योनाः** सुखदायिनो **भवन्तु** । किं च **उह्यमानं** नीयमानम् एतद् वरवधूयुगलं, कीदृशं **वहतुं** वहनसाधनभूतमपि **मा**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हिंसिषुः नैव नाशयन्तु। अथवा नीयमानं वहतुं कन्याप्रियार्थं दातव्यो गवादिपदार्थो वहतुः तं न नाशयन्तु।

ये वध्वऽश्चन्द्रं वहतुं यक्ष्मा यन्ति जनाँ अनु।

पुनस्तान् यज्ञिया देवा नयन्तु यत आगताः ॥१०॥

पदपाठः

ये। वध्वऽः। चन्द्रम्। वहतुम्। यक्ष्माः। यन्ति। जनान्। अनु। पुनः। तान्। यज्ञियाः। देवाः। नयन्तु। यतः। आऽगताः ॥१०॥

वध्वश्चन्द्रं हिरण्यरूपं **वहतुं**, तथा **जनान्** गृहिणो लोकान् **यक्ष्माः** व्याधयः **अनुयन्ति** प्राप्नुवन्ति। **तान् पुनः** नयन्तु प्रापयन्तु **यज्ञियाः** यज्ञार्हाः **देवा** इन्द्रादयः। **यत आगताः** यस्मात्तो यक्ष्मा आगतास्तत्र तान्नयन्तु। 'जनाँ अनु' इति स्थाने 'जनादनु' इति ऋक्पाठः (ऋ० । १०।८५।३१)।

मा विदन् परिपन्थिनो य आसीदन्ति दंपती।

सुगेन दुर्गमतीतामप द्रान्त्वरातयः ॥११॥

पदपाठः

मा। विदन्। परिऽपन्थिनः। ये। आसीदन्ति। दंपती इति दम्ऽपती। सुऽगेन। दुःऽगम्। अति। इताम्। अप। द्रान्तु। अरातयः ॥११॥

परिपन्थिनः पर्यवस्थातारः शत्रवः, **मा विदन्** मा प्रापयन्। ये परिपन्थिनः **दंपती आसीदन्ति** अभिगच्छन्ति। **सुगेन** सुगमेन मार्गेण 'सुगेभिः' इति ऋक्पाठः (१०।८५।३२)। **दुर्गं** दुःखेन गन्तुं शक्यं दुर्गमं देशम् **अतीताम्** अतिगच्छताम्। **अरातयः** अदातारः शत्रवः **अपद्रान्तु** अपगच्छन्तु।

सं काशयामि वहतुं ब्रह्मणा गृहैरघोरेण चक्षुषा मित्रियेण।

पर्याणद्धं विश्वरूपं यदस्ति स्योनं पतिभ्यः सविता तत् कृणोतु ॥

पदपाठः

सम्। काशयामि। वहतुम्। ब्रह्मणा। गृहैः। अघोरेण। चक्षुषा। मित्रियेण। परिऽआनद्धम्। विश्वऽरूपम्। यत्। अस्ति। स्योनम्। पतिऽभ्यः। सविता। तत्। कृणोतु ॥१२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अहम् **अघोरेण** सौम्येन तथा **मित्रियेण** मित्रभूतेन स्नेहसंवलितेनेत्यर्थः। **चक्षुषा** नेत्रेण दृष्ट्येति भावः, **ब्रह्मणा** 'सत्यं ब्रह्म' (श० ब्रा० १४।८।५।१) सत्येन च सत्यपूर्वकमित्यर्थः। **गृहैः** गृहजनैः सह, यद्वा गृहैरिति गृहजनान् विभक्ति-व्यत्ययश्छान्दसः। **वहतुं** वध्वा सह समानीतं पदार्थजातं यौतकमित्यर्थः, वधूं वा, **संकाशयामि** प्रदर्शयामि। **यत्** हि पदार्थजातं **पर्याणद्धं** परितः सुबद्धं विश्वरूपञ्च बहुविधं च विद्यते इति शेषः। **सविता** देवः, **तत्** सर्वं **पतिभ्यः** आदरार्थे बहुवचनम्। भर्त्रे, यद्वा पतिकुलजनेभ्यः **स्योनं** सुखकरं **कृणोतु** करोतु॥

शिवा नारीयमस्तमागन्निमं धाता लोकमस्यै दिदेश।

तामर्यमा भगो अश्विनोभा प्रजापतिः प्रजया वर्धयन्तु॥१३॥

पदपाठः

शिवा। नारी। इयम्। अस्तम्। आ। अगन्। इमम्। धाता। लोकम्। अस्यै। दिदेश। ताम्। अर्यमा। भगः। अश्विना। उभा। प्रजाऽपतिः। प्रऽजया। वर्धयन्तु॥ १३॥

इयम् एषा। **शिवा** मङ्गलविधायिनी, **नारी** विवाहिता योषित् **अस्तम्** अस्माकं गृहम् **आगन्** आगता अस्ति। **अस्यै** नवविवाहितायै, **धाता** प्रजापतिदेवः, **इमं लोकम्** इदमस्मद्गृहं **दिदेश** प्रदर्शितवान्, अदात् इत्यर्थः। **ताम्** इमां वधूम् **अर्यमा भगः** प्रजापतिः **उभा अश्विना** नासत्यौ चेमे सर्वे देवाः **प्रजया** सन्ततिसुखेन **वर्धयन्तु** समुन्नयन्तु। आगन् गम्लृगतौ (भ्वा०) धातोः 'बहुलं छन्दसि' (पा० सू० २.४.७३) इति शपो लुकि मलोपः।

आत्मन्वत्युर्वरा नारीयमागन् तस्यां नरो वपत बीजमस्याम्।

सा वः प्रजां जनयद् वक्षणाभ्यो बिभ्रती दुग्धमृषभस्य रेतः।१४।

पदपाठः

आत्मन्ऽवती। उर्वरा। नारी। इयम्। आ। अगन्। तस्याम्। नरः। वपत। बीजम्। अस्याम्। सा। वः। प्रऽजाम्। जनयत्। वक्षणाभ्यः। बिभ्रती। दुग्धम्। ऋषभस्य। रेतः॥ १४॥

इयम् एषा **नारी** नववधूः **आगन्** भर्तृगृहम् आगच्छत्। कीदृशी। **आत्मन्वती** आत्मिकशक्तिमती विचारशीलेत्यर्थः। पुनर्विशिष्यते। **उर्वरा** धान्योत्पादनयोग्य-भूमिसदृशी, साम्प्रतं **नरः** जननायकोऽस्याः पतिः पुरुषः, **तस्याम्** **अस्याम्** उर्वरायां

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जायायां **बीजं** वीर्यं **वपत**, वपतु। पुरुषव्यत्ययश्छान्दसः। अस्यां सन्तानोत्पत्तिं विदधातु इत्यर्थः। **सा** एषा वधूः, **वः** युष्मदर्थं, यद्वा वः युष्माकमेषा वधूः, **ऋषभस्य** श्रेष्ठपुरुषस्यास्य **दुग्धं** रेतः, पयःसदृशं वीर्यं **बिभ्रती** धारयन्ती **वक्षणाभ्यः**, वक्षणा इति नदीनाम (निघं० १।१३)। नद्याकाराभ्यः इतस्ततः प्रसरन्तीभ्यो नाडीभ्यः। उदरान्तःस्थगर्भाशयात् इत्यर्थः। वक्षःस्थलेभ्यः इत्यन्यः, कुक्षितः इत्यपरः। **प्रजां** सन्तर्ति **जनयेत्** उत्पादयेत्। ऋषभः। ऋषी गतौ (तु०) धातोः 'ऋषिवृषिभ्यां कित्' (उ० ३।१२३) इति सूत्रेण अभच् किच्च।

प्रति तिष्ठ विराडसि विष्णुरिवेह सरस्वति।
सिनीवालि प्र जायतां भगस्य सुमतावसत् ॥१५॥

पदपाठः

प्रति। तिष्ठ। विऽराट्। असि। विष्णुःऽइव। इह। सरस्वति। सिनीवालि। प्र। जायताम्। भगस्य। सुऽमतौ। असत् ॥१५॥

हे नवोढे! इह भर्तृगृहे त्वं **प्रतितिष्ठ**, प्रतिष्ठिता भव। स्थिररूपेणैवात्र गृहे वसेत्यर्थः। **विराड् असि**। त्वं पत्नी भवसि। 'विराट् पत्नी' (श० ब्रा० १४।६।११।३) इति श्रुतेः। यद्वा। 'इयं वाव विराट्' (कपिष्ठलकठसंहिता ४०।२) इति वचनात् त्वं पृथ्वीरूपा उर्वरा असि। **विष्णुः इव** तवायं भर्त्ता विष्णुरूपोऽस्ति। यद्वा विष्णुरिव व्यापकप्रभावोऽस्ति। **सरस्वति** हे कामदुघे! 'दुहे कामान् सरस्वति' (काठ० ३८।८) इति श्रुतेः। यद्वा हे विद्येश्वरि देवि! तथा हे **सिनीवालि**, हे सुहस्ते! 'सिनीवालि या सुपाणिः' (तै० सं० ३।३।११।५) इति श्रुतिः। यद्वा 'प्र सिनीवाली जनयति' (तै०सं० ३।३।११।५) इति श्रुत्यनुसारं हे जनयित्रि!, हे अमावास्ये इत्यपि कश्चित्। हे अन्नवति! इत्यपरः। **सिनीवाली** सिनमन्नं भवति, 'सिनाति (बध्नाति) भूतानि' इति निरुक्तम् (११।३)। एषा प्रजायताम्, सन्तानोत्पत्तिं करोतु। तथा **भगस्य** भगदेवस्य ऐश्वर्यस्य वा **सुमतौ** शोभनबुद्धौ **असत्** भवेत्।

उद् व ऊर्मिः शम्या हन्त्वापो योक्त्राणि मुञ्चत।
मादुष्कृतौ व्येऽनसावघ्न्यावशुनमारताम् ॥१६॥

पदपाठः

उत्। वः। ऊर्मिः। शम्याः। हन्तु। आपः। योक्त्राणि। मुञ्चत। मा। अदुःऽकृतौ। विऽएनसौ। अघ्न्यौ। अशुनम्। आ। अरताम् ॥१६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे नद्यः ! **वः** युष्माकम् **ऊर्मिः** तरङ्गः **शम्याः** युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः **उत्** ऊर्ध्वं यथा भवन्ति तथा **हन्तु** गच्छतु स तरङ्गो रज्जूनामधो गच्छत्वित्यभिप्रायः। तथा हे **आपः** यूयं **योक्त्राणि** ताः रज्जूः **मुञ्चत**। यथा न स्पृशन्ति तथा यान्त्वित्यभिप्रायः। **व्येनसौ** विगतपापे अत एव **अदुष्कृतौ** कल्याणकर्मकारिण्यौ **अघ्न्यौ** अघ्न्ये न केनापि तिरष्करणीये विपाट्छुतद्रयौ **अशुनं** शुनमिति सुखनामधेयम् (निघं० ३।६)। न शुनम् असुखं दुःखमित्यर्थः। **मा आरताम्** मा लभेताम्। 'ऋगतौ लुङ्'। ऊर्मिः। ऋगतौ (जु०) 'अर्तेरुच्च' इति मिप्रत्ययः। 'उः' इत्ययमादेशो धातोः। ऋच्छतीत्यूर्मिः। शम्याः। शमु उपशमे (दि०) धातोः 'पोरदुपधात्' इति यत्प्रत्ययः। योक्त्राणि। युजिर्योगे करणे 'दाम्नीशसयुयुज०' इत्यादिना ष्ट्रन्प्रत्ययः। स्वल्पेन पाठभेदेन प्राप्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० ३।३३।१३)।

अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमो गृहेभ्यः।
वीरसूर्देवृकामा सं त्वयैधिषीमहि सुमनस्यमाना ॥१७॥

पदपाठः

अघोरऽचक्षुः। अपतिऽघ्नी। स्योना। शग्मा। सुऽशेवा। सुऽयमा। गृहेभ्यः। वीरऽसूः। देवृऽकामा। सम्। त्वया। एधिषीमहि। सुऽमनस्यमाना ॥१७॥

हे वधु ! त्वम् **अघोरचक्षुः** क्रोधादभयङ्करचक्षुः भवेति शेषः। तथा **गृहेभ्यः** गृहजनेभ्यः **स्योना** सुखदात्री, **शग्मा** शग्म कर्मनाम (निघं० १।२) कर्मकुशला, **सुशेवा** सुखस्वरूपा, **अपतिघ्नी** भर्तुः अहिंसित्री, सुखयित्री इत्यर्थः, **गृहेभ्यः** गृहजनेभ्यः **सुयमा** सुनियमवती, **वीरसूः** वीरपुत्रप्रसविनी, **देवृकामा** देवृषु भर्तुः कनिष्ठभ्रातृषु स्नेहवती तथा **सुमनस्यमाना** सुप्रसन्नमनस्का भवेति शेषः। एवं हि वयं **त्वया** वध्वा सह **सम् एधिषीमहि** वृद्धिं लभेमहि। पाठभेदतः पठ्यते मन्त्रोऽयमृग्वेदे। (ऋ० १०।८५।४४)।

अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा सुवर्चाः।
प्रजावती वीरसूर्देवृकामा स्योनेममग्निं गार्हपत्यं सपर्य ॥१८॥

पदपाठः

अदेवृऽघ्नी। अपतिऽघ्नी। इह। एधि। शिवा। पशुऽभ्यः। सुऽयमा। सुऽवर्चाः। प्रजाऽवती। वीरऽसूः। देवृऽकामा। स्योना। इमम्। अग्निम्। गार्हऽपत्यम्। सपर्य ॥१८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे नवागते वधु ! त्वम् **अदेवृघ्नी** आत्मनो देवरस्य अहिंसित्री तमपीडयन्तीत्यर्थः, तथा **अपतिघ्नी** आत्मनो भर्त्रे अपि न कष्टं ददती, **इह** अस्मिन् गृहे **एधि** वर्धस्व । ससुखं निवसेत्यर्थः । त्वमत्र **पशुभ्यो** धेनुवृषभादिगृहपशुभ्यः **शिवा** हितकरी सती **सुयमा** गृहव्यवस्थायाः नियमनविधायिनी, इन्द्रियसंयमं वा विदधती, **गार्हपत्यम् इमम् अग्निं** यज्ञशालायां गार्हपत्याग्निम् एतं नित्यं **सपर्य** परिचर । कीदृशी त्वम् । **सुवर्चाः** इन्द्रियसंयमनात् शोभनतेजस्विनी, **प्रजावती** सन्ततिवती, पुनर्विशिष्यते । **वीरसूः** पुत्राणामेव प्रसवित्री, यद्वा वीरप्रसविनी तथा **देवृकामा** भर्तुः सहोदरेषु स्निह्यन्ती, न तैर्द्वेषभावनां विदधतीत्यर्थः । **स्योना च** सुखमयी चैवं भूत्वा सपर्येति पूर्वेणान्वयः । सपर्य । सपर् पूजायां कण्वादिधातोः रूपम् ।

उत्तिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः स्वाद् गृहात् ।
शून्यैषी निर्ऋते याजगन्थोत्तिष्ठाराते प्र पत मेह रंस्थाः ॥१९॥

पदपाठः

उत् । तिष्ठ । इतः । किम् । इच्छन्ती । इदम् । आ । अगाः । अहम् । त्वा । ईडे । अभिऽभूः । स्वात् । गृहात् । शून्यऽएषी । निःऽऋते । या । आऽजगन्थ । उत । तिष्ठ । अराते । प्र । पत । मा । इह । रंस्थाः ॥१९॥

प्रथमवारं गृहमार्जनं कुर्वती वधूः मन्त्रमिमं पठति । **निर्ऋते** 'घोरा वै निर्ऋतिः' (श० ब्रा० ७।२।१।१०) हे घोरे ! यद्वा 'पाप्मा वै निर्ऋतिः' (श० ब्रा० ७।२।१।१) हे पापस्वरूपे गृहधूलिके ! **इतः** अस्मद्गृहात्, **उत्तिष्ठ** उत्थाय अन्यत्र गच्छ । त्वम् **किम् इच्छन्ती** अस्माकं किम् अनिष्टं वाञ्छन्ती **इदं** मदीयं भवनम् **आ अगाः** समागच्छः । **अहं त्वा** त्वाम् **ईडे** स्तौमि । त्वं **स्वाद् गृहात्** ममात्मनो भवनात्, दूरं याहीति शेषः । **अहम् अभिभूः**, तवाभिभवकारिणी अस्मि । ईडे-इति निर्ऋतिविशेषणम् इत्यपि कश्चित् । ईडे इरे प्रेरयामीत्यपरः । **या** हि त्वं **शून्यैषी** शून्यतां निर्जनतां वाञ्छन्ती अत्र **आजगन्थ** आगतवती । साम्प्रतं हे **अराते** शत्रुभूते ! अदानशीले वा । 'अरातयः अदानकर्माणः अदानप्रज्ञा वा' इति निरु० (३।२) अभीष्टमर्थं प्रयच्छतो ये निवारयन्ति तेऽरातयः, न दातव्यमस्माभिरेभ्य इत्येवं येषां प्रज्ञाऽस्ति तेऽदानप्रज्ञाः । रादाने धातोः क्तिन्, नञ् समासश्च । **उत्तिष्ठ** उत्थिता भव । **प्रपत** च अस्मात् स्थानाद् उड्डीयान्यत्र गच्छ । **इह मा रंस्थाः**, अत्र नैवोपरम, न तिष्ठेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे नद्यः ! **वः** युष्माकम् **ऊर्मिः** तरङ्गः **शम्याः** युग्यकण्ठपार्श्वादिसंलग्ना रज्जवः **उत्** ऊर्ध्वं यथा भवन्ति तथा **हन्तु** गच्छतु स तरङ्गो रज्जूनामधो गच्छत्वित्यभिप्रायः । तथा हे **आपः** यूयं **योक्त्राणि** ताः रज्जूः **मुञ्चत** । यथा न स्पृशन्ति तथा यान्त्वित्यभिप्रायः । **व्येनसौ** विगतपापे अत एव **अदुष्कृतौ** कल्याणकर्मकारिण्यौ **अघ्न्यौ** अघ्न्ये न केनापि तिरष्करणीये विपाट्छुतद्र्यौ **अशुनं** शुनमिति सुखनामधेयम् (निघं० ३।६) । न शुनम् असुखं दुःखमित्यर्थः । **मा आरताम्** मा लभेताम् । 'ऋगतौ लुङ् । ऊर्मिः । ऋगतौ (जु०) 'अर्तेरुच्च' इति मिप्रत्ययः । 'उः' इत्ययमादेशो धातोः । ऋच्छतीत्यूर्मिः । शम्याः । शमु उपशमे (दि०) धातोः 'पोरदुपधात्' इति यत्प्रत्ययः । योक्त्राणि । युजिर्योगे करणे 'दाम्नीशसयुयुज०' इत्यादिना ष्ट्रन्प्रत्ययः । स्वल्पेन पाठभेदेन प्राप्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० ३।३३।१३) ।

अघोरचक्षुरपतिघ्नी स्योना शग्मा सुशेवा सुयमो गृहेभ्यः ।
वीरसूर्देवृकामा सं त्वयैधिषीमहि सुमनस्यमाना ।।१७।।

पदपाठः

अघोरऽचक्षुः । अपतिऽघ्नी । स्योना । शग्मा । सुऽशेवा । सुऽयमा । गृहेभ्यः । वीरऽसूः । देवृऽकामा । सम् । त्वया । एधिषीमहि । सुऽमनस्यमाना ।।१७।।

हे वधु ! त्वम् **अघोरचक्षुः** क्रोधादभयङ्करचक्षुः भवेति शेषः । तथा **गृहेभ्यः** गृहजनेभ्यः **स्योना** सुखदात्री, **शग्मा** शग्म कर्मनाम (निघं० १।२) कर्मकुशला, **सुशेवा** सुखस्वरूपा, **अपतिघ्नी** भर्तुः अहिंसित्री, सुखयित्री इत्यर्थः, **गृहेभ्यः** गृहजनेभ्यः **सुयमा** सुनियमवती, **वीरसूः** वीरपुत्रप्रसविनी, **देवृकामा** देवृषु भर्तुः कनिष्ठभ्रातृषु स्नेहवती तथा **सुमनस्यमाना** सुप्रसन्नमनस्का भवेति शेषः । एवं हि वयं **त्वया** वध्वा सह **सम् एधिषीमहि** वृद्धिं लभेमहि । पाठभेदतः पठ्यते मन्त्रोऽयमृग्वेदे ।
(ऋ० १०।८५।४४) ।

अदेवृघ्न्यपतिघ्नीहैधि शिवा पशुभ्यः सुयमा सुवर्चाः ।
प्रजावती वीरसूर्देवृकामा स्योनेममग्निं गार्हपत्यं सपर्य ।।१८।।

पदपाठः

अदेवृऽघ्नी । अपतिऽघ्नी । इह । एधि । शिवा । पशुऽभ्यः । सुऽयमा । सुऽवर्चाः । प्रजाऽवती । वीरऽसूः । देवृऽकामा । स्योना । इमम् । अग्निम् । गार्हऽपत्यम् । सपर्य ।।१८।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे नवागते वधु ! त्वम् **अदेवृघ्नी** आत्मनो देवरस्य अहिंसित्री तमपीडयन्तीत्यर्थः, तथा **अपतिघ्नी** आत्मनो भर्त्रे अपि न कष्टं ददती, **इह** अस्मिन् गृहे **एधि** वर्धस्व । ससुखं निवसेत्यर्थः । त्वमत्र **पशुभ्यो** धेनुवृषभादिगृहपशुभ्यः **शिवा** हितकरी सती **सुयमा** गृहव्यवस्थायाः नियमनविधायिनी, इन्द्रियसंयमं वा विदवती, **गार्हपत्यम् इमम् अग्निं** यज्ञशालायां गार्हपत्याग्निम् एतं नित्यं **सपर्य** परिचर । कीदृशी त्वम् । **सुवर्चाः** इन्द्रियसंयमनात् शोभनतेजस्विनी, **प्रजावती** सन्ततिवती, पुर्नविशिष्यते । **वीरसूः** पुत्राणामेव प्रसवित्री, यद्वा वीरप्रसविनी तथा **देवृकामा** भर्तुः सहोदरेषु स्निह्यन्ती, न तैर्द्वेषभावनां विदधतीत्यर्थः । **स्योना च** सुखमयी चैवं भूत्वा सपर्येति पूर्वेणान्वयः । सपर्य । सपर् पूजायां कण्वादिधातोः रूपम् ।

उत्तिष्ठेतः किमिच्छन्तीदमागा अहं त्वेडे अभिभूः स्वाद् गृहात् ।
शून्यैषी निर्ऋते याजगन्थोत्तिष्ठाराते प्र पत मेह रंस्थाः ॥१६॥

पदपाठः

उत् । तिष्ठ । इतः । किम् । इच्छन्ती । इदम् । आ । अगाः । अहम् । त्वा । ईडे । अभिऽभूः । स्वात् । गृहात् । शून्यऽएषी । निःऽऋते । या । आऽजगन्थ । उत । तिष्ठ । अराते । प्र । पत । मा । इह । रंस्थाः ॥१६॥

प्रथमवारं गृहमार्जनं कुर्वती वधूः मन्त्रमिमं पठति । **निर्ऋते** 'घोरा वै निर्ऋतिः' (श० ब्रा० ७।२।१।१०) हे घोरे ! यद्वा 'पाप्मा वै निर्ऋतिः' (श० ब्रा० ७।२।१।१) हे पापस्वरूपे गृहधूलिके ! **इतः** अस्मद्गृहात्, **उत्तिष्ठ** उत्थाय अन्यत्र गच्छ । त्वम् **किम् इच्छन्ती** अस्माकं किम् अनिष्टं वाञ्छन्ती इदं मदीयं भवनम् **आ अगाः** समागच्छः । **अहं त्वा** त्वाम् **ईडे** स्तौमि । त्वं **स्वाद् गृहात्** ममात्मनो भवनात्, दूरं याहीति शेषः । अहम् **अभिभूः**, तवाभिभवकारिणी अस्मि । ईडे-इति निर्ऋतिविशेषणम् इत्यपि कश्चित् । ईडे इरे प्रेरयामीत्यपरः । **या** हि त्वं **शून्यैषी** शून्यतां निर्जनतां वाञ्छन्ती अत्र **आजगन्थ** आगतवती । साम्प्रतं हे **अराते** शत्रुभूते ! अदानशीले वा । 'अरातयः अदानकर्माणः अदानप्रज्ञा वा' इति निरु० (३।२) अभीष्टमर्थं प्रयच्छतो ये निवारयन्ति तेऽरातयः, न दातव्यमस्माभिरेभ्य इत्येवं येषां प्रज्ञाऽस्ति तेऽदानप्रज्ञाः । रादाने धातोः क्तिन्, नञ् समासश्च । **उत्तिष्ठ** उत्थिता भव । **प्रपत** च अस्मात् स्थानाद् उड्डीयान्यत्र गच्छ । **इह मा रंस्थाः**, अत्र नैवोपरम, न तिष्ठेत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदा गार्हपत्यमसपर्यैत् पूर्वमग्निं वधूरियम् ।
अधा सरस्वत्यै नारि पितृभ्यश्च नमस्कुरु ॥२०॥

पदपाठः

यदा । गार्हऽपत्यम् । असपर्यैत् । पूर्वम् । अग्निम् । वधूः । इयम् । अध । सरस्वत्यै । नारि । पितृऽभ्यः । च । नमः । कुरु ॥२०॥

यदा अस्मिन् काले **इयम्** एषा **वधूः** नवोढा पत्नी **गार्हपत्यम्** अग्निं यज्ञस्य गार्हपत्याग्निं **पूर्वं** सर्वप्रथमम् **असपर्यैत्** पूजयेत् लकारव्यत्ययश्छान्दसः । अथ प्रत्यक्षम् **अध** तदनन्तरं **नारि** हे नरस्य भार्ये ! त्वं **सरस्वत्यै** सरस्वतीदेव्यै, **चकारः** समुच्चयार्थः, **पितृभ्यः** पितृदेवेभ्योऽपि **नमस्कुरु** प्रणमनमाचर । अर्थात् इह पतिगृहमुपेत्य त्वया यज्ञाग्नेः, सरस्वत्याः, पितॄणाञ्च सेवा करणीयेति ।

शर्म वर्मैतदा हरास्यै नार्या उपस्तिरे ।
सिनीवालि प्रजायतां भगस्य सुमतावसत् ॥२१॥

पदपाठः

शर्म । वर्म । एतत् । आ । हर । अस्यै । नार्यै । उपऽस्तिरे । सिनीवालि । प्र । जायताम् । भगस्य । सुऽमतौ । असत् ॥२१॥

अस्यै नवागतायै **नार्यै** स्त्रियै **उपस्तिरे** उपस्तरणार्थं यद्वा निवासार्थम् **एतत् शर्म** शर्मेति गृहनाम (निघं. ३।४) निवासस्थानम् । कीदृशम् । **वर्म**, वर्म इव रक्षकम् । **आहर** आनय उपस्थापयेत्यर्थः । उत्तरार्धो व्याख्यातः पूर्वम् (अथर्व० १४।२।१५)

यं बल्बजं न्यस्यथ चर्म चोपस्तृणीथन ।
तदा रोहतु सुप्रजा या कन्या विन्दते पतिम् ॥२२॥

पदपाठः

यम् । बल्बजम् । निऽअस्यथ । चर्म । च । उपऽस्तृणीथन । तत् । आ । रोहतु । सुऽप्रजाः । या । कन्या । विन्दते । पतिम् ॥२२॥

यं बल्बजं यद् बल्वजतृणास्तरणं कुशास्तरणमित्यपि कश्चित्, **न्यस्यथ** निक्षिपथ, **चर्म च** चर्मास्तरणं च **उपस्तृणीथन** आच्छादयत । स्तृञ् आच्छादने (स्वा०) धातोः रूपम् । **तद्** आस्तरणमुपस्तरणं च सा **सुप्रजा** सन्तानोत्पादन-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

क्षमा **कन्या** इयं कुमारी **आरोहतु** आरूढा भवतु । **या पतिम्** आत्मनो भर्त्तारं **विन्दते** प्राप्तवती । "पुं भूमनि तु वल्वजा:' इत्यमरः (२।४।१६२)। वल्वजा: तृणविशेषाः इत्यर्थः 'एको वल्वजः' (पा० सू० १।२।४५) इति सूत्रे भाष्यकारवचनादेकत्वेऽपि । वकारस्थाने बकारश्छान्दसः ।

उपस्तृणीहि बल्बजमधि चर्मणि रोहिते ।

तत्रोपविश्य सुप्रजा इममग्निं सपर्यतु ॥२३॥

पदपाठः

उप । स्तृणीहि । बल्बजम् । अधि । चर्मणि । रोहिते । तत्र । उपऽविश्य । सुऽप्रजाः । इमम् । अग्निम् । सपर्यतु ॥२३॥

रोहिते रक्तवर्णे **चर्मणि** अधि चर्मास्तरणे **बल्बजं** तृणासनम् **उपस्तृणीहि** विस्तारय चर्मास्तरणं, तृणासनेन आच्छादयेत्यर्थः । **तत्र** आस्तरणे **उपविश्य** स्थित्वा **सुप्रजाः** शोभनसन्तानजनयित्री इयं वधूः **इमम् अग्निं** गार्हपत्याग्निं **सपर्यतु** सेवताम् । सुप्रजाः अत्र विभक्तिव्यत्ययश्छान्दसः ।

आ रोह चर्मोप सीदाग्निमेष देवो हन्ति रक्षांसि सर्वा ।

इह प्रजां जनय पत्ये अस्मै सुज्यैष्ठ्यो भवत् पुत्रस्त एषः ॥२४॥

पदपाठः

आ । रोह । चर्म । उप । सीद । अग्निम् । एषः । देवः । हन्ति । रक्षांसि । सर्वा । इह । प्रऽजाम् । जनय । पत्ये । अस्मै । सुऽज्यैष्ठचः । भवत् । पुत्रः । एषः ॥ २४ ॥

हे वधु ! **चर्म** अजिनम् । **'अजिनं चर्म कृत्तिः स्त्री'** इत्यमरः (२।७।४६), अस्मिन् अजिनोपरि **आरोह** आरूढा भव । अजिने स्थित्वा च **अग्निं** गार्हपत्याग्निम् **उपसीद** परिचर । यद्वा अजिनमारुह्य गार्हपत्याग्निसमीपे तिष्ठ । **एषः** प्रत्यक्षं दृश्यमानो **देवः** द्योतमानः अग्निः **सर्वा** समस्तानि **रक्षांसि** राक्षसकुलानि **हन्ति** हिनस्ति । त्वम् **इह** पतिगृहे **अस्मै** पत्ये एतत्पत्युर्हिताय, इमं भर्त्तारं प्रसादयितुं वा **प्रजां** सन्तर्ति **जनय** उत्पादय । ते तव **एष** जनिष्यमाणः **पुत्रः** तनयः **सुज्यैष्ठ्यः** शोभनज्येष्ठगुणैर्युक्तः, शोभनेन आयुषा वा ज्येष्ठः **भवत्** भवेत् ।

वितिष्ठन्तां मातुरस्या उपस्थान्नानारूपाः पशवो जायमानाः ।

सुमङ्गल्युप सीदेममग्निं संपत्नी प्रति भूषेह देवान् ॥२५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

वि । तिष्ठन्ताम् । मातुः । अस्याः । उपऽस्थात् । नानाऽरूपाः । पशवः । जायमानाः । सुऽमङ्गली । उप । सीद । इमम् । अग्निम् । सम्ऽपत्नी । प्रति । भूष । इह । देवान् ।।२५।।

अस्याः वध्वाः **मातुः** मातुर्भावः, मातृत्वमित्यर्थः । **उपस्थात्** उपतिष्ठताम् । उपपूर्वकात् ष्ठा गतिनिवृत्तौ (भ्वा०) धातोश्छन्दसि लोडर्थे लुङ् । अडभावश्छान्दसः । एषा वधूः सन्ततिमुत्पाद्य मातृत्वं लभतामित्यर्थः । यद्वा, पृथ्वीरूपायाः **मातुः उपस्थात्** क्रोडात् **जायमानाः** उत्पद्यमानाः **नानारूपाः** विभिन्नस्वरूपाः **पशवः** 'पुरुषाश्वगवाव्यजाः' इति पञ्च पशवः, तद्रूपाः **वितिष्ठन्ताम्** विशेषेण तिष्ठन्तु । अथवा इतस्ततो भ्रमन्तो विस्तीर्णा भवन्तु । यद्वा, यथा भूमिरूपायाः मातुः क्रोडात् अनेकरूपाः पशवः उत्पद्यन्ते तथा अस्याः अपि क्रोडात् सन्ततयो जायन्ताम् । हे वधु ! **सुमङ्गली** शोभनश्रेयोवती त्वम् **इममग्निं** यज्ञाग्निम् **उपसीद** सेवस्व तथा **संपत्नी** पतिसहिता सती इह गृहे **देवान्** इन्द्रादियज्ञभुजो देवान् **प्रतिभूष** पुरोडाशादिप्रदानेन भूषय, तान् प्रीणीहीत्यर्थः ।

सुमङ्गली प्रतरणी गृहाणां सुशेवा पत्ये श्वशुराय शंभूः ।
स्योना श्वश्र्वै प्र गृहान् विशेमान् ।।२६।।

पदपाठः

सुऽमङ्गली । प्रऽतरणी । गृहाणाम् । सुऽशेवा । पत्ये । श्वशुराय । शम्ऽभूः । स्योना । श्वश्र्वै । प्र । गृहान् । विश । इमान् ।।२६।।

अनेन नववधूं भर्तृगृहं प्रवेशयति । हे नवोद्वाहे वधु ! **सुमङ्गली** सुन्दरमङ्गलविधायिनी शुभशकुनवतीत्यर्थः, त्वं **गृहाणां** गृहजनानां कुटुम्बिनां कृते **प्रतरणी** प्रतरन्ति गृहिणः यया सा । गृहजनोद्धारिणीत्यर्थः । प्रपूर्वकात् तॄ प्लवनसंतरणयोः (भ्वा०) ल्युडन्तात् ङीप् । **पत्ये सुशेवा** । शेवमिति सुखनाम । भर्त्तुः कृते शोभनसुखा, सुन्दरसुखदायिनीत्यर्थः । **श्वशुराय** च भर्तुः पितुः कृते **शंभूः** शान्तिदायिनी तथा **श्वश्र्वै** पत्युः मातृकृते **स्योना** सुखप्रदा भूत्वा **इमान् गृहान्** इदं भर्तृभवनं **प्रविश**, अत्र प्रविष्टा भव ।

स्योना भव श्वशुरेभ्यः स्योना पत्ये गृहेभ्यः ।
स्योनास्यै सर्वस्यै विशे स्योना पुष्टायैषां भव ।।२७।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

स्योना । भव । श्वशुरेभ्यः । स्योना । पत्ये । गृहेभ्यः । स्योना । अस्यै । सर्वस्यै । विशे । स्योना । पुष्टाय । एषाम् । भव ।।२७।।

हे नवोढे ! त्वं **श्वशुरेभ्यः** भर्त्तुः पितृ-पितृव्यादिभ्यो वृद्धजनेभ्यः **स्योना** सुखकरी **भव** स्याः । **पत्ये** स्वामिने तथा **गृहेभ्यः** अन्यगृहजनेभ्योऽपि **स्योना भव** सुखदायिनी भूयाः । **अस्यै सर्वस्यै विशे** अस्मै सर्वस्मै प्रजाजनाय अपि **स्योना** सुखप्रदा भव । किमन्यत्, **एषां** सर्वेषामेव **पुष्टाय** पोषणाय सुखाय त्वं **स्योना** सुखविधायिनी **भव** ।

सुमङ्गलीरियं वधूरिमां समेत पश्यत ।
सौभाग्यमस्यै दत्वा दौर्भाग्यैर्विपरेतन ।।२८।।

पदपाठः

सुऽमङ्गलीः । इयम् । वधूः । इमाम् । समऽएत । पश्यत । सौभाग्यम् । अस्यै । दत्वा । दौःऽभाग्यैः । विऽपरेतन ।।२८।।

इयं वधूः एषा नवोद्वाहा **सुमङ्गलीः** शोभनमङ्गला अस्तीति शेषः । अतः **इमां** वधूं सर्वे आशीःकर्त्तारो यूयं **समेत** सङ्गच्छत, तां **पश्यत** समवलोकयत च । सङ्गताश्च तां दृष्ट्वा **अस्यै** ऊढायै **सौभाग्यं दत्वा**, अर्थात् सौभाग्यवर्धकेन आशीर्वादेन इमाम् अनुगृह्य, **दौर्भाग्यैः** दौर्भाग्यसूचकैरात्मविचारैः **विपरेतन** विरहिताः सन्तः स्वगृहान् प्रतिगच्छन्तु । पाठभेदेन प्राप्यतेऽयं मन्त्रः ऋग्वेदेऽपि (ऋ० १०।८५।३३) ।

या दुर्हार्दो युवतयो याश्चेह जरतीरपि ।
वर्चोन्व१स्यै सं दत्ताथास्तं विपरेतन ।।२९।।

पदपाठः

याः । दुःऽहार्दः । युवतयः । याः । च । इह । जरतीः । अपि । वर्चः । नु । अस्यै । सम् । दत्त । अथ । अस्तम् । विऽपरेतन ।।२९।।

इह अत्र अस्याः वध्वाः पितृकुले **याः युवतयः** तरुण्यः भ्रातृजायाः भगिन्यश्चेत्याद्याः, **याः च जरतीः** वृद्धाः अन्यस्त्रियः **दुर्हार्दः** अस्याः विरहेण दुःखितहृदयाः सन्ति ताः अपि सर्वा **नु** निश्चयेन क्षिप्रं वा **अस्यै** नवोद्वाहायै **वर्चः** हिरण्यनामसु पाठात् हिरण्याभूषणानि, यद्वा 'वर्चोऽन्नम्' (निघं० २।७) मधुराणि खाद्यान्नानि, **अथवा** आशीर्वादात्मकं तेजः **संदत्त** सम्यक् प्रयच्छन्तु । वर्चः वर्चदीप्तौ (भ्वा०) धातोः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

औणादिकः असुन् प्रत्ययः । **अथ** आभूषणादिप्रदानानन्तरं ताः स्त्रियः स्वकीयम् **अस्तं** गृहं **विपरेतन** विविधं परागच्छन्तु प्रतिगच्छन्तु इत्यर्थः । युवतयः जरतीः शब्द-द्वयमिदं कश्चित् सम्बोधनत्वेन व्याचख्यौ ।

रुक्मप्रस्तरणं वह्यं विश्वा रूपाणि बिभ्रतम् ।

आरोहत् सूर्या सावित्री बृहते सौभगाय कम् ॥३०॥

पदपाठः

रुक्मऽप्रस्तरणम् । वह्यम् । विश्वा । रूपाणि । बिभ्रतम् । आ । अरोहत् । सूर्या । सावित्री । बृहते । सौभगाय । कम् ॥३०॥

रथारोहणं कुर्वत्यां कुमार्यां पठ्यतेऽयं मन्त्रः (कौ० ७७।१) । **रुक्मप्रस्तरणं** रुक्मवत् सुवर्णवत् रोचमानास्तरणयुक्तम्, पुनः कीदृशम् । **विश्वा रूपाणि बिभ्रतं** नानावर्णरूपैः सुशोभितम्, **वह्यं** यानं रथम्, **सावित्री सूर्या** सवितुः सुता, **बृहते** महते **सौभगाय** सौभाग्याय **आरोहत्** आरुढा भवतु । वह्यम् वहप्रापणे (भ्वा०) धातोः 'वह्यं करणम्' (पा० सू० ३।१।१०२) इति सूत्रेण करणे यत् ।

आ रोह तल्पं सुमनस्यमानेह प्रजां जनय पत्ये अस्मै ।

इन्द्राणीव सुबुधा बुध्यमाना ज्योतिरग्रा उषसः प्रति जागरासि ॥

पदपाठः

आ । रोह । तल्पम् । सुमनस्यमाना । इह । प्रऽजाम् । जनय । पत्ये । अस्मै । इन्द्राणीऽइव । सुऽबुधा । बुध्यमाना । ज्योतिःऽअग्राः । उषसः । प्रति । जागरासि ॥ ३१ ॥

हे वधु ! इह त्वं पतिगृहे **सुमनस्यमाना** शोभनं मनो वाञ्छन्ती, प्रसन्नचेतसेत्यर्थः, **तल्पं** भर्त्तृशय्याम् **आरोह**, अधितिष्ठ । भर्त्रा सह सुखसंवासम् अनुभवेत्यर्थः । ततः **अस्मै पत्ये** पतिहिताय, भर्त्तारं प्रसादयितुं वा **प्रजां** सन्ततिं **जनय** उत्पादय । सन्तानोत्पत्त्या पतिं प्रसादयेत्यर्थः । **इन्द्राणी इव** इन्द्रपत्नीव **सुबुधा** बुद्धिमती, यद्वा 'सेना वा इन्द्राणी' (मैं० २।२।५) सेना इव सदैव सतर्का अथवा सावधाना सती त्वं **बुध्यमाना** सर्वं कर्त्तव्याकर्त्तव्यजातम् अवगच्छन्ती, **ज्योतिरग्राः** दीप्यमानः प्रकाशः अग्रे यासां ताः **उषसः** प्रभातवेलाः **प्रति** अनुलक्ष्य **जागरासि** जागरिता भव । जागृ-निद्राक्षये (अदा०) धातोर्लेट् । रात्रौ भर्त्रा सह प्रसन्नमनसा सुखसंवासमनुभूय प्रातः उषःकालादपि पूर्वमेव नित्यं शय्यां परित्यजेः इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवा अग्रे न्य१पद्यन्त पत्नीः समस्पृशन्त तन्व१स्तनूभिः ।
सूर्येव नारि विश्वरूपा महित्वा प्रजावती पत्या सं भवेह ॥३२॥

पदपाठः

देवाः । अग्रे । नि । अपद्यन्त । पत्नीः । सम् । अस्पृशन्त । तन्वऽः । तनूभिः । सूर्याऽइव । नारि । विश्वऽरूपा । महिऽत्वा । प्रजाऽवती । पत्या । सम् । भव । इह ॥ ३२ ॥

अग्रे पूर्वस्मिन् युगे **देवाः** इन्द्रादयो देवाः अपि **पत्नीः** स्व-स्वभार्याः, **नि अपद्यन्त** नितरां प्राप्तवन्तः । ताभिः सह स्वपन्ति स्मेत्यन्ये । तथा ते **तनूभिः** पत्नीनां शरीराङ्गैः सह, **तन्वः** स्वशरीराङ्गानि **समस्पृशन्त** सम्यक् स्पृष्टवन्तः । तासामालिङ्गनं कुर्वन्तिस्मेत्यर्थः । अतः **नारि** हे वधु ! त्वमपि **सूर्या इव** सूर्यसुतेव **महित्वा** महत्त्वेन आत्मगौरवमनुभवन्तीत्यर्थः । **विश्वरूपाः** विविधरूपाणि नानालङ्कारवसनादीनि धारयन्ती इह अत्र भर्त्तृकुले **प्रजावती** प्रजाकामनया **पत्या** भर्त्रा **सम्भव** ऐक्यं धारय, सन्तानोत्पत्तिं कुरुष्वेति भावः ।

उतिष्ठेतो विश्वावसो नमसेडामहे त्वा ।
जामिमिच्छ पितृषदं न्य१क्तां स ते भागो जनुषा तस्य विद्धि ॥३३॥

पदपाठः

उत् । तिष्ठ । इतः । विश्ववसो इति विश्वऽवसो । नमसा । ईडामहे । त्वा । जामिम् । इच्छ । पितृऽसदम् । निऽअक्ताम् । सः । ते । भागः । जनुषा । तस्य । विद्धि ॥३३॥

विश्वावसो हे विश्वावसुनामधेय गन्धर्व ! त्वम् **इतः** स्थानात् कन्यासामीप्यात् **उत्तिष्ठ** उत्थाय अन्यत्र गच्छेत्यर्थः । यत एषा भर्त्तृमती सञ्जातेति शेषः । वयं **त्वा** त्वां **नमसा** नमस्कारेण **ईडामहे** गीर्भिः स्तुतिभिश्च स्तुमः । एनां विहाय कामन्यां कन्यां स्वीकरोमीति चेद् ब्रूषे तर्हि **त्वम्** एतदतिरिक्तां **पितृषदं** पितृकुले स्थितां तथा **न्यक्तां** नितान्तं सिक्तां सर्वथा प्रणयपूर्णामित्यर्थः । नियमेन कृताभ्यञ्जनामित्यपि कश्चित् **जामिं** कन्यां 'जमतेर्वा गतिकर्मणः' (निरु० ३।१) । जमति गच्छति पितुर्गृहात् पतिकुलमिति । इण् अत्र कर्त्तरि बाहुलकात् । इच्छ तद्ग्रहणेच्छां कुरु । यतः **स** एव जामिरूपपदार्थः, **ते** तव **भागः** कल्पितः इति शेषः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य तं भागं **विद्धि** जानीहि **जनुषा** जन्मना । लभस्वेत्यर्थः । पाठभेदेन पठ्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।८५।२१) ।

अप्सरसः सधमादं मदन्ति हविर्धानमन्तरा सूर्यं च ।
तास्ते जनित्रमभि ताः परेहि नमस्ते गन्धर्वर्तुना कृणोमि ।।३४।।

पदपाठः

अप्सरसः । सधऽमादम् । मदन्ति । हविःऽधानम् । अन्तरा । सूर्यम् । च । ताः । ते । जनित्रम् । अभि । ताः । परा । इहि । नमः । ते । गन्धर्वऽऋतुना । कृणोमि ।।३४।।

अप्सरसः देवाङ्गनाः, **हविर्धानं** हविर्धानशब्देनात्र हविषामाधानभूतो भूलोको गृहीतो भवति, **पृथ्वीलोकमित्यर्थः सूर्यं च** तथा सूर्यलोकम् **अन्तरा** मध्ये, अर्थादन्तरिक्षलोके **सधमादं** 'सधमादं सहमदनम्' इति निरुक्तम् (७।७) सहानन्दमहोत्सवं **मदन्ति** माद्यन्ति, आनन्दमनुभवन्तीत्यर्थः । हे विश्वावसो, **ताः अभि परेहि** ताः प्रति गच्छ । अहं त्वां गन्धर्वर्तुना 'ऋतवो वै देवाः' (श०ब्रा० ७।२।४।२६) गन्धर्वदेवैः सह गन्तुं ते त्वां **नमः कृणोमि** नमस्करोमि ।

नमो गन्धर्वस्य नमसे नमो भामाय चक्षुषे च कृण्मः ।
विश्वावसो ब्रह्मणा ते नमोऽभि जाया अप्सरसः परेहि ।।३५।।

पदपाठः

नमः । गन्धर्वस्य । नमसे । नमः । भामाय । चक्षुषे । च । कृण्मः । विश्वावसो इति विश्वऽवसो । ब्रह्मणा । ते । नमः । अभि । जायाः । अप्सरसः । परा । इहि ।। ३५ ।।

गन्धर्वस्य योषित्कामानां गन्धर्वाणां, **नमसे** वज्रनामसु पाठात् (**निघं० २।२०**) वज्रोपलक्षिताय सामर्थ्याय **नमः** नमनमस्तु । तेषां **भामाय,** भामः इति क्रोधनाम (निघं० २।१३) । क्रोधाय । भामक्रोधे (भ्वा०) धातोर्घञ् । यद्वा भादीप्तौ (अदा०) धातोः औणादिको मन् प्रत्ययः । तेषां तेजसे । **चक्षुषे च** नेत्राय च **नमः** नमस्कारं **कृण्मः** कुर्मः । यद्वा तेजसे इति चक्षुर्विशेषणं योज्यम् । तेजःपूर्णाय नेत्राय नमः । **विश्वावसो** हे गन्धर्वाधिराज, यद्वा विश्वं वासयति इति विश्वावसुः, तत्सम्बुद्धौ । अथवा हे कन्याजनाधिपते ! 'विश्वावसुर्नाम गन्धर्वः कन्यानामधिपतिः' इति श्रुतेः । विश्वोपपदात् वसनिवासे (भ्वा०) धातोः औणादिकः उः प्रत्ययः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पूर्वपदस्य संहितायां दीर्घः। **ब्रह्मणा** मन्त्रेण ज्ञानेन वा **ते** तुभ्यं **नमः** अस्तु। त्वम् **अप्सरसः जायाः अभि** देवाङ्गनाः प्रति **परेहि** दूरं याहि। यद्वा देवाङ्गनातुल्याभिः स्त्रीभिः सह दूरं याहि।

राया वयं सुमनसः स्यामोदितो गन्धर्वमावीवृताम।
अगन्त्स देवः परमं सधस्थमगन्म यत्र प्रतिरन्त आयुः ॥ ३६ ॥

पदपाठः

राया। वयम्। सुऽमनसः। स्याम। उत्। इतः। गन्धर्वम्। आ। अवीवृताम। अगन्। सः। देवः। परमम्। सधऽस्थम्। अगन्म। यत्र। प्रऽतिरन्त। आयुः ॥ ३६ ॥

सम्प्रति गन्धर्वगमनानन्तरं **वयं** सर्वे कुटुम्बिनः **राया** धनवैभवेन सह **सुमनसः** प्रसन्नान्तःकरणाः **स्याम** अभूम इत्यर्थः। यतो वयं **गन्धर्वं** योपित्कामं विश्वावसुं गन्धर्वं देवजातिविशेषम् **इतः** अस्माद् गृहात्, **उत् आवीवृताम** बहुदूरमुपरि प्रत्यगमयाम। तस्य प्रतिगमनात् प्रम्प्रति वयं स्वस्थचित्ता अभूम इत्यर्थः। **सः देवो** गन्धर्वः इदानीं **परमम्** अत्यन्तं **सधस्थं** दूरस्थानम् **अगन्** अगच्छत्। अगन् गतिकर्मा इति निघण्टुः (२।१४)। अतो वयमपि तत्र **अगन्म** गच्छाम, यद्वा अगमाम। **यत्र आयुः** जीवनं **प्रतिरन्त** दीर्घं भवति।

सं पितरावृत्विये सृजेथां माता पिता च रेतसो भवाथः।
मर्य इव योषामधिरोहयैनां प्रजां कृण्वाथामिह पुष्यतं रयिम् ॥३७॥

पदपाठः

सम्। पितरौ। ऋत्विये इति। सृजेथाम्। माता। पिता। च। रेतसः। भवाथः। मर्यः। इव। योषाम्। अधि। रोहय। एनाम्। प्रऽजाम्। कृण्वाथाम्। इह। पुष्यतम्। रयिम् ॥३७॥

वधूवरयोरेकत्र शयनावसरे पठ्यतेऽयं मन्त्रः। **पितरौ** हे नवोद्वाहौ भाविनौ मातापितरौ! **ऋत्विये** ऋतुकाले युवां **संसृजेथां** संयुक्तौ भवतम् तथा **रेतसः** वीर्यस्य सामर्थ्येन यद्वा वीर्यस्य संयोगात् **माता पिता च भवाथः** जननीजनकौ भवतम्। हे वीर्यशालिन्! त्वं **मर्यः इव** समर्थपुरुषः इव **योषाम्** इमां वधूम् **अधिरोहय**, अत्र आरूढो भव। ततो युवां संमिल्य **प्रजां** सन्तर्ति **कृण्वाथां** कुरुतं जनयतमित्यर्थः। तेन इह गृहस्थाश्रमे **रयिं** धनसमृद्धि सन्ततिवैभवं वा **पुष्यतं** वर्धयतम्। ऋत्विये 'छन्दसि घस्' (पा० सू० ५।१।१०६) इत्यनेन ऋतुशब्दात् घस्, घस्य इयादेशः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तां पूषं छिवतमामेरयस्व यस्यां बीजं मनुष्या३ वपन्ति ।
या न ऊरू उशती विश्रयाति यस्यामुशन्तः प्रहरेम शेपः ॥३८॥

पदपाठः

ताम् । पूषन् । शिवऽतमाम् । आ । ईरयस्व । यस्याम् । बीजम् । मनुष्याः । वपन्ति । या । नः । ऊरू इति । उशती । विऽश्रयाति । यस्याम् । उशन्तः । प्रऽहरेम । शेपः ॥ ३८ ॥

पूषन् हे पोषकैतन्नामकदेव ! **शिवतमाम्** अत्यन्तमङ्गलभूतां **ताम् एरयस्व** आ ईरय सर्वतः प्रेरय । **यस्याम्** ऊरौ बीजं रेतोलक्षणं **मनुष्याः वपन्ति** आदधते । **या नः** अस्माकम् **ऊरू उशती** कामयमाना **विश्रयाति** विस्तारयति । **यस्याम्** ऊरौ **उशन्तः** कामयमानाः वयमपि **शेपः** स्पर्शनयोग्यं पुंस्प्रजननं **प्रहरेम** ऊरौ व्यञ्जनसम्बन्धं कुर्याम इत्यर्थः । स्वल्पेन पाठभेदेन पठ्यते मन्त्रोऽयमृग्वेदे (ऋ० १०।८५।३७) ।

आ रोहोरुमुप धत्स्व हस्तं परिष्वजस्व जायां सुमनस्यमानः ।
प्रजां कृण्वाथामिह मोदमानौ दीर्घं वामायुः सविता कृणोतु ॥३९॥

पदपाठः

आ । रोह । ऊरुम् । उप । धत्स्व । हस्तम् । परि । स्वजस्व । जायाम् । सुऽमनस्यमानः । प्रऽजाम् । कृण्वाथाम् । इह । मोदमानौ । दीर्घम् । वाम् । आयुः । सविता । कृणोतु ॥ ३९ ॥

हे नवविवाहित पुरुष ! अस्याः वध्वाः **ऊरुम् आरोह** एतज्जङ्घारूढो भव । **हस्तम् उपधत्स्व** स्वकीयं करं तदुपरि निक्षिप, यद्वा आत्मनो हस्तं तस्या उपधानं विधत्स्व । तथा **सुमनस्यमानः** प्रसन्नचित्तः सन् जायां पत्नीं **परिष्वजस्व** परित आवेष्टय, तस्या आलिङ्गनं कुरु इत्यर्थः । ततश्च **मोदमानौ** आनन्दमनुभवन्तौ युवाम् **इह** लोके **प्रजां** सन्ततिं **कृण्वाथां** जनयतम् । **सविता** सर्वप्रेरकः सूर्यः **वां** युवयोः **आयुः** जीवनं **दीर्घं कृणोतु** विदधातु ।

आ वां प्रजां जनयतु प्रजापतिरहोरात्राभ्यां समनक्त्वर्यमा ।
अदुर्मङ्गली पतिलोकमा विशेमं शं नो भव द्विपदे शं चतुष्पदे ॥४०॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आ । वाम् । प्रऽजाम् । जनयतु । प्रजाऽपतिः । अहोरात्राभ्याम् । सम् । अनक्तु । अर्यमा । अदुःऽमङ्गली । पतिऽलोकम् । आ । विश । इमम् । शम् । नः । भव । द्विऽपदे । शम् । चतुःऽपदे ।। ४० ।।

वां युवयोः नववधूवरयोः गृहे **प्रजापतिः** वेधाः **प्रजां** सन्ततिम् **आ जनयतु** उत्पादयतु । **अर्यमा** 'अर्यमाऽऽदित्योऽरीन् नियच्छतीति' निरुक्तम् (११।३) । अर्योपपदात् माङ् माने (दि०) धातोः औणादिकः कनिन् प्रत्ययः । भगवान् सूर्यः, **अहोरात्राभ्यां** रात्रिन्दिवं सर्वदैवेत्यर्थः । समनक्तु संयोजयतु । सूर्यकृपया न कदापि युवयोः प्रणयविच्छेदो भवेदित्यर्थः । **अदुर्मङ्गली,** न दुर्मङ्गली, दुर्मङ्गलशून्या त्वं हे वधु ! **पतिलोकम्** अस्मिन् पतिकुले **आविश** प्रवेशं कुरु । तथा **नः** अस्माकं **द्विपदे** द्विचरणानां मनुष्यादीनां कृते **शं** श्रेयोविधायिनी **भव** तथा **चतुष्पदे** चतुश्चरणानां गोधनादीनां कृतेऽपि **शं भव** श्रेयस्करी भव ।

देवैर्दत्तं मनुना साकमेतद् वाधूयं वासो वध्वश्च वस्त्रम् ।
यो ब्रह्मणे चिकितुषे ददाति स इद् रक्षांसि तल्पानि हन्ति ।।४१।।

पदपाठः

देवैः । दत्तम् । मनुना । साकम् । एतत् । वाधूऽयम् । वासः । वध्वऽः । च । वस्त्रम् । यः । ब्रह्मणे । चिकितुषे । ददाति । सः । इत् । रक्षांसि । तल्पानि । हन्ति ।। ४१ ।।

यः यो वै कश्चन जनः **ब्रह्मणे** प्रजापतये, कीदृशाय **चिकितुषे** सर्वज्ञानवते, **ददाति** यज्ञेषु पुरोडाशादिकं प्रयच्छति, **स इत्** स एव यज्ञप्रभावेण लब्धसामर्थ्यः **तल्पानि** शय्यासम्बन्धीनि, सुखस्वापे विघ्नकारीणीत्यर्थः । **रक्षांसि** राक्षसकुलानि **हन्ति** हन्तुं समर्थो भवति । स एव च **मनुना साकं** 'आयुर्वै मनुः' (कौ० २६।१७) आयुषा सह **देवैः** कुलदेवताभिः **दत्तं** प्रदत्तं **वध्वः** नववध्वाः **वासः** आच्छादनं परिधानीयमित्यर्थः । **वस्त्रं** वसनं वाधूयं वधूवस्त्रम् अर्हतीति शेषः । यद्वा यो मनुमहाराजेन एवं देवैश्च दत्तं वध्वो वैवाहिकं परिधानीयं वसनं ब्रह्मणे प्रददाति स एव तल्पसमीपस्थानि रक्षांसि हन्तीति ।

यं मे दत्तो ब्रह्मभागं वधूयोर्वाधूयं वासो वध्वश्च वस्त्रम् ।
युवं ब्रह्मणेनुमन्यमानौ बृहस्पते साकमिन्द्रश्च दत्तम् ।।४२।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यम् । मे । दत्तः । ब्रह्मऽभागम् । वधूऽयोः । वाधूऽयम् । वासः । वध्वऽः । च । वस्त्रम् । युवम् । ब्रह्मणे । अनुऽमन्यमानौ । बृहस्पते । साकम् । इन्द्रः । च । दत्तम् ।। ४२ ।।

वाधूयं वधूयोग्यं वैवाहिकं **वासः** माङ्गलिकं वसनं, **चकारः** समुच्चयार्थः, **वध्वः** नवोढायाः अस्याः **वस्त्रं** साधारणमधोवसनम् इमे उभयविधे वसने **वधूयोः** वधूकामाय । 'चतुर्थ्यर्थे बहुलं छन्दसि' (पा० सू० २।३।६२ इति सूत्रेणात्र षष्ठी । वधूपपदात् आत्मनः इच्छायां क्यजन्तात् 'क्याच्छन्दसि' (पा० सू० ३।२।१७०) इत्यनेन उः । **मे** मह्यं वराय नवविवाहिताय, **यं ब्रह्मभागम्** ब्रह्मणः अर्थाद् अभयस्य बलस्य शर्मणः सुखस्य वा यम् अंशं **दत्तः** अदत्ताम् । **बृहस्पते** हे बृहतां देवानां लोकानां वा पालनकर्त्तः ! **इन्द्रः युवं च** ऐश्वर्यवान् इन्द्रो देवः त्वमपि च, युवां **साकं** संमिल्य युगपदेव **अनुमन्यमानौ** अस्मत्प्रार्थनाम् अभिनन्दन्तौ, अनुमतिं प्रयच्छन्तौ इत्यर्थः, तं ब्रह्मभागं **ब्रह्मणे** प्रजापतये ब्राह्मणाय वा **दत्तं** प्रयच्छतम् । ब्रह्मेत्यत्र 'ब्रह्म वै शर्म' (काठ० १६।५), 'बलं वै ब्रह्म' (तै० ब्रा० ३।८।५।२), 'अभयं वै ब्रह्म' (श० ब्रा० १४।७।२।३०) इत्याद्याः श्रुतयः प्रमाणम् ।

स्योनाद्योनेरधि बुध्यमानौ हसामुदौ महसा मोदमानौ ।
सुगू सुपुत्रौ सुगृहौ तराथो जीवावुषसो विभातीः ।।४३।।

पदपाठः

स्योनात् । योनेः । अधि । बुध्यमानौ । हसामुदौ । महसा । मोदऽमानौ । सुगू इति सुऽगू । सुऽपुत्रौ । सुऽगृहौ । तराथः । जीवौ । उषसः । विऽभातीः ।। ४३ ।।

हे नवोद्वाहौ वधूवरौ ! **स्योनात्** स्योनं सुखं, सुखदायिनः इत्यर्थः, **योनेः**, गृहनामसु पाठात् (निघं० ३।४) शयनभवनात् **अधिबुध्यमानौ** अधिकं जागरूकौ, सर्वथा शय्यां परित्यजन्तौ इत्यर्थः । पुनः विशिनष्टि । **हसामुदौ** हास्यप्रमोदेन आनन्दमनुभवन्तौ, तथा **महसा** आत्मतेजसा, यद्वा 'महो महतः' इति निरुक्तम् (६।३). महता प्रमोदेन **मोदमानौ** हृष्यन्तौ स्निह्यन्तौ वा युवां वधूवरौ **सुगू** सुन्दरगोधनयुतौ, **सुपुत्रौ** शोभनतनयसमुपेतौ, **सुगृहौ** सुन्दरनिवासभवनसमवेतौ च सन्तौ **जीवौ** जीवन्तौ **विभातीः** द्योतमानाः **उषसः** प्रभूताः प्रभातवेलाः **तराथः** पारयतम् । अर्थाद् युवां नित्यं सुखशयनाद् उत्थाय हसन्तौ क्रीडन्तौ मोदञ्चानुभवन्तौ पुत्रवैभवपशुधनादिकं सर्वं लब्ध्वा बहुकालं जीवतमिति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नवं वसानः सुरभिः सुवासा उदागां जीव उषसो विभातीः ।
आण्डात् पतत्रीवामुक्षि विश्वस्मादेनसस्परि ।। ४४ ।।

पदपाठः

नवम् । वसानः । सुरभिः । सुऽवासोः । उत्ऽआगाम् । जीवः । उषसः । विऽभातीः । आण्डात् । पतत्रीऽइव । अमुक्षि । विश्वस्मात् । एनसः । परि ।। ४४ ।।

उषसि शय्यां परित्यजन् पठतीमं मन्त्रं वरः । **जीवः** विद्यमानजीवनः प्राणान् धारयन्नित्यर्थः । अहं नवो वरो नित्यं **नवं** नूतनं वसनं **वसानः** धारयन्, **सुरभिः** सुगन्धिततैलादिभिः सुरभितः, **सुवासाः** सुन्दरवस्त्राणि च धारयन् यद्वा सुवासाः सुन्दरनिवासवान् सन् **विभातीः** प्रकाशमानाः **उषसः** प्रभातवेलाः, द्योतमानप्रभातवेलासु इत्यर्थः । **उदागाम्** उदयं लभेय । अर्थात् शय्यातः समुत्थितो भवेयम् । कथमिव । **आण्डात्** अण्डात् **पतत्री इव** पक्षी इव । यथा अण्डात् पक्षी समुत्थाय मोदमनुभवन् सर्वत्र प्रचरति तथा अहमपि नित्यं प्रातः शय्यातः समुत्थाय मोदमनुभवेयमिति । किं च **विश्वस्मात्** सर्वस्मात् **एनसः** पापात् अपि **परि अमुक्षि** मुक्तो भवेयम् ।

शुम्भनी द्यावापृथिवी अन्तिसुम्ने महिव्रते ।
आपः सप्त सुस्रुवुर्देवीस्ता नो मुञ्चन्त्वंहसः ।।४५।।

पदपाठः

शुम्भनी इति । द्यावापृथिवी इति । अन्तिसुम्ने इत्यन्तिऽसुम्ने । महिव्रते इति महिऽव्रते । आपः । सप्त । सुस्रुवुः । देवीः । ताः । नः । मुञ्चन्तु । अंहसः ।। ४५ ।।

द्यावापृथिवी द्यावापृथिव्यौ **महिव्रते** परमं व्रतशीले स्तः । कीदृश्यौ । **शुम्भनी** शोभासमेतौ । पुनर्विशिनष्टि । **अन्तिद्युम्ने** अन्तिके निकटे द्युम्नं सुखं ययोस्ते । समीपमुपस्थाय सुखप्रदात्र्यौ इत्यर्थः । तथा याः **सप्त**, सप्तसङ्ख्याकाः **देवीः** दिव्याः **आपः** सप्तसिन्धवः इत्यर्थः । **सुस्रुवुः** प्रवहन्ति । **ताः** सर्वाः **नः** अस्मान् **अंहसः** पापाचरणात् **मुञ्चन्तु** दूरं कुर्वन्तु ।

सूर्यायै देवेभ्यो मित्राय वरुणाय च ।
ये भूतस्य प्रचेतसस्तेभ्य इदमकरं नमः ।। ४६ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सूर्यायै । देवेभ्यः । मित्राय । वरुणाय । च । ये । भूतस्य । प्रऽचेतसः । तेभ्यः । इदम् । अकरम् । नमः ।। ४६ ।।

सूर्यायै सूर्यस्य पत्न्यै, **देवेभ्यः** अग्न्यादिभ्यः, **मित्राय** वरुणाय **च**, **ये** च **भूतस्य** भूतजातस्य **प्रचेतसः** सुमतयोऽभिमतप्रदा भवन्ति **तेभ्यः** सर्वेभ्यः **इदं नमः** नमस्कारम् **अकरं** करोमि । पाठभेदतः पठ्यतेऽयं मन्त्रः ऋग्वेदे (ऋ० १०।८५।१७) ।

य ऋते चिदभिश्रिषः पुरा जत्रुभ्य आतृदः ।

संधाता संधिं मघवा पुरूवसुर्निष्कर्त्ता विह्रुतं पुनः ।।४७।।

पदपाठः

यः । ऋते । चित् । अभिऽश्रिषः । पुरा । जत्रुऽभ्यः । आऽतृदः । सम्ऽधिम् । मघऽवा । पुरुऽवसुः । निःकर्त्ता । विह्रुतम् । पुनः ।।४७।।

यः इन्द्रः **अभिश्रिषः** अभिश्लिषोऽभिश्लेषणात् संधानद्रव्यात् **ऋते चित्** विनाऽपि **जत्रुभ्यः** ग्रीवाभ्यः सकाशात् **आतृदः** आतर्दनात् आ रुधिरनिःस्रवणात् **पुरा** पूर्वमेव **सन्धि** सन्धातव्यं तं **सन्धाता** संयोजयिता भवति । **मघवा** धनवान् **पुरूवसुः** बहुधनः स इन्द्रः **विह्रुतं** विच्छिन्नं तं **पुनःनिष्कर्त्ता** संस्कर्त्ता भवति । 'पुरूवसुरिष्कर्त्ता' इति ऋक्पाठः (ऋ० ८।१।१२) ।

अपास्मत् तम उच्छतु नीलं पिशङ्गमुत लोहितं यत् ।

निर्दहनी या पृषातक्य१स्मिन् तां स्थाणावध्या सजामि ।।४८।।

पदपाठः

अप । अस्मत् । तमः । उच्छतु । नीलम् । पिशङ्गम् । उत । लोहितम् । यत् । निःऽदहनी । या । पृषातकी । अस्मिन् । ताम् । स्थाणौ । अधि । आ । सजामि ।। ४८ ।।

यत् तमः अन्धकारावरणं **नीलं** नीलवर्णं, **पिशङ्गं** पीतवर्णम् **उत** अपि च **लोहितम्** अरुणवर्णं विद्यते तत्तमः **अस्मत्** अस्माकं गृहात् **अपगच्छतु** दूरं गच्छतु । सूर्यप्रकाशात् सहसा समागतेऽधिभवनं नेत्रयोः पुरस्तमसो नीललोहितादयो वर्णाः समुल्लसन्तीत्यनुभवसिद्धम् । वेदान्तिनो मीमांसकाश्च तमसो नीलवर्णत्वं स्वीकुर्वन्त्येव । अथ च **या निर्दहनी** प्रदाहिका **पृषातकी** बिन्दुमती पीडा अस्ति **ताम्** अहं **स्थाणौ** शुष्कवृक्षे स्तम्भभूते **अध्यासजामि** बध्नामि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यावतीः कृत्या उपवासने यावन्तो राज्ञो वरुणस्य पाशाः ।
व्यृ॑द्धयो या असमृद्धयो या अस्मिन् ताः स्थाणावधि सादयामि ।।

पदपाठः

यावतीः । कृत्याः । उपऽवासने । यावन्तः । राज्ञः । वरुणस्य । पाशाः । विऽऋद्धयः । याः । असम्ऽऋद्धयः । याः । अस्मिन् । ताः । स्थाणौ । अधि । सादयामि ।। ४९ ।।

उपवासने उपवसथे निवासस्थाने इत्यर्थः । **यावतीः** यावत्यः, यावत्परिमाणाः, **कृत्याः** आभिचारिकपीडाः सन्ति, **राज्ञो वरुणस्य** च वरुणदेवस्य च **यावन्तः** यावत्सङ्ख्याकाः **पाशाः** बन्धाः विद्यन्ते **या व्यृद्धयः** विगता ऋद्धयः, तथा **याः असमृद्धयः** असम्पदः सन्ति **ताः** सर्वाः अहम् अस्मिन् **स्थाणौ** स्तम्भभूते शुष्कवृक्षे **अधिसादयामि** स्थापयामि ।

या मे प्रियतमा तनूः सा मे बिभाय वाससः ।
तस्याग्रे त्वं वनस्पते नीविं कृणुष्व मा वयं रिषाम ।।५०।।

पदपाठः

या । मे । प्रियऽतमा । तनूः । सा । मे । बिभाय । वाससः । तस्य । अग्रे । त्वम् । वनस्पते । नीविम् । कृणुष्व । मा । वयम् । रिषाम ।।५०।।

मे मम **या प्रियतमा** अत्यन्तं प्रिया **तनूः** शरीरयष्टिः विद्यते, **सा मे** तनूः शरीरमित्यर्थः, **वाससः** अस्मात् वस्त्रात् **बिभाय** बिभेति । यद्वा वाससः हिंसाकर्मणो बिभेति इत्यपि कश्चित् । अतः **वनस्पते** हे वननीयस्य सेवनीयस्य जगतः पते ! **त्वम् अग्रे** सर्वतः पूर्वं **तस्य** वाससो **नीविं** कटिवस्त्रबन्धनं कृणुष्व कुरु । येन **वयं मा रिषाम** हिंसिता न भवेम । नीविमित्यत्र छान्दसं ह्रस्वत्वम् ।

ये अन्ता यावतीः सिचो य ओतवो ये च तन्तवः ।
वासो यत् पत्नीभिरुतं तन्नः स्योनमुप स्पृशात् ।।५१।।

पदपाठः

ये । अन्ताः । यावतीः । सिचः । ये । ओतवः । ये । च । तन्तवः । वासः । यत् । पत्नीभिः । उतम् । तत् । नः । स्योनम् । उप । स्पृशात् ।। ५१ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अस्य परिधानीयस्य **ये अन्ताः** वस्त्रान्तभागाः, **यावतीः** यावत्यः **सिचः** वस्तयः वस्त्रान्तावयवाः इत्यर्थः। 'स्त्रियां बहुत्वे वस्त्रस्य दशाः स्युर्वस्तयोर्द्वयोः' इत्यमरः। **ये ओतवः** वस्त्रे लम्बतन्तवः, **ये च तन्तवः** सूत्राणि सन्ति। एभिः **यद् वासः** वस्त्रं **पत्नीभिः** गृहवधूभिः, **उतं** स्यूतं सम्पादितं **तद्** वस्त्रं **नः** अस्मान् **स्योनं** सुखम् **उपस्पृशात्** उपस्पृशयेत्, यद्वा सुखेन उपेत्य स्पृशेत्।

उशतीः कन्यला इमाः पितृलोकात् पतिं यतीः।
अव दीक्षामसृक्षत स्वाहा ॥ ५२ ॥

पदपाठः

उशतीः। कन्यलाः। इमाः। पितृऽलोकात्। पतिम्। यतीः। अव। दीक्षाम्। असृक्षत। स्वाहा ॥५२॥

उशतीः पतिं कामयमानाः **इमाः कन्यलाः** कन्यकाः दीप्तिमत्यः इत्यपि कश्चित्, कनी दीप्तिकान्तिगतिषु (भ्वा०) धातोः यत्। ला आदाने (अ०) धातोश्च कः, ततः स्त्रियां टाप्। **पितृलोकात्** पितुः भवनात् **पतिं** पतिगृहं **यतीः** गच्छन्त्यः **दीक्षां** ब्रह्मचर्यनियमम् **अवसृक्षत** त्यजन्ति। **स्वाहा**, सोऽत्र ब्रह्मचर्ययज्ञः समाप्तो भवति। 'यज्ञो वै स्वाहाकारः' (श० ब्रा० ३।३।२।७), 'अन्तो वै यज्ञस्य स्वाहाकारः' (श० ब्रा० १।५।३।१३) इति च श्रुतिः। स्वाहा वेदवाचा इत्यन्यः।

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन्।
वर्चो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ॥५३॥

पदपाठः

बृहस्पतिना। अवसृष्टाम्। विश्वे। देवाः अधारयन्। वर्चः। गोषु। प्रऽविष्टम्। यत्। तेन। इमाम्। सम्। सृजामसि ॥५३॥

बृहस्पतिना बृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादिताम्, परित्यक्तामित्यपि कश्चित्। दीक्षां **विश्वे देवाः** सर्वे देवाः **अधारयन्** धारयामासुः। अथ च **यद् वर्चः** यत्तोजः **गोषु** सूर्यरश्मिषु धेनुषु वा **प्रविष्टम्** अस्ति **तेन** वर्चसा **इमां** दृश्यमानां कन्यां **संसृजामसि** वयं संयोजयामः।

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन्।
तेजो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ॥५४॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् । तेजः । गोषु । प्रऽविष्टम् । यत् । तेन । इमाम् । सम् । सृजामसि ।।५४।।

बृहस्पतिना बृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादितां, परित्यक्तां वा दीक्षां, **विश्वे देवाः** सर्वे देवाः **अधारयन्** धारयामासुः । अथ च **यत्** तेजः ज्योतिः प्रकाशः इत्यर्थः **गोषु** सूर्यरश्मिषु धेनुषु वा **प्रविष्टम्** अस्ति "**तेन** तेजसा **इमां** कन्यां **संसृजामसि** वयं संयोजयामः ।

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् ।
भगो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ।।५५।।

पदपाठः

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् । भगः । गोषु । प्रऽविष्टः । यः । तेन । इमाम् । सम् । सृजामसि ।।५५।।

बृहस्पतिना बृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादितां परित्यक्तां वा दीक्षां **विश्वे देवाः** सर्वे देवाः **अधारयन्** धारयामासुः । अथ च **यः भगः** यदैश्वर्यं **गोषु सूर्यरश्मिषु** धेनुषु वा प्रविष्टः, **तेन इमां** कन्यां **संसृजामसि** वयं संयोजयामः ।

बृहस्पतिनावसृष्टां विश्वे देवा अधारयन् ।
यशो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ।।५६।।

पदपाठः

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् । यशः । गोषु । प्रऽविष्टम् । यत् । तेन । इमाम् । सम् । सृजामसि ।।५६।।

बृहस्पतिना बृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादितां परित्यक्तां वा दीक्षां, **विश्वे देवाः** सर्वे देवाः **अधारयन्** धारयामासुः । अथ च **यत् यशः** कीर्त्ति-वैभवं, यद्वा अन्नम्, 'यशो वै अन्नम्' इति श्रुतेः । **गोषु** सूर्यरश्मिषु धेनुषु वा **प्रविष्टं तेन** यशसा **इमां** कन्यां **संसृजामसि** वयं संयोजयामः ।

बृहस्पतिनाव सृष्टां विश्वे देवा अधारयन् ।
पयो गोषु प्रविष्टं यत् तेनेमां सं सृजामसि ।।५७।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् । पयः । गोषु । प्रऽविष्टम् । यत् । तेन । इमाम् । सम् । सृजामसि ॥५७॥

बृहस्पतिना बृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादितां परित्यक्तां वा दीक्षां **विश्वे देवाः अधारयन्** धारयामासुः । अथ च **यत् पयः** दुग्धं दुग्धनैर्मल्यमित्यर्थः **गोषु** सूर्यरश्मिषु धेनुषु वा **प्रविष्टं तेन इमां** कन्यां **संसृजामसि** वयं संयोजयामः ।

बृहस्पतिनाव सृष्टां विश्वे देवा अधारयन् ।
रसो गोषु प्रविष्टो यस्तेनेमां सं सृजामसि ॥५८॥

पदपाठः

बृहस्पतिना । अवऽसृष्टाम् । विश्वे । देवाः । अधारयन् । रसः । गोषु । प्रऽविष्टः । यः । तेन । इमाम् । सम् । सृजामसि ॥५८॥

बृहस्पतिना वृहतां लोकानां पालकेन देवेन **अवसृष्टां** समुत्पादितां परित्यक्तां वा दीक्षां **विश्वे देवाः अधारयन्** धारयामासुः । अथ च **यः रसः** आनन्दः **गोषु** सूर्यरश्मिषु धेनुषु वा प्रविष्टः **तेन इमां** कन्यां वयं **संसृजामसि** संयोजयामः ।

यदीमे केशिनो जना गृहे ते समनर्त्तिषू रोदेन कृण्वन्तोऽघम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥५९॥

पदपाठः

यदि । इमे । केशिनः । जनाः । गृहे । ते । सम्ऽअनर्त्तिषुः । रोदेन । कृण्वन्तः । अघम् । अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम् ॥५९॥

कन्यायां जातायां **ते** तव **गृहे** गेहे **यदि इमे** चेदेते **केशिनः** प्रलम्बकेशाः वृद्धा इत्यर्थः, **जनाः** लोकाः, **रोदेन** रोदनेन, कन्याजन्मदुःखेन तद्विलापेन वा **अघं** पापम् अपशकुनमिति यावत्, **कृण्वन्तः** कुर्वन्तः **समनर्त्तिषुः** इतस्ततो नर्त्तनमिव वितन्वन्तः अभ्रमन्, **तस्मादेनसः** अपशकुनसूचकात् पापात्, **त्वा** त्वाम् **अग्निः** अग्निदेवः **सविता च** सर्वप्रेरकः सूर्यश्च **प्रमुञ्चतां** मुक्तं कुरुताम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदीयं दुहिता तव विकेश्यरुदद् गृहे रोदेन कृण्वत्य१घम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्रमुञ्चताम् ॥६०॥

पदपाठः

यदि । इयम् । दुहिता । तव । विऽकेशी । अरुदत् । गृहे । रोदेन । कृण्वती । अघम् । अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम् ॥६०॥

यदि च **इयम्** एषा कन्या पितुस्तव पतिगृहगमनासन्ना **दुहिता** तनया पितृगृहपरित्यागदुःखेन **विकेशी** सती विकीर्णकेशा भूत्वा **रोदेन** विलापेन **गृहे** अस्मिन् पितृगेहे **अघम्** अपशकुनं पापं **कृण्वती** कुर्वती **अरुदत्** रोदनं कृतवती तर्हि **तस्माद् एनसः** अपशकुनसूचकात् पापात् अपि **त्वा** त्वाम् **अग्निः** अग्निदेवः **सविता च** सर्वप्रेरकः सूर्यश्च **प्रमुञ्चतां** मुक्तं कुरुताम् ।

यज्जामयो यद्युवतयो गृहे ते समनर्तिषू रोदेन कृण्वतीरघम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्र मुञ्चताम् ॥६१॥

पदपाठः

यत् । जामयः । यत् । युवतयः । गृहे । ते । सम्ऽअनर्तिषुः । रोदेन । कृण्वतीः । अघम् । अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम् ॥६१॥

हे गृहस्वामिन् ! कन्यायाः प्रस्थानसमये **ते** तव **गृहे** भवने **यत् जामयः** याः कन्याभगिन्यः, **यद् युवतयः** याश्चान्याः गृहस्त्रियः, **रोदेन** कन्याविरहप्रलापेन **अघम्** अपशकुनरूपं पापं **कृण्वतीः** आचरन्त्यः **समनर्तिषुः** इतस्ततो नर्त्तनमिव कुर्वत्यः अभ्रमन् **तस्माद्** अपशकुनसूचकात् **एनसः** पापात्, **त्वा** त्वाम् **अग्निः** अग्निदेवः सर्वप्रेरकः **सविता च प्रमुञ्चताम्**, मुक्तं कुरुताम् ।

यत् ते प्रजायां पशुषु यद्वा गृहेषु निष्ठितमघकृद्भिरघं कृतम् ।
अग्निष्ट्वा तस्मादेनसः सविता च प्रमुञ्चताम् ॥ ६२ ॥

पदपाठः

यत् । ते । प्रऽजायाम् । पशुषु । यत् । वा । गृहेषु । निऽस्थितम् । अघकृत्ऽभिः । अघम् । कृतम् । अग्निः । त्वा । तस्मात् । एनसः । सविता । च । प्र । मुञ्चताम् ॥ ६२ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ते तव **प्रजायां**, 'प्रजा वै भूतानि' (श० ब्रा० २।४।२।१) इति श्रुतेः गृह-प्राणिषु कुटुम्बिषु तथा **पशुषु** धेनुवृषभादिपशुधनेषु **यद्वा गृहेषु** निवासस्थानेषु **अघकृद्भिः** पापकारिभिः दुष्टैः **कृतं** समुत्पादितम् **अघम्** अनिष्टं **निष्ठितं** स्थापितं विद्यते, **तस्मात्** अपशकुनसूचकात् **एनसः** पापात् त्वा त्वाम् **अग्निः** अग्निदेवः **सविता च** सर्वप्रेरकः सविता देवता च **प्रमुञ्चताम्**, मुक्तं कुरुताम् ।

इयं नार्युप ब्रूते पूल्यान्यावपन्तिका ।
दीर्घायुरस्तु मे पतिर्जीवाति शरदः शतम् ।।६३।।

पदपाठः

इयम् । नारी । उप । ब्रूते । पूल्यानि । आऽवपन्तिका । दीर्घऽआयुः । अस्तु । मे । पतिः । जीवाति । शरदः । शतम् ।।६३।।

वैवाहिके यज्ञाग्नौ **पूल्यानि** भ्राष्ट्रे भर्जितान् सम्पादितान् भृष्टतण्डुलान्, लाजान् इत्यर्थः, **आवपन्तिका** संवपन्ती, लाजाभिधं हवनं कुर्वती सतीत्यर्थः, **इयं नारी** एषा नववधूः **उपब्रूते** कथयति, इत्थम् अग्निं याचते इत्यर्थः । हे अग्ने ! **मे** मदीयः **पतिः** भर्त्ता, **दीर्घायुः** दीर्घजीवी **अस्तु** भवतु । तदेव स्पष्टयति । सोऽयं **मे** भर्त्ता **शरदः शतं** शतं वर्षाणि **जीवाति** जीव्यात् । पूर्णायुर्भवेदित्यर्थः ।

इहेमाविन्द्र सं नुद चक्रवाकेव दम्पती ।
प्रजयैनौ स्वस्तकौ विश्वमायुर्व्य(श्नुताम् ।।६४।।

पदपाठः

इह । इमौ । इन्द्र । सम् । नुद । चक्रवाकाऽइव । दंपती इति दम्ऽपती । प्रऽजया । एनौ । सुऽअस्तकौ । विश्वम् । आयुः । वि । अश्नुताम् ।।६४।।

इन्द्र हे दातृतम परमैश्वर्यसम्पन्नदेव ! 'इरां दृणातीति वा इरां ददातीति वा, इरां दधातीति वा इन्द्रः' (निरु० १०।१) । इदि परमैश्वर्ये (भ्वा०) धातोः 'ऋज्रेन्द्राग्रवज्रविप्र०' (उ० २।२८) इत्यादिना सूत्रेण औणादिको इन् प्रत्ययः । इन्दति परमैश्वर्यवान् भवतीति विग्रहे हे इन्द्र ! **इह** गार्हस्थ्याश्रमे **इमौ** वधूवरौ **चक्रवाका इव** कोकदम्पतीव परस्परं प्रणयबन्धनं निर्वहन्तौ **दम्पती** जायापती स्याताम् । **संनुद** एवमिमौ प्रेरय । **एनौ** इमौ वधूवरौ **स्वस्तकौ** । अस्तमिति गृहनामसु पाठात् शोभनभवनवन्तौ भवेताम् । **प्रजया** च 'प्रजेति अपत्यनाम'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(निघं० २।२) सन्तत्या सार्धञ्च **विश्वमायुः** शतसंवत्सरात्मकं पूर्णं जीवनं **व्यश्नुताम्** लभेताम् ।

यदासन्द्यामुपधाने यद् वोपवासने कृतम् ।
विवाहे कृत्यां यां चक्रुरास्नाने तां नि दध्मसि ।।६५।।

पदपाठः

यत् । आऽसन्द्यां । उपऽधाने । यत् । वा । उपऽवासने । कृतम् । विऽवाहे । कृत्याम् । याम् । चक्रुः । आऽस्नाने । ताम् । नि । दध्मसि ।।६५।।

यत् हि आभिचारिकं कुकर्म, **आसन्द्यां** वेत्रासने 'वेत्रासनमासन्दी स्त्री वृषी च व्रतिकासनम्' इति कोषः । **कृतं** विहितम् । **यत्** वा अथवा **उपधाने** उपबर्हे कृतमस्ति । उपधानमुपवस्त्रमित्यपि कश्चित् । तथा **उपवासने**, उपपूर्वकात् वसनिवासे (भ्वा०) धातोर्घञ् । उपवासदिवसे, यद्वा निवासस्थाने अथवा उपवस्त्रे छत्रे वा कृतमस्ति, **यां** च **कृत्यां** हिंसात्मिकां क्रियां दुष्टजनाः **विवाहे** विवाहसमये एव **चक्रुः** अकार्षुः **तां** सर्वां वयम् **आस्नाने** स्नानकर्मणि स्नानस्थाने वा **निदध्मसि** नितरां दूरे स्थापयेम ।

यद् दुष्कृतं यच्छमलं विवाहे वहतौ च यत् ।
तत् संभलस्य कम्बले मृज्महे दुरितं वयम् ।।६६।।

पदपाठः

यत् । दुःऽकृतम् । यत् । शमलम् । विवाहे । वहतौ । च । यत् । तत् । सम्ऽभलस्य । कम्बले । मृज्महे । दुःऽइतम् । वयम् ।।६६।।

विवाहे विवाहावसरे **यत् दुष्कृतं** यदनुचितं व्यवहारविरुद्धं कर्म सम्पन्नमभूत्, **यत् च शमलं** यच्च मलिनं निन्दितं कर्म **वहतौ** कन्यावहनकाले यद्वा दातव्यपदार्थेषु यौतकेषु अथवा रथे सञ्जातमस्ति **तद् दुरितं** पापं **वयं** सर्वे **सम्भलस्य** सम्यक् निरूपकस्य मध्यस्थपुरुषस्य, भलनिरूपणे धातोः अच् । **कम्बले** ऊर्णावस्त्रे तदुपरि इत्यर्थः । **मृज्महे** शोधयामः । अर्थाद् विवाहोत्सवेऽत्र यत् किमपि अनभीप्सितमनुचितं कार्यं सञ्जातं तस्य समस्तं दोषम् उत्तरदायित्वं वा वयं वर-कन्यापक्षीयाः मध्यस्थे पुरुषे एव पातयामः इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

संभले मलं सादयित्वा कम्बले दुरितं वयम् ।

अभूम यज्ञियाः शुद्धाः प्र ण आयूंषि तारिषत् ।।६७।।

पदपाठः

सम्ऽभले । मलम् । सादयित्वा । कम्बले । दुःऽइतम् । वयम् । अभूम । यज्ञियाः । शुद्धाः । प्र । नः । आयूंषि । तारिषत् ।।६७।।

सम्प्रति **वयं** वरकुटुम्बिनः कन्याकुटुम्बिनश्च जनाः **सम्भले** मध्यस्थे जने एव **मलं** निखिलं दोषजातं **सादयित्वा** स्थापयित्वा समस्तं **दुरितं** पापञ्च तस्य **कम्बले** कम्बलवसने निक्षिप्य **शुद्धाः** निर्दोषाः, अत एव **यज्ञियाः** यज्ञनसम्पादनयोग्याः । तदर्हतीत्यर्थे 'यज्ञर्तिग्भ्यां घखजञौ' (पा०सू० ५।१।७१) इति घः, घस्य इयादेशश्च । **अभूम** अभवाम । साम्प्रतं यज्ञपुरुषः **नः** अस्माकं निर्दोषाणाम् **आयूंषि** जीवनं **प्रतारिषत्** संवर्धयेत् ।

कृत्रिमः कण्टकः शतदन् य एषः ।

अपास्याः केश्यं मलमप शीर्षण्यंऽलिखात् ।।६८।।

पदपाठः

कृत्रिमः । कण्टकः । शतऽदन् । यः । एषः । अप । अस्याः । केश्यम् । मलम् । अप । शीर्षण्यऽम् । लिखात् ।।६८।।

यः एषः प्रत्यक्षं दृश्यमानः **कृत्रिमः** शिल्पिना सम्पादितः **शतदन्** शतदन्तः अनेकाग्रभागः, अत एव **कण्टकः** कण्टकवत् अनुभूयमानः अस्तीति शेषः । केशप्रसाधनसाधनभूता प्रसाधनिका वर्तते इत्यर्थः । स कण्टकः **अस्याः** वध्वाः **केश्यं मलं** शिरोरुहमालिन्यम् । तदेव पुनः स्पष्टयति । **शीर्षण्यम्** अर्थात् शिरसि समुत्पन्नं मलजातम् **अपलिखात्** सर्वथा उत्क्षिप्य दूरी करोतु ।

अङ्गादङ्गाद् वयमस्या अप यक्ष्मं नि दध्मसि ।

तन्मा प्रापत् पृथिवीं मोत देवान् दिवं मा प्रापदुर्व१न्तरिक्षम् ।

अपो मा प्रापन्मलमेतदग्ने यमं मा प्रापत् पितॄंश्च सर्वान् ।६९।

पदपाठः

अङ्गात्ऽअङ्गात् । वयम् । अस्याः । अप । यक्ष्मम् । नि । दध्मसि । तत् । मा । प्र । आपत् । पृथिवीम् । मा । उत । देवान् । दिवम् । मा ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्र । आपत् । उरु । अन्तरिक्षम् । अपः । मा । प्र । आपत् । मलम् । एतत् । अग्ने । यमम् । मा । प्र । आपत् । पितॄन् । च । सर्वान् ।।६९।।

वयं सर्वे कुटुम्बिनः **अस्याः** नववध्वाः **अङ्गात् अङ्गात्** सर्वेभ्यः शरीरावयवेभ्यः सम्भाव्यमानं **यक्ष्मं** क्षयरोगं, क्षयरोगकीटाणून् इत्यर्थः । **अपनिदध्मसि** नितरां दूरं स्थापयामः, निक्षिपाम इत्यर्थः । दधधारणे (भ्वा०) धातोर्लटि 'बहुलं छन्दसि' इति शपो लुकि व्यत्ययेन परस्मैपदम् । 'इदन्तोमसि' (पा० सू० ७।१।४६) इत्यनेन मस इदन्तता । **तत्** यक्ष्ममलं **पृथिवीं** भूमिं **मा प्रापत्** न प्राप्नुयात् । भूमौ न प्रसरेदित्यर्थः । उतशब्दः अप्यर्थकोऽपि (निरु० १।६) । **दिवं** द्युलोकेऽपि **देवान्** इन्द्रादिदेवान् **मा प्रापत्** न प्राप्नुयात् । द्युलोके देवानपि स रोगः न पीडयेदिति भावः । तथा **उरु अन्तरिक्षं** विस्तृते मध्यमे लोकेऽपि **मा** प्रसरेत् । एवञ्च **एतत्** इदं यक्ष्ममलम् **अपः** आपोलोकेऽपि **मा प्रापत्**, न गच्छेत् । हे **अग्ने यमं** यमदेवं, **च सर्वान्** समस्तान् **पितॄन्** पितृजनानपि **तत् मा प्रापत्** न पीडयेदित्यर्थः । प्रत्युत तन्मलं त्वय्येव यक्ष्मरोगे विलीनं भवत्विति भावः ।

सं त्वा नह्यामि पयसा पृथिव्याः सं त्वा नह्यामि पयसौषधीनाम् ।
सं त्वा नह्यामि प्रजया धनेन सा संनद्धा सनुहि वाजमेमम् ।।७०।।

पदपाठः

सम् । त्वा । नह्यामि । पयसा । पृथिव्याः । सम् । त्वा । नह्यामि । पयसा । ओषधीनाम् । सम् । त्वा । नह्यामि । प्रऽजया । धनेन । सा । सम्ऽनद्धा । सनुहि । वाजम् । आ । इमम् ।। ७० ।।

हे नवोद्वाहे जाये ! अहं त्वां सम्प्रति गृहे समायातां त्वां, **पृथिव्याः** भूम्याः **पयसा** 'रसो वै पयः' (श० ब्रा० ४।४।४।८) रसेन, पार्थिवरसेनेत्यर्थः, यद्वा 'प्राणः पयः' (श० ब्रा० ६।५।४।१५) प्रार्थिवप्राणेन **संनह्यामि** सम्यक् सुबद्धां करोमि । **ओषधीनां पयसा** अपि व्रीहियवाद्योषधीनां रसेनापि **त्वा** त्वां **संनह्यामि** सुबद्धां करोमि । **प्रजया** सन्तत्या, **धनेन च** धनसमृद्धया चापि **त्वा** त्वां **संनह्यामि** । त्वां सर्वैरेव रसैः संयोजयामीत्यर्थः । अतः सम्प्रति **सा** त्वं **संनद्धा** सर्वरसाप्लुता, मम प्रणयसुबद्धा वा **इमं वाजम्** अन्नं बलं वा मह्यम् **आसनुहि** देहि । षणु दाने (तवा०) धातोः रूपम् ।

अमोहमस्मि सा त्वं सामाहमस्म्यृक्त्वं द्यौरहं पृथिवी त्वम् ।
ताविह सं भवाव प्रजामा जनयावहै ।। ७१ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अमः । अहम् । अस्मि । सा । त्वम् । साम । अहम् । अस्मि । ऋक् । त्वम् । द्यौः । अहम् । पृथिवी । त्वम् । तौ । इह । सम् । भवाव । प्रऽजाम् । आ । जनयावहै ।। ७१ ।।

नवोढ्वाहितो वरो वधूं ब्रूते । अहं त्वदीयो भर्त्ता **अमः** 'भयं बलं वेति' निरुक्तभाष्यम् (१०।२) । बलमस्मि । यद्वा गृहनामसु पाठात् (निघं० ३।४) गृहमस्मि । गृहवत् आश्रयस्थानभूतोऽस्मीति भावः । **त्वं** च **सा** शक्तिर्यद्वा गृहिणी असि । अमो मुख्यप्राणः, सा च वागित्यपि कश्चित् व्याचख्यौ । तथा **अहं साम** सामवेदः **अस्मि त्वं** च **ऋक्** ऋग्रूपा वर्त्तसे यद्वा अहं 'क्षत्रं वै साम' (श० ब्रा० १२।८।३।२३) क्षत्रस्वरूपोऽस्मि तव रक्षकः । त्वं च 'ब्रह्म वा ऋक्' (कौ० ७।१०) ब्रह्मरूपाऽसि, मया रक्षणीयाऽसीत्यर्थः । **अहं द्यौः**, द्युलोकस्थानीयोऽस्मि, **त्वं पृथिवी** त्वं च पृथिवीस्थानीयाऽसि । ईदृशौ **तौ** आवां जायापती **इह** गार्हस्थ्ये **सम्भवाव** संमिलितौ भवेव । **प्रजां** च सन्ततिं च **आजनयावहै** उत्पादयाव ।

जनियन्ति नावग्रवः पुत्रियन्ति सुदानवः ।
अरिष्टासू सचेवहि बृहते वाजसातये ।। ७२ ।।

पदपाठः

जनिऽयन्ति । नौ । अग्रवः । पुत्रिऽयन्ति । सुऽदानवः । अरिष्टासू इत्यरिष्टऽअसू । सचेवहि । बृहते । वाजऽसातये ।। ७२ ।।

जनियन्ति जायन्त आस्वपत्यानीति जनयो जायाः, ताः इच्छन्ति यद्वा ताः इच्छन्तः । जनधातोः क्यच् 'सुप आत्मनः क्यच्' (पा० सू० ३।१।८), 'अपुत्रादीनामिति वक्तव्यम्' (वा० पा० ७।४।३५) इति प्राप्तस्य ईत्वस्य छान्दसो ह्रस्वः । **पुत्रियन्ति** पुत्रान् इच्छन्ति, यद्वा पुत्रान् इच्छन्तः के **सुदानवः** शोभनदानाः **अग्रवः** उपगन्तारो लोकाः । अर्थात् दानशीला उपगन्तारो जनाः स्त्रियमिच्छन्ति पुत्रांश्च वाञ्छन्ति । अतः आवाम् **अरिष्टासू** अहिंसितप्राणौ प्राणशक्तिसम्पन्नावित्यर्थः **बृहते** महते **वाजसातये** बलवीर्यप्राप्त्यर्थं **सचेवहि** सङ्गतौ भवेव । पाठभेदेन प्राप्यते मन्त्रोऽयमृग्वेदेऽपि (ऋ० ७।९६।४) ।

ये पितरो वधूदर्शा इमं वहतुमागमन् ।
ते अस्यै वध्वै ३ संपत्न्यै प्रजावच्छर्म यच्छन्तु ।।७३।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ये । पितरः । वधूऽदर्शाः । इमम् । वहतुम् । आऽअगमन् । ते । अस्यै । वध्वैऽ । सम्ऽपत्न्यै । प्रजाऽवत् । शर्म । यच्छन्तु ।।७३।।

हे **पितरः** पितृजनाः, वृद्धपुरुषा इत्यर्थः । कीदृशाः । **वधूदर्शाः** नववधूदर्शकाः । दृशिर् दर्शने (भ्वा०) धातोः अण् । वधूं दिदृक्षवः इत्यर्थः । **इमाम्** एतं **वहतुं** रथं यद्वा कन्यादानकाले प्रदत्तं वस्तुजातम्, यौतकमित्यर्थः द्रष्टुं विवाहस्थलेऽत्र **आगमन्** समागताः सन्ति **ते** सर्वे **अस्यै वध्वै पत्न्यै** नवोढायै **प्रजावत्** सन्तानसमुपेतं **शर्म** सुखं सुखाशीर्वादं **संयच्छन्तु** प्रददतु ।

येदं पूर्वागन् रशनायमाना प्रजामस्यै द्रविणं चेह दत्वा ।

तां वहन्त्वगतस्यानु पन्थां विराडियं सुप्रजा अत्यजैषीत् ।।७४।।

पदपाठ;

या । इदम् । पूर्वा । अगन् । रशनाऽयमाना । प्रऽजाम् । अस्यै । द्रविणम् । च । इह । दत्वा । ताम् । वहन्तु । अगतस्य । अनु । पन्थाम् । विऽराट् । इयम् । सुऽप्रजाः । अति । अजैषीत् ।।७४।।

या पूर्वा प्रथमा, अर्थात् प्रथममिह या **रशनायमाना** रशनां शृङ्खलामिवाचरन्ती **अगन्** आगताऽस्ति । अर्थात् लोकाचारानुसारं पत्न्याः चेलाञ्चलेन ग्रन्थिबन्धनं विधाय रशनानिबद्धेव या वृद्धजनपङ्क्तिरत्र सर्वप्रथमं समवेता वर्त्तते इति । सा हि **अस्यै** नवोद्वाहायै **इह प्रजां** सन्ततिम्, **इदम्** एतत् **द्रविणं** धनं **च** द्वयोराशीर्वादमित्यर्थः, **दत्वा** प्रदाय, गच्छतु इति शेषः । ततश्च भर्तृकुलकुटुम्बिनो लोकाः **ताम्** इमां वधूम् **अगतस्य** केनापि पूर्वमनाचरितस्य **पन्थां** मार्गम् अनुवहन्तु **नयन्तु** । परमोत्तमे गार्हस्थ्यमार्गे वधूमेनां नयन्त्वित्यर्थः । येन **इयं विराट्** विशेषरूपेण राजमाना सती **सुप्रजा** प्रजावती भूत्वा **अति अजैषीत्** अत्यन्तं जयं लभेत ।

प्र बुध्यस्व सुबुधा बुध्यमाना दीर्घायुत्वाय शतशारदाय ।

गृहान् गच्छ गृहपत्नी यथासो दीर्घं त आयुः सविता कृणोतु ।।

पदपाठ;

प्र । बुध्यस्व । सुऽबुधा । बुध्यमाना । दीर्घायुऽत्वाय । शतऽशारदाय । गृहान् । गच्छ । गृहऽपत्नी । यथा । असः । दीर्घम् । ते । आयुः । सविता । कृणोतु ।। ७५ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे नववधु यद्वा हे तनये ! त्वं **शतशारदाय** शतवर्षयुताय **दीर्घायुत्वाय** दीर्घजीवनाय, शतवर्षात्मकं पूर्णं जीवनं लब्धुम् इत्यर्थः । **बुध्यमाना** वृद्धजनैः प्रबोध्यमाना सती **सुबुधा** सुन्दरमनस्विनी भूत्वा **प्रबुध्यस्व** सदैव जागरूका तिष्ठ । यद्वा प्रतिदिनं सर्वतः पूर्वं जागृहि । साम्प्रतं त्वं **गृहान्** पतिभवनं निवासभवनं वा **गच्छ** याहि । **यथा** येन त्वं **गृहपत्नी** गृहस्वामिनी **असः** भवेः । **सविता** सर्वप्रेरको भगवान् सूर्यः **ते** त्वदीयम् **आयुः** जीवनं **दीर्घं** प्रवृद्धं **कृणोतु** करोतु ।

इति द्वितीयेऽनुवाके प्रथमं सूक्तम् ।

इति द्वितीयोऽनुवाकः ।

इति चतुर्दशं काण्डं समाप्तम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री गुरुगङ्गेश्वरग्रन्थमालापुष्प–२९

शौनकीयायाः

अथर्ववेदसंहितायाः

पञ्चदशं काण्डम्

अभिनवसायणभाष्येण समन्वितम्

卐

भाष्यकाराः

वेद-दर्शनाचार्य - महामण्डलेश्वर–

श्रीस्वामि-गङ्गेश्वरानन्दा उदासीनाः

❖

सम्पादकौ

स्वामी गोविन्दानन्दो वेदान्ताचार्यः

तथा

महामहिमोपाध्यायः विद्यावाचस्पतिः

आचार्य - नवलकिशोर - काङ्करः

卐

प्रकाशकः

सद्गुरु गङ्गेश्वर इण्टरनेशनल वेदमिशन

बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

शौनकीयायाम् अथर्ववेदसंहितायां

पञ्चदशं काण्डम्

मङ्गलम्

विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान् ।
पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान् ।।१।।

श्रौतवंशसमुद्भूतः श्रौतमार्गप्रवर्त्तकः ।
भक्ति-विक्ति-समुच्चेता श्रीचन्द्रः पातु सद्गुरुः ।।२।।

स्वान्त-ध्वान्तमपाकुर्वन् वेदविज्ञान-भानुना ।
सर्वं समीहितं देयाद्रामानन्दो दिवाकरः ।।३।।

अभिनवमिदं भाष्यं सायणकृतिसन्निभम् ।
अनुपलब्ध-तद्भाष्यस्थाने निर्मीयतेऽधुना ।।४।।

प्रथमं पर्याय सूक्तम्

'व्रात्य आसीत्' इत्यारभ्य 'अह्ना प्रत्यङ्' इत्यन्तानामष्टादशपर्यायाणामथर्वा ऋषिः । प्रथमादिचतुर्णां षष्ठादित्रयोदशानाञ्च पर्यायाणामध्यात्मं व्रात्यो वा पञ्चमस्य च रुद्रो देवता ।

अष्टर्चस्यास्य पर्यायस्य प्रथमर्चः साम्नी पङ्क्तिः, द्वितीयायाः द्विपदा साम्नी बृहती, तृतीयाया एकपदा यजुर्ब्राह्म्यनुष्टुप् । चतुर्थ्या एकपदा विराड्गायत्री, पञ्चम्याः साम्न्यनुष्टुप्, षष्ठ्यास्त्रिपदा प्राजापत्या बृहती, सप्तम्या आसुरी पङ्क्तिः । अष्टम्याश्च त्रिपदानुष्टुप् छन्दांसि ।

अत्र काण्डे व्रात्यमहिमा प्रपञ्च्यते । व्रात्यो नाम उपनयनादिसंस्कारहीनः पुरुषः । सोऽर्थाद् वेदविहिताः यज्ञादिक्रियाः कर्तुं नाधिकारी, न स व्यवहारयोग्यश्चेत्यादि-जनमतम् अनादृत्य व्रात्योऽधिकारी, व्रात्यो महानुभावो, व्रात्यो देवप्रियो, व्रात्यो ब्राह्मणक्षत्रिययोर्वर्चसो मूलम् । किं बहुना, व्रात्यो देवाधिदेव एवेति प्रतिपाद्यते । यत्र व्रात्यो गच्छति विश्वं जगद् विश्वे च देवास्तमनुगच्छन्ति, तस्मिन्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स्थिते तिष्ठन्ति तस्मिंश्चलति ते चलन्ति। यदा स गच्छति राजवत् स गच्छतीत्यादि। न पुनरेतत् सर्वव्रात्यपरं प्रतिपादनम्, अपि तु कञ्चिद् विद्वत्तमं महाधिकारं पुण्यशीलं विश्वसंमान्यं कर्मपरैर्ब्राह्मणैर्विद्विष्टं व्रात्यम् अनुलक्ष्य वचनमिति मन्तव्यम्।

व्रात्य आसीदीयमान एव स प्रजापतिं समैरयत् ॥१॥

पदपाठः

व्रात्यः। आसीत्। ईयमानः। एव। सः। प्रजाऽपतिम्। सम्। ऐरयत् ॥१॥

व्रात्यः सकलसृष्टिप्रपञ्चसमूहस्य हितैषी गणाध्यक्षः परमेश्वरः सृष्टेः प्राक्, **ईयमानः** ईङ् गतौ (दिवा०) धातोः शानच्। गच्छन्, आत्मस्वरूपे वर्त्तमानः इत्यर्थः। **आसीत्** अवर्त्तत। यद्वा स एव व्रात्यस्तदानीं **सर्वप्रेरक** आसीत्। **स** व्रात्यः अव्याकृतः परमेश्वरः सृष्टिकामः **प्रजापतिम्** 'आत्मा वै प्रजापतिः' (श०ब्रा० ४।५।६।२) इति श्रुतेस्तदानीम् अव्याकृतरूपत्वात् स्वकीयम् आत्मानमेव **सम् ऐरयत्** सृष्टिं विधातुं प्रेरयामास। अत एवामनन्ति इमे आथर्वणिकाः "तद् यद् अब्रवीत्— प्रजाः सृष्ट्वा पालयस्वेति, तस्मात् प्रजापतिरभवत्। तत् प्रजापतेः प्रजापतित्वम्" (गोप० ब्रा० पू० १।४) इति। ऐरयत्। ईर गतौ (अदा०) धातोः णिचि लङ्। व्रात्यः, व्रातशब्दात् इवार्थे 'शाखादिभ्यो यः' (पा०सू० ५।३।१०३) इति यः। शरीरायासजीवी व्याधादिर्व्रातः स इव — इत्यर्थेऽयं यः प्रत्ययः। यद्वा व्रातमर्हति इत्यर्थे 'दण्डादिभ्यो यः' (पा०सू० ५।१।६६) इत्यनेन यः। व्रातः समूहः इत्यमरः (२।२।३९)। मनुष्यः इति च निघण्टुः (२।३)। अत एव सायणः 'पञ्चव्राताः पञ्चजनाः' इति व्याचख्यौ अन्यत्र (ऋ०सं० ९।१४।२) इति। 'व्रातात् संस्कारसमूहात् च्यवति इति व्रात्यः' इति शब्दकल्पद्रुमः। अत एव 'व्रात्यः संस्कारहीनः स्यात्' (अमरकोषः २।८।५३) इत्यमरोक्तिः संगच्छते। सोऽयं दशसंस्काररहितः, षोडशवर्षादूर्ध्वं चाप्यकृतव्रतबन्धो भ्रष्टगायत्रीको वेति व्रात्यः इति धर्मशास्त्रिणः। यथोक्तञ्च मनुना "अत ऊर्ध्वं त्रयोऽप्येते यथाकालमसंस्कृताः। सावित्रीपतिता व्रात्याः" इति। एवं हि स्मृतिप्रभृतिषु शास्त्रेषु वेदमर्यादाविहीनो जनो व्रात्यशब्देन व्यवहृतः। किन्त्वत्र सूक्ते स्मृत्यादिप्रतिपादिताद् व्रात्यात् सर्वथा भिन्न एव व्रात्यो वर्त्तते। अत्र व्रात्यशब्देन यज्ञेश्वरः, देवप्रियः, ब्राह्मण-क्षत्रिययोर्वर्चसो मूलभूतश्च परमात्मा प्रतिपादितः। तदधीनमेव निखिलं जगद् वरीवर्त्ति। स एव हि जगन्नियामकः। स एव च गणाध्यक्षः। अत एव शुक्लयजुर्वेदीया रुद्राष्टाध्यायी भगवन्तं रुद्रं स्तवीति— "नमो गणेभ्यो गणपतिभ्यश्च वो नमो नमः। व्रातेभ्यो व्रातपतिश्च वो नमो नमः'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(शु०य० १६) इति। एवमेव जैमिनीये ब्राह्मणेऽपि तद्दिव्यता श्रूयते "दिव्या वै व्रात्याः" (जै० ब्रा० २।२२१), तथा "त एते व्रात्या आर्छंन्निमं वैव योऽयं पवते। ईशानं वा देवम् (जै० ब्रा० २।२२१) इति च।

स प्रजापतिः सुवर्णमात्मन्नपश्यत् तत् प्राजनयत् ॥२॥

पदपाठः

सः। प्रजाऽपतिः। सुवर्णम्। आत्मन्। अपश्यत्। तत्। प्र। अजनयत् ॥२॥

सः असौ **प्रजापतिः** प्रजानां पाता वेधा **आत्मन्** आत्मनि **सुवर्णं** सुवर्णतुल्यं ज्योतिः। यद्वा सुन्दरं रमणीयं सृष्टिरचनासामर्थ्यम् **अपश्यत्** दृष्टवान्, अन्वभवदित्यर्थः। ततः स **तत्** सृष्टिचक्रं **प्राजनयत्** उत्पादितवान् प्रजास्ततानेत्यर्थः। अर्थात् स एव व्रात्यः परमेश्वरः प्रजापतिरूपेण आत्मानं परिणमय्य ज्योतिःस्वरूपेण चात्मानं प्रत्यक्षीकृत्य 'तत् सृष्ट्वा तदेवानुप्राविशत्' इति श्रौतवचनानुसारं सृष्टिं चकार इति।

तदेकमभवत् तल्ललाममभवत् तन्महदभवत् तज्ज्येष्ठमभवत् तद् ब्रह्माभवत् तत् तपोऽभवत् तत् सत्यमभवत् तेन प्राजायत ॥३॥

पदपाठः

तत्। एकम्। अभवत्। तत्। ललामम्। अभवत्। तत्। महत्। अभवत्। तत्। ज्येष्ठम्। अभवत्। तत्। ब्रह्म। अभवत्। तत्। तपः। अभवत्। तत्। सत्यम्। अभवत्। तेन। प्र। अजायत ॥३॥

तद् व्रात्यब्रह्म **एकम् अभवत्** तदेकमेवासीदित्यर्थः। अत एवोच्यते—"कतम एको देवः इति स, ब्रह्म त्यदित्याचक्षते" (श०ब्रा० १४।६।९।१०) इति। **तद्** ब्रह्म **ललामम् अभवत्** सुन्दरम् आसीत्। यतो ललामत्वेनैव तेजो धार्यते। यथा चामनन्ति तैत्तिरीयकाः 'ललामो भवति, तत् तेजो दधाति' (तै० सं० २।१।१०।१) इति। **तद्** ब्रह्म **महत्** अपरिमितम् **अभवत्** अविच्छिन्नमासीदित्यर्थः। **तद्** ब्रह्म **ज्येष्ठं** सर्वोत्कृष्टम् **अभवत्** आसीत्। 'ब्रह्म वै भूतानां ज्येष्ठम्' (तै० ब्रा० २।८।८।१०) इति श्रुतेः **तद्** एव **ब्रह्म** ब्रह्माभवत्। अत एव प्रतिपादयन्ति तैत्तिरीयकाः 'ब्रह्म ब्रह्माभवत् स्वयम्' (तै० ब्रा० ३।१२।९।३) इति। **तत्** व्रात्यब्रह्म **तपः अभवत्**। **तत्** एव च ब्रह्म **सत्यम् अभवत्**। 'सत्यं ब्रह्मणि प्रतिष्ठिम्' (ऐ०ब्रा० ३।६) इत्युक्तेः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

एतादृशेन **तेन ब्रह्मणा प्राजायत** इयं सृष्टिः प्रादुर्बभूव । यद्वा तस्यैव ब्रह्मणः तेन सामर्थ्येन सृष्टिरजायत ।

सोऽवर्धत स महानभवत् स महादेवोऽभवत् ।।४।।

पदपाठः

सः । अवर्धत । सः । महान् । अभवत् । सः । महाऽदेवः । अभवत् ।।४।।

स व्रात्यपरमेश्वरः, **अवर्धत** आत्ममहिम्ना वृद्धिं गतः । वृद्धिं यातश्च **स** परमेश्वरः **महान् अभवत्** महत्त्वशाली जातः । ततः **स महान् देवः** महाशब्दाभिधेयः, अथवा प्रकाशशीलः **अभवत्** सञ्जातः । महा+दिवु द्युतौ व्यवहारे च (दि०) धातोः अच् । महादेवश्चन्द्राधिष्ठाता देवः इति वैदिकाः ।

स देवानामीशां पर्यैत् स ईशानोऽभवत् ।।५।।

पदपाठः

सः । देवानाम् । ईशाम् । परि । ऐत् । सः । ईशानः । अभवत् ।।५।।

स हि व्रात्यः **देवानां** द्योतनशीलानां देवप्राणानाम् **ईशां** शक्तिं विभूतिमित्यपि कश्चित्, **पर्यैत्** परितः प्राप्नोत् । अत एव **सः** व्रात्यः **ईशानः** सामर्थ्यशाली शासकः ऐश्वर्यवान् वा **अभवत्** बभूव । ईशानः ईश ऐश्वर्ये (अ०) धातो **'ताच्छील्यवयो०'** (पा० स० ३।२।१२९) इति ताच्छीलिकः चानश् । ईशानः सूर्यस्य अधिष्ठाता देवः इति वैदिकाः ।

स एकव्रात्योऽभवत् स धनुरादत्त तदेवेन्द्रधनुः ।।६।।

पदपाठः

सः । एकऽव्रात्यः । अभवत् । सः । धनुः । आ । अदत्त । तत् । एव । इन्द्रऽधनुः ।।६।।

स एव **एकव्रात्यः** अद्वितीयो गणाधिपतिः **अभवत्** । **सः** व्रात्यः **धनुः 'वज्रो वै धनुः'** (मैत्रा० ४।४।३) वज्रं वज्रतुल्यं सामर्थ्यम् इत्यर्थः । यद्वा धन्वतेर्गतिकर्मणः (नि० ९।२६) प्रेरणाशक्तिम् **आदत्त** अगृह्णात् आत्माधीनां कृतवानित्यर्थः । **तदेव** हि धनुः सामर्थ्यम्, **इन्द्रधनुः** 'इन्द्रो ब्रह्मेति' (कौषी० ६।१४) इति श्रुतेः **आत्मसामर्थ्यम्** अभूत् ।

नीलमस्योदरं लोहितं पृष्ठम् ।।७।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

नीलम् । अस्य । उदरम् । लोहितम् । पृष्ठम् ।।७।।

अस्य व्रात्यस्य **उदरं** जठरं **नीलं** नीलवर्णम् अभवत्, **पृष्ठं** च, पृष्ठस्थानं च **लोहितं** रक्तमभवत् । नीलं निश्चितज्ञानमित्यन्यः । निपूर्वकात् इल प्रेरणे (चु०) धातोः कः । इलेति वाङ्नाम (निघं० १।११) । लोहितमुत्पादनसामर्थ्यमित्यपि कश्चित् ।

नीलेनैवाप्रियं भ्रातृव्यं प्रोर्णोति लोहितेन द्विषन्तं
विध्यतीति ब्रह्मवादिनो वदन्ति ।।८।।

पदपाठः

नीलेन । एव । अप्रियम् । भ्रातृव्यम् । प्र । ऊर्णोति । लोहितेन । द्विषन्तम् । विध्यति । इति । ब्रह्मऽवादिनः । वदन्ति ।।८।।

स हि व्रात्यपरमेश्वरः आत्मनः **नीलेन** नीलवर्णेन एव भागेन तमःस्वरूपेण **अप्रियम्** अनिष्टकारिणं **भ्रातृव्यं** वैरिणं, **प्रोर्णोति** आच्छादयति हिनस्तीत्यर्थः । **लोहितेन** रक्तेन आत्मनः अंशेन रजोरूपेण क्रोधेनेत्यर्थः, **द्विषन्तं** द्वेषकारिणं जनं **विध्यति** छिनत्ति इति **ब्रह्मवादिनः** वेदवेत्तारो महर्षयो **वदन्ति** कथयन्ति । प्रोर्णोति प्रपूर्वकात् ऊर्णुञ् आच्छादने (अ०) धातोर्लट् ।

इति प्रथमेऽनुवाके प्रथमं पर्यायसूक्तम् ।

द्वितीयं पर्यायसूक्तम्

अष्टाविंशत्यृचस्य पर्यायस्यास्य प्रथमा–षष्ठी–नवमी–पञ्चदश्येकविंशी–षड्विंशीनामृचां साम्न्यनुष्टुप्, द्वितीया–षोडशी-द्वाविंशीनां साम्नी त्रिष्टुप्, तृतीयाया द्विपदार्षी पङ्क्तिः, चतुर्थ्यष्टादशी-चतुर्विंशीनां द्विपदा ब्राह्मी गायत्री, पञ्चमी-त्रयोदशी-पञ्चविंशीनां द्विपदार्ची जगती, सप्तम्याश्चतुर्दशीविंश्यो-द्वितीयावसानर्चोः सप्तविंश्याश्च पदपङ्क्तिः, अष्टम्याश्चतुर्दशीविंश्योस्तृतीयावसानर्चोरष्टाविंश्याश्च त्रिपदा प्राजापत्या त्रिष्टुप्, दशम्या एकपदोष्णिक्, एकादश्या द्विपदार्षी भुरिक्त्रिष्टुप्, द्वादश्या आर्षी परानुष्टुप्, चतुर्दश्याः प्रथमावसानर्चः साम्नी पङ्क्तिः, सप्तदश्या द्विपदा विराडार्षी पङ्क्तिः, एकोनविंश्या द्विपदा विराडार्ची जगती, विंश्या आसुरी गायत्री, त्रयोविंश्याश्च निचृदार्षी पङ्क्तिश्छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स उदतिष्ठत् स प्राचीं दिशमनु व्य॒चलत् ॥१॥

पदपाठः

सः । उत् । अतिष्ठत् । सः । प्राचीम् । दिशम् । अनु । वि । अचलत् ॥१॥

सः व्रात्याभिधेयः परमात्मा **उदतिष्ठत्** उदस्थात् । सर्वसमक्षम् आविरभूत् इत्यर्थः । आविर्भूय सः व्रात्यः **प्राचीं दिशम् अनु** अभिमुखीभूतां पूर्वदिशम् अनुलक्ष्य **व्यचलत्** विविधं चचाल । प्रकटीभूय स पूर्वं पूर्वस्यां दिशि प्रससारेत्यर्थः ।

तं बृहच्च रथन्तरं चादित्याश्च विश्वे च देवा

अनुव्य॒चलन् ॥२॥

पदपाठः

तम् । बृहत् । च । रथम्ऽतरम् । च । आदित्याः । च । विश्वे । च । देवाः । अनुऽव्यऽचलन् ॥२॥

व्रात्यस्य विराट्स्वरूपं प्रतिपादयति श्रुतिः । **तं** व्रात्यम् **अनु** पूर्वप्रतिपादितं तं व्रात्यपरमात्मानम् अनुसृत्य **बृहत्** 'असौ वै द्युलोको बृहत्' (श०ब्रा० ८।५।२।५) तथा 'अन्तो बृहत् साम्नाम्' (ता० ब्रा० १९।१२।८) बृहत्सामोपलक्षितो द्युलोक इत्यर्थः, **रथन्तरञ्च** 'इयं वै पृथ्वी रथन्तरम्' (काठ० ३३।२) रथन्तरसामोपलक्षितः पृथ्वीलोकश्च । यद्वा 'मनो वै बृहत्' (ता० ब्रा० ७।६।१७) 'वाग् वै रथन्तरम्' (ऐ० ब्रा० ४।२८) इति श्रुतेश्च मनश्च वाक् च । **आदित्याः** द्वादशादित्याः अर्थात् सूर्योपलक्षितः सकलं सौरमण्डलम्, एवं **विश्वे देवाश्च** सर्वे देवगणाश्च **व्यचलन्** तमनुलक्ष्य प्राचलन्, तमनुसृतवन्तः इत्यर्थः ।

बृहते च वै स रथन्तराय चादित्येभ्यश्च

विश्वेभ्यश्च देवेभ्य आ वृश्चते य एवं

विद्वांसं व्रात्यमुपवदति ॥३॥

पदपाठः

बृहते । च । वै । सः । रथम्ऽतराय । च । आदित्येभ्यः । च । विश्वेभ्यः । च । देवेभ्यः । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः खलु पापीयान् **एवम्** एतादृशं विद्वांसं, 'विद्वान् प्रजानन्' इति **निरुक्तम्** (८।३।२०), विज्ञातारम् । यद्वा "विद्वांसो हि देवाः" (श० ब्रा० ३।७।३।१०) देवाधिदेवं व्रात्यं परमात्मानम्, **उपवदति** निन्दति, **स वै** निश्चयेन सः जनः **बृहते** बृहत्सामोपलक्षिताय द्युलोकाय, **रथन्तराय** रथन्तरसामोपलक्षिताय भूलोकाय, **आदित्येभ्यः** द्वादशादित्योपलक्षिताय सौरमण्डलाय, एवं **विश्वेभ्यश्च देवेभ्यः** सर्वेभ्य एव देवगणेभ्यः **आवृश्चते** 'वृश्चतिर्वधकर्मेति' निघण्टुः (२।१९), वधकल्पं पापं करोति । स पापीयान् भवति यो व्रात्यमपवदतीत्यर्थः ।

बृहतश्च वै स रथन्तरस्य चादित्यानां च
विश्वेषां च देवानां प्रियं धाम भवति य
एवं वेद ।।४।।

पदपाठः

बृहतः । च । वै । सः । रथम्ऽतरस्य । च । आदित्यानाम् । च । विश्वेषाम् । च । देवानाम् । प्रियम् । धाम । भवति । यः । एवम् । वेद ।।४।।

यः खलु पुरुष **एवं** एवंविधं सर्वत्र व्याप्तम् **एनं** व्रात्यं परमात्मानं **वेद** जानाति स **वै बृहतश्च** द्युलोकस्य तथा **रथन्तरस्य** भूलोकस्य, **आदित्यानां च** द्वादशादित्यानामपि, **विश्वेषां** सर्वेषां, **देवानां** देवगणानां च **प्रियं धाम** परमप्रियतास्थानं **भवति** जायते । व्रात्यपरमेश्वरस्य विराट्स्वरूपं जानानो जनः सर्वस्यैव देवगणस्य **प्रियो** भवतीत्यर्थः ।

तस्य प्राच्यां दिशि श्रद्धा पुंश्चली मित्रो मागधो
विज्ञानं वासोहरुष्णीषं रात्री केशा हरितौ प्रवर्तौ
कल्मलिर्मणिः ।।५।।

पदपाठः

तस्य । प्राच्याम् । दिशि । श्रद्धा । पुंश्चली । मित्रः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ।।५।।

प्राच्यां दिशि पूर्वस्यां दिशायाम्, **तस्य** विराट्स्वरूपस्य व्रात्यस्य **श्रद्धा** संस्पृहा 'श्रद्धा संप्रत्ययः स्पृहा' इत्यमरः (३।३।१०२) । यद्वा 'श्रद्धा वा आपः'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(तै० ब्रा० ३।२।४।१) आपोदेव्यः। अथवा 'श्रद्धा वा सूर्यस्य दुहिता' (श० ब्रा० १२।७।३।१) सूर्यतनया सूर्या तु **पुंश्चली** स्वागतार्थं गृहे पुरुषेषु अपि विचरणशीला योषित्, स्वागतकारिणी इत्यर्थः आसीत्। **मित्रः** सूर्यः **मागधः** स्तुतिपाठको बभूव। **विज्ञानं** विविधं ज्ञानमेव **वासः** वस्त्रम्, । **अहः** दिनम् **उष्णीषं** शिरोवेष्टनम्, **रात्री** निशा **केशाः** शिरोरुहस्थानीयाः, **हरितौ** हरणशीलौ सूर्याचन्द्रमसौ **प्रवर्त्तौ** वर्त्तुले द्वे कुण्डले जाते, **कल्मलिश्च**, ज्वलतो नामधेयमेतत् (निघं० १।१७) 'कलयति अपगमयति मलमिति कल्मलिः'' इत्यन्यत्र सायणः व्याचख्यौ (ऋ० सं० २।३३।८)। जाज्वल्यमानो द्युलोकस्थतारागणः तस्य व्रात्यस्य **मणिः** मणिभूषणमभूत्। मणिरित्यत्र मण शब्दार्थे (भ्वा०) धातोः 'सर्वधातुभ्य इन्' (उ० ४।११८) इत्यौणादिकः इन्।

भूतं च भविष्यच्च परिष्कन्दौ मनो विपथम् ॥६॥

पदपाठः

भूतम्। च। भविष्यत्। च। परिऽस्कन्दौ। मनः। विऽपथम् ॥६॥

तस्य **भूतम्** अतीतम्, **भविष्यत्** आगामिवस्तुजातं च **परिष्कन्दौ** 'स्कन्दिर् गतिशोषणयोः (भ्वा०) धातोः कर्त्तरि अच् यद्वा घञ्। परितः गन्तारौ। **मनश्च विपथं** विविधमार्गे गमनशीलो रथः अभवदिति शेषः।

मातरिश्वा च पवमानश्च विपथवाहौ
वातः सारथी रेष्मा प्रतोदः कीर्तिश्च
यशश्च पुरःसरौ ॥७॥

पदपाठः

मातरिश्वा। च। पवमानः। च। विपथऽवाहौ। वातः। सारथिः। रेष्मा। प्रऽतोदः। कीर्तिः। च। यशः। च। पुरःऽसरौ ॥७॥

तस्य **मातरिश्वा** 'प्राणो मातरिश्वा' (ऐ० ब्रा० २।३८) इति श्रुतेः प्राणसंघः। **पवमानश्च** 'अयं वायुः पवमानः' (श० ब्रा० २।५।१।५) वायुश्च, इमौ द्वौ श्वासोच्छ्वासावित्यपि कश्चित् मनुते। **विपथवाहौ** रथवाहकौ अश्वौ स्तः। **वातः** प्राणवातः **सारथिः** रथसञ्चालकः सूतो वर्त्तते। **रेष्मा,** हिंसार्थक-रिष (भ्वा०)। धातोः कर्त्तरि मनिन्, विध्वंसको झञ्झावातः। **प्रतोदः,** तुद व्यथने (तु०) धातोर्घञ्। अश्ववृषभादिताडनदण्डः कशाभिधेयो वभूव। **कीर्त्तिः यशः च** अस्य व्रात्यस्य **पुरःसरौ** अग्रगामिनौ सेवकौ वर्त्तेते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऐनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥८॥

पदपाठः

आ । एनम् । कीर्तिः । गच्छति । आ । यशः । गच्छति । यः । एवम् । वेद ॥८॥

यो जनः एवम् अनेन प्रकारेण व्रात्यं सर्वव्यापकं **वेद** जानाति, **एनं** एवंजानानम् एतं पुरुषं धनादिनिबन्धना **कीर्त्तिः** आगच्छति । वैदुष्यादिसमुद्भूतं **यशश्च** आगच्छति । व्रात्यं सर्वव्यापकं मन्वानो जनः कीर्त्या यशसा च परिगृह्यते इत्यर्थः ।

स उदतिष्ठत् स दक्षिणां दिशमनु व्यऽचलत् ॥९॥

पदपाठः

सः । उत् । अतिष्ठत् । सः । दक्षिणाम् । दिशम् । अनु । वि । अचलत् ॥९॥

स व्रात्यपरमेश्वरः **उदतिष्ठत्** उदस्थात्, आविरभूदित्यर्थः । आविर्भूय **स** व्रात्यः **दक्षिणां दिशम् अनु** दक्षिणदिशाम् अनुलक्ष्य **व्यचलत्** विविधमचालीत् । प्रकटीभूय स दक्षिणदिशायां प्रससारेत्यर्थः ।

तं यज्ञायज्ञियं च वामदेव्यं च यज्ञश्च
यजमानश्च पशवश्चानु व्यऽचलन् ॥१०॥

पदपाठः

तम् । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । यज्ञः । च । यजमानः । च । पशवः । च । अनुऽव्यऽचलन् ॥१०॥

तं व्रात्यं परमात्मानम् **अनु** अनुसृत्य **यज्ञायज्ञियं** नाम साम यद्वा स्वर्गो लोकः 'स्वर्गो वै लोकः यज्ञायज्ञियम्' (श० ब्रा० ९।४।५।१०) इति श्रुतेः, चकारः समुच्चयार्थः, **वामदेव्यं** च वामदेव्यं नाम साम, यद्वा प्रजापतिः 'प्रजापतिर्वै वामदेव्यम्' (श० ब्रा० १।३।३।४) इति प्रामाण्यात्, **यज्ञः यजमानश्च** यज्ञपुरुषः यज्ञपतिर्वा, **पशवश्च** पुरुषाश्वगवाव्यजाः इति पञ्च पशवः, यद्वा 'आत्मा वै पशवः' (कौषी० १२।७) आत्मा अपि चैते सर्वे **व्यचलन्** तमनुसृतवन्तः ।

यज्ञायज्ञियाय च वै स वामदेव्याय च
यज्ञाय च यजमानाय च पशुभ्य-
श्चावृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥११॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यज्ञायज्ञियाय । च । वै । सः । वामऽदेव्याय । च । यज्ञाय । च । यजमानाय । च । पशुऽभ्यः । च । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥११॥

यो हि जनः **एवं** एवंविधं **विद्वांसं** सर्वज्ञं यद्वा देवेश्वरं **व्रात्यम् उपवदति** निन्दति **स वै** निश्चयेनासौ **यज्ञायज्ञियाय** एतन्नाम्ने साम्ने, यद्वा 'स्वर्गो वै लोको यज्ञायज्ञियः' (श० ब्रा० ९।४।५।१०) स्वर्गाय लोकाय तथा **वामदेव्याय** एतन्नाम्ने साम्ने अथवा 'प्रजापतिर्वै वामदेव्यम्' (श० ब्रा० १।३।३।४) प्रजापतये तथा **यज्ञाय** यज्ञपुरुषाय एवं **यजमानाय** यज्ञसंपादकाय **पशुभ्यश्च** गोवृषभादिपशुभ्योऽपि । यद्वा 'आत्मा वै पशुः' (कौ० १२।७) आत्मने चापि **आवृश्चते** वधकल्पं किल्विषम् आचरति । अर्थात् यो व्रात्यमपवदति स सर्वेषामेषां निन्दां कृत्वा पापीयान् भवतीति ।

यज्ञायज्ञियस्य च वै स वामदेव्यस्य च

यज्ञस्य च यजमानस्य च पशूनां

च प्रियं धाम भवति य एवं वेद ॥१२॥

पदपाठः

यज्ञायज्ञियस्य । च । वै । सः । वामऽदेव्यस्य । च । यज्ञस्य । च । यजमानस्य । च । पशूनाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥१२॥

पदपाठः

यो वै जनः एनं व्रात्यम् **एवं वेद** उपर्युक्तरीत्या सर्वत्र व्याप्तं जानाति **स** हि **यज्ञायज्ञियस्य** साम्नः स्वर्गस्य वा, **वामदेव्यस्य** साम्नः प्रजापतेर्वा, **यज्ञस्य यजमानस्य** यजनकर्मणः यज्ञसाधकस्य, **पशूनां** पञ्चानामपि पशूनाम् आत्मनो वा **प्रियं धाम** प्रियं स्थानं **भवति** जायते । व्रात्यस्यास्य सर्वत्र व्यापकत्वं जानानो जनः सर्वेषामेषां प्रियो भवतीति निर्गलितोऽर्थः ।

तस्य दक्षिणायां दिश्युषाः पुंश्चली मन्त्रो

मागधो विज्ञानं वासोहरुष्णीषं रात्री केशा

हरितौ प्रवर्त्तौ कल्मलिर्मणिः ॥१३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । दक्षिणायाम् । दिशि । उषाः । पुंश्चली । मन्त्रः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्त्तौ । कल्मलिः । मणिः ॥१३॥

दक्षिणायां दिशि दक्षिणदिशायां **तस्य** व्रात्यस्य **उषाः** उषसो वेला **पुंश्चली** गृहे स्वागतार्थं पुरुषेषु प्रचलन्ती स्वागतकारिणी गृहपतेर्विश्वसनीया योषिदित्यर्थः। उषाः हिंसेत्यपि कश्चित्। **मन्त्रः** 'वाग् वै मन्त्रः' (श० ब्रा० ६।४।१।७) वाचां प्रसारः **मागधः** स्तुतिपाठकश्चाभूत्। अन्यत् पूर्ववत् (अथर्व० १५।५)।

अमावास्याऽच पौर्णमासी च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ
वातः सारथी रेष्मा प्रतोदः कीर्तिश्च
यशश्च पुरस्सरौ ।
ऐनं कीर्त्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥१४॥

पदपाठः

अमाऽवास्याऽ । च । पौर्णऽमासी । च । ० । ० । ० ॥१४॥

(अथर्व० १५।६-८)

अमावास्या अमातिथ्युपलक्षितोऽन्धकारः, **पौर्णमासी** च पूर्णिमातिथ्युपलक्षितः प्रकाशश्च अस्य व्रात्यस्य **परिष्कन्दौ** परितो गन्तारौ सेवकौ। अन्यत् पूर्ववत्। (अथर्व० १५।६-८)।

स उदतिष्ठत् स प्रतीचीं दिशमनु व्यऽचलत् ॥१५॥

पदपाठः

सः । उत् । अतिष्ठत् । सः । प्रतीचीम् । दिशम् । अनु । वि । अचलत् ॥१५॥

व्रात्याभिधेयः **स** परमेश्वरः **उदतिष्ठत्** उदस्थात्, सर्वसमक्षं प्रादुरभूत्। प्रादुर्भूय च **प्रतीचीं** पश्चिमायां **दिशं** दिशाम् **अनु** व्यचलत्, अनुलक्ष्य विविधं चचाल। आविर्भूय स पुनः पश्चिमायां दिशि प्रससारेत्यर्थः।

तं वैरूपं च वैराजं चापश्च वरुणश्च
राजानुव्यऽचलन् ॥१६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तम् । वैरूपम् । च । वैराजम् । च । आपः । च । वरुणः । च । राजा । अनुऽव्यऽचलन् ।।१६।।

तम् अनु तं प्रसिद्धं व्रात्यपरमेश्वरम् अनुसृत्य **वैरूपं** 'यद् द्याव इन्द्र ते शतम्०' (ऋ० ८।७०।५) इत्यस्याम् ऋचि समुत्पन्नं वैरूपं नाम साम। यद्वा 'पशवो वै वैरूपम्' (तां० ब्रा० १४।९।८) पशवः। चकारः समुच्चयार्थः। **वैराजं** च वैराजं नाम साम। यद्वा 'प्रजापतिर्वैराजम्' (तां० ब्रा० १६।५।१७) प्रजापतिः। **आपः** आपोदेव्यः, **वरुणश्च राजा** पश्चिमदिङ्नाथो वरुणो राजा चैते सर्वे **व्यचलन्** तमनुसृतवन्तः। वैराजं विपूर्वकात् राजृ दीप्तौ (भ्वा०) धातोः क्विप्। ततः स्वार्थे भवार्थे वा अण्। वैरूपम्. विरूपपदयोः समासे तस्येदम् इत्यर्थे स्वार्थे वा अण्।

वैरूपाय च वै स वैराजाय चाद्भ्यश्च
वरुणाय च राज्ञ आवृश्चते य एवं
विद्वांसं व्रात्यमुपवदति ।।१७।।

पदपाठः

वैरूपाय । च । वै । सः । वैराजाय । च । अत्ऽभ्यः । च । वरुणाय । च । राज्ञे । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ।। १७ ।।

यो वै पापीयान् **एवम्** एतादृशं **विद्वांसं** सर्ववेत्तारं यद्वा देवाधिदेवं व्रात्यं नाम परमेश्वरम् **उपवदति** निन्दति स वै निश्चयपूर्वकं सः पुरुषः **वैरूपाय** साम्ने पशुभ्यो वा **वैराजाय** वैराजसाम्ने प्रजापतये वा, **अद्भ्यः** आपोदेवताभ्यः, **वरुणाय राज्ञे** जलाधिपतये वरुणाय च **आवृश्चते** पापं विदधाति। व्रात्यनिन्दको सर्वेषामीषां देवानामपराधस्य दोषभाग् भवतीत्यर्थः।

वैरूपस्य च वै स वैराजस्य चापां च वरुणस्य च
राज्ञः प्रियं धाम भवति य एवं वेद ।।१८।।

पदपाठः

वैरूपस्य । च । वै । सः । वैराजस्य । च । अपाम् । च । वरुणस्य । च । राज्ञः । प्रियम् । धाम । भवति । यः । एवम् । वेद ।।१८।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः श्लाघ्यो जनः व्रात्यम् **एवं वेद** एवंविधं सर्वत्र व्यापकं वेत्ति **स वै** निश्चप्रचं स जनः **वैरूपस्य** साम्नः, **वैराजस्य** साम्नः, **अपां** आपोदेवीनां, **वरुणस्य च राज्ञः प्रियं धाम** परमं प्रियस्थानं भवति ।

तस्य प्रतीच्यां दिशी३रा पुंश्चली हसो
मागधो विज्ञानं वासोहरुष्णीषं रात्री
केशा हरितौ प्रवर्त्तौ कल्मलिर्मणिः ।।१९।।

पदपाठः

तस्य । प्रतीच्याम् । दिशि । इरा । पुंश्चली । हसः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ।।१९।।

तस्य व्रात्यस्य **प्रतीच्यां दिशि** पश्चिमायां काष्ठायां इरा इरेति अन्ननाम (निघं० २।७) व्रीहियवाद्योषधिः । यद्वा इरा एव इडा, वर्णव्यत्ययश्छान्दसः । इडेति श्रद्धानाम (श० ब्रा० ११।२।७।२०) श्रद्धा, **पुंश्चली** स्वागतार्थं गृहे पुरुषेषु विचरणशीला योषित्, स्वागतकारिणी इत्यर्थः, बभूवेति शेषः । **हसः** हास्यम् आमोदः इति यावत् । **मागधः** स्तुतिपाठकः । शेषं पूर्ववत् (अथर्व० १५।५) ।

अहश्च रात्री च परिष्कन्दौ मनो विपथम् ।
मातरिश्वा च पवमानश्च विपथवाहौ
वातः सारथी रेष्मा प्रतोदः कीर्तिश्च यशश्च पुरस्सरौ ।
ऐनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ।।२०।।

पदपाठः,

अहः । च । रात्री । च ।०।०।०।।२०।। (अथर्व० १५।६-८) ।

तस्य व्रात्यपरमेश्वरस्य विराड्रूपस्य **अहः** दिनं **रात्री** रात्रिश्च **परिष्कन्दौ** परितो गन्तारौ सेवकौ । शेषं पूर्ववत् (अथर्व० १५।६–८)

स उदतिष्ठत् स उदीचीं दिशमनु व्य१चलत् ।।२१।।

पदपाठः

सः । उत् । अतिष्ठत् । सः । उदीचीम् । दिशम् । अनु । वि । अचलत् ।।२१।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स व्रात्यः परमात्मा **उदतिष्ठत्** उत्तस्थौ। सर्वसमक्षमाविरभूदित्यर्थः। उत्थाय **स** व्रात्यः **उदीचीं दिशम् अनु** उत्तरदिशामनुलक्ष्य **व्यचलत्** विविधं चलितवान्। उत्तराभिमुखीभूय प्रससारेत्यर्थः।

तं श्यैतं च नौधसं च सप्तर्षयश्च

सोमश्च राजानुव्य॑चलन् ॥२२॥

पदपाठः

तम्। श्यैतम्। च। नौधसम्। च। सप्तऽऋषयः। च। सोमः। च। राजा। अनुऽव्य॑चलन् ॥२२॥

तम् उदीचीं दिशमनु चलन्तं व्रात्यम् **अनु** अनुलक्ष्य **शैत्यं** नाम साम। इदं हि साम पृथिव्याः रथन्तरसाम्न एव तनूर्भवति। भवति चात्र ब्राह्मणम् "इदमेव श्यैतम्, रथन्तरस्यैषा तनूर्भवति" (जै० ब्रा० २।४।३७) इति। अनेन साम्ना पशुधनेच्छुः स्तौति। यथाम्नायते शाखान्तरे—"पशुकाम एतेन (श्यैतेन साम्ना) स्तुवीत" (तां० ब्रा० ७।१०।१४) इति। अस्य निर्वचनं कुर्वन् भगवान् तित्तिरिः प्राह— "श्यैतेन श्येती अकुरुत, तच्छ्यैतस्य श्यैतत्वम् ..... श्यैतेन श्येती कुरुते" (तै० सं० ५।५।८।१) इति। तथा **नौधसं,** नौधसं नाम सामापि, इदं च साम बृहता सम्बद्धं भवति। यथा ह्याम्नायते ताण्ड्ये "बृहद्धि एतत् परोक्षं यन्नौधसम्" (तां० ब्रा० ७। १०।८) इति। ब्रह्मतेजस्कामनया हि अनेन स्तवनं विदधाति याजकः। भवति चात्र श्रुतिः "ब्रह्मवर्चस्काम एतेन (नौधसेन) स्तुवीत" (तां० ब्रा० ७।१०।११) इति। जैमिनीये ब्राह्मणेऽस्य निर्वचनं लभ्यते—"यदु नोधाः काक्षीवतोऽपश्यन् तस्मान्नौध- समित्याख्यायते" (जै० ब्रा० १।१४७) इति। सामगाः अपि एतस्य निर्वचनं ख्यान्ति—"देवा वै ब्रह्म व्यभजन्त तन्नोधाः काक्षीवत आगच्छत्, तेऽब्रुवन् ऋषिर्न आगंस्तस्मै ब्रह्म ददामेति। तस्मा एतत्साम प्रायच्छन्यन्नोधसे प्रायच्छंस्तस्मान्नौधसम्" (तां० ब्रा० ७।१०।१०) इति। अत एव नौधस- ब्रह्मणोरभेदं पश्यन्ति इमे उद्गीथिनः "ब्रह्म वै नौधसम्"। (तां० ब्रा० ११।४।६) इति। श्यैतं वेदज्ञानमित्यपि कश्चिदाधुनिको वक्ति। नौधसं च ऋषीणां हितकरं ज्ञानमित्यप्यन्यो मनुते कोऽपि। **सप्तर्षयः** प्रसिद्धाः उदीच्यां स्थिताः सप्त महर्षयः,। **सोमो राजा** चैते सर्वे तमनुसृत्य **व्यचलन्** तं व्रात्यमन्वसरन्।

श्यैताय च वै स नौधसाय च सप्तर्षिभ्यश्च

सोमाय च राज्ञ आवृश्चते य एवं विद्वांसं व्रात्यमुपवदति ॥२३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

श्यैताय । च । वै । सः । नौधसाय । सप्तर्षिऽभ्यः । च । सोमाय । च । राज्ञे । आ । वृश्चते । यः । एवम् । विद्वांसम् । व्रात्यम् । उपऽवदति ॥२३॥

यः पापीयान् पुरुषः **एवं विद्वांसम्** एतादृशं व्रात्यज्ञातारम्, यद्वा देवाधिदेवं व्रात्यम् **उपवदति** निन्दति, **सः वै** पुरुषः **श्यैताय** एतन्नाम्ने साम्ने, **नौधसाय** नौधसाभिधाय साम्ने, **सप्तर्षिभ्यः** उत्तरस्याम् उदयं गतेभ्यः सप्तसङ्ख्याकेभ्यो महर्षिभ्यः, भवति हि ब्राह्मणम्—'अमी ह्युत्तरा हि सप्तर्षय उद्यन्ति' (श० ब्रा० २।१।२।४) इति । **चकारः** समुच्चयार्थः । **सोमाय च राज्ञे** तथा सोमराजायापि **आवृश्चते** पापं विदधाति । व्रात्यनिन्दको जनः श्यैत-नौधससाम्नोः सप्तर्षीणां सोमस्य चापि अपराधी जायते ।

श्यैतस्य च वै स नौधसस्य च सप्तर्षीणां
च सोमस्य च राज्ञः प्रियं धाम भवति य एवं वेद ॥२४॥

पदपाठः

श्यैतस्य । च । वै । सः । नौधसस्य । च । सप्तऽऋषीणाम् । च । सोमस्य । च । राज्ञः । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥२४॥

यो हि पुरुषः व्रात्यम् **एवम्** एवंविधं व्यापकं विश्वरूपं **वेद** जानाति **स वै** निःसन्देहं स पुरुषः **श्यैतस्य** साम्नः, **नौधसस्य च** साम्नः, **सप्तर्षीणां च, राज्ञः सोमस्य** सोमराजस्य च **प्रियं धाम** स्नेहस्थानं, **भवति** जायते । सर्वेषामेषां स कृपाभाजनत्वं लभते इत्यर्थः ।

तस्योदीच्यां दिशि विद्युत् पुंश्चली स्तनयित्नुर्मागधो
विज्ञानं वासोहरुष्णीषं रात्री केशा हरितौ
प्रवर्तौ कल्मलिर्मणिः ॥२५॥

पदपाठः

तस्य । उदीच्याम् । दिशि । विऽद्युत् । पुंश्चली । स्तनयित्नुः । मागधः । विऽज्ञानम् । वासः । अहः । उष्णीषम् । रात्री । केशाः । हरितौ । प्रऽवर्तौ । कल्मलिः । मणिः ॥२५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य व्रात्यस्य **उदीच्यां दिशि** उत्तरदिशायां **विद्युत्** मेघस्थानीया चञ्चला **पुंश्चली** गृहे स्वागतार्थं पुरुषेष्वपि विचरणशीला स्वागतकारिणी योषित् बभूव। **स्तनयित्नुः** गर्जनशीलो मेघश्च **मागधः** स्तुतिपाठकोऽभवत्। शेषं पूर्ववत् (अथर्व० १५।५)।

श्रुतं च विश्रुतं च परिष्कन्दौ मनो विपथम् ॥२६॥

पदपाठः

श्रुतम् । च । विऽश्रुतम् । च । परिऽस्कन्दौ । मनः । विऽपथम् ॥२६॥

तस्य व्रात्यस्य श्रुतं श्रवणं विश्रुतं च विविधश्रवणं च यद्वा यद् विविधं श्रूयते तद् यशः, **परिष्कन्दौ** परितः गन्तारौ सेवकौ आस्ताम्। **मनश्च विपथं** विविधमार्गे गमनशीलो रथोऽभवत्।

मातरिश्वा च पवमानश्च विपथवाहौ
वातः सारथी रेष्मा प्रतोदः कीर्तिश्च यशश्च पुरस्सरौ ॥२७॥

पदपाठः

मातरिश्वा । च । पवमानः । च । विपथऽवाहौ । वातः । सारथिः । रेष्मा । प्रऽतोदः । कीर्त्तिः । च । यशः । च । पुरःऽसरौ ॥२७॥

पूर्वं व्याख्यातोऽयं मन्त्रः। (अथर्व० १५।७)

ऐनं कीर्तिर्गच्छत्या यशो गच्छति य एवं वेद ॥२८॥

पदपाठः

आ । एनम् । कीर्त्तिः । गच्छति । आ । यशः । गच्छति । यः । एवम् । वेद ॥२८॥

व्याख्यातोऽयं मन्त्रः पूर्वम् (अथर्व० १५।७)

इति प्रथमेऽनुवाके द्वितीयं पर्यायसूक्तम्।

तृतीयं पर्यायसूक्तम्

एकादशर्चस्यास्य पर्यायस्य प्रथमर्चः पिपीलिकमध्या गायत्री, द्वितीयायाः साम्न्युष्णिक्, तृतीयाया याजुषी जगती, चतुर्थ्या द्विपदाच्युष्णिक्, पञ्चम्या आर्ची बृहती, षष्ठ्या आसुर्यनुष्टुप्, सप्तम्याः साम्नी गायत्री, अष्टम्या आसुरी पङ्क्तिः, नवम्या आसुरी जगती, दशम्याः प्राजापत्या त्रिष्टुप्, एकादश्याश्च विराड्गायत्री छन्दांसि।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

स संवत्सरमूर्ध्वोऽतिष्ठत् तं देवा अब्रुवन्
व्रात्य किं नु तिष्ठसीति ।।१।।

पदपाठः

सः । सम्ऽवत्सरम् । ऊर्ध्वः । अतिष्ठत् । तम् । देवाः । अब्रुवन् । व्रात्य । किम् । नु । तिष्ठसि । इति ।।१।।

स व्रात्यः परमेश्वरः **संवत्सरं** द्वादशमासपर्यन्तं त्रयोदशमासपर्यन्तं वा । भवति चात्र श्रुतिः— "द्वादश वा वै त्रयोदश वा संवत्सरस्य मासाः" (श० ब्रा० २।२।३।२७) । काठकसंहितायां संवत्सरदिनानि आम्नातानि—"षष्टिश्च वै त्रीणि च शतानि संवत्सरस्याहानि" (काठ० ३३।२) इति । **ऊर्ध्वः** ऊर्ध्वाभिमुखीभूय उत्थाय वा **अतिष्ठत्** स्थितोऽभूत् । यद्वा 'संवत्सर एव स्वर्गो लोकः' (जै० ब्रा० २।४२९) स्वर्गमुपेत्य ऊर्ध्वः अतिष्ठत् । एवंविधं तं विलोक्य इन्द्रादयो देवाः तं व्रात्यम् **अब्रुवन्** अवदन् **व्रात्य** हे व्रात्याभिधेय परमात्मन् ! त्वं **किं नु**, नु इति प्रश्ने । यतोऽत्र वदन्ति नैरुक्ताः—'नु इत्येषोऽनेककर्मा, इदं नु करिष्यसीति हेत्वपदेशे, कथं नु करिष्यसीति अनुपृष्टे' (निरु० १।२) इत्यादि । कथं **तिष्ठसि इति** स्थितोऽसि? अर्थात् केन कारणेन त्वमूर्ध्वमुख एव तिष्ठसि, नोपविशसि चेति ।

सोऽब्रवीदासन्दीं मे सं भरन्त्विति ।।२।।

पदपाठः

सः । अब्रवीत् । आऽसन्दीम् । मे । सम् । भरन्तु । इति ।।२।।

सः व्रात्यः **अब्रवीत्** देवान् प्रत्यवोचत् । **मे** मम कृते **आसन्दीं** चतुष्पादिकां **संभरन्तु** सम्पादयन्तु सर्वे भवन्तः । इति शब्दः पादपूरणार्थः । मम उपवेशनार्थं सिंहासनं कल्पयन्तु भवन्तः इत्यर्थः ।

तस्मै व्रात्यायासन्दीं समभरन् ।।३।।

पदपाठः

तस्मै । व्रात्याय । आऽसन्दीम् । सम् । अभरन् ।।२।।

ते देवाः **तस्मै** व्रात्याय व्रात्योपवेशनार्थम् इत्यर्थः, **आसन्दीं** चतुष्पादिकां **समभरन्** समपादयन् । भवति चात्र ब्राह्मणम् " सैषा (आसन्दी) खादिरी वितृणा भवति " (श० ब्रा० ५।४।४।१) इति । ऐतरेयारण्यके (१।२।४) तु श्रीर्हि आसन्दी प्रतिपादिता । परं शतपथब्राह्मणं तु पृथिवीं हि आसन्दिकां प्रतिपादयति—"इयं वा आसन्दी, अस्यां हि इदं सर्वमासन्नम्" (श० ब्रा० ६।७।१।१२) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्या ग्रीष्मश्च वसन्तश्च द्वौ पादावास्तां
शरच्च वर्षाश्च द्वौ ।।४।।

पदपाठः

तस्याः । ग्रीष्मः । च । वसन्तः । च । द्वौ । पादौ । आस्ताम् । शरत् । च । वर्षाः । च । द्वौ ।।४।।

विराजो व्रात्यस्य चतुष्पादिकासनं प्रतिपादयति श्रुतिः । **तस्याः** चतुष्पादिकायाः **ग्रीष्मः वसन्तः** च इमौ निदाघ-मधुकालौ **द्वौ** अग्रौ **पादौ आस्ताम्** अभूताम्, **शरत् वर्षाश्च** शीतर्त्तुः प्रावृट् च इमौ ऋतू तस्याः द्वौ पृष्ठपादौ अभूताम् ।

बृहच्च रथन्तरं चानूच्ये३ आस्तां
यज्ञायज्ञियं च वामदेव्यं च तिरश्च्येऽ।।५।।

पदपाठः

बृहत् । च । रथम्ऽतरम् । च । अनूच्ये३ इति । आस्ताम् । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । तिरश्च्ये ३ इति ।।५।।

बृहत् च रथन्तरम् च इमे द्वे साम्नी, **अनूच्ये** अनु+उच समवाये (दि०) धातोः क्यप् । चतुष्पादिकायां सङ्गमनीये द्वे लम्बमाने काष्ठफलकशकले **आस्ताम्,** अभूताम् । **यज्ञायज्ञियं** नाम साम **वामदेव्यं च** साम इमे द्वे **तिरश्च्ये** अन्तर्गते द्वे तिर्यगवस्थिते काष्ठफलकशकले अभूताम् ।

ऋचः प्राञ्चस्तन्तवो यजूंषि तिर्यञ्चः ।।६।।

पदपाठः

ऋचः । प्राञ्चः । तन्तवः । यजूंषि । तिर्यञ्चः ।।६।।

ऋचः ऋङ्मन्त्राः तस्याश्चतुष्पादिकायाः **प्राञ्चः** पूर्वमभिसुबद्धाः **तन्तवः** गुणाः सूत्राणीत्यर्थः, अभूवन् । **तिर्यञ्चः** तिर्यग्गुम्फिताः गुणाश्च **यजूंषि** यजुर्मन्त्राः आसन् ।

वेद आस्तरणं ब्रह्मोपबर्हणम् ।।७।।

पदपाठः

वेदः । आऽस्तरणम् । ब्रह्म । उपऽबर्हणम् ।।७।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य व्रात्यभगवतः चतुष्पादिकायां **वेदः** ज्ञानम्, **आस्तरणम्** विष्टरः, परिस्तोमो वा, आसनमित्यर्थः। 'प्रवेण्यास्तरणं वर्णः परिस्तोमः कुथो द्वयोः' इत्यमरः (२।८।४२)। तथा **ब्रह्म** 'सत्यमेव ब्रह्म' (श० ब्रा० २।१।४।१०) सत्यञ्च तस्य **उपबर्हणम्** उपधानमभवत्।

सामासाद उद्गीथोऽपश्रयः ॥८॥

पदपाठः

साम। आऽसादः। उत्ऽगीथः। अपऽश्रयः ॥८॥

तस्यां चतुष्पादिकायां **साम** सामवेदस्तु **आसादः** उपवेशनस्थानम् अभूत्। आङ्पूर्वकात् षद्लृ विशरणगत्यवसादनेषु (भ्वा०) धातोर्घञ्। **उद्गीथः** उच्चैर्गीयमानः साममन्त्रः सामगानध्वनिरित्यर्थः उत्पूर्वकात् गै शब्दे (भ्वा०) धातोः थक् प्रत्ययः। **अपश्रयः** आश्रयः समभूत्।

तामासन्दीं व्रात्य आरोहत् ॥९॥

ताम्। आऽसन्दीम्। व्रात्यः। आ। अरोहत् ॥९॥

पदपाठः

ताम् ईदृशीं विराट्स्वरूपात्मिकाम् **आसन्दीं** चतुष्पादिकां **व्रात्यः** विराट् परमेश्वरः **आरोहत्** आरूढोऽभवत्। तत्रोपविवेशेत्यर्थः।

तस्य देवजनाः परिष्कन्दा आसन्त्सङ्कल्पाः
प्रहाय्या३ विश्वानि भूतान्युपसदः ॥१०॥

पदपाठः

तस्य। देवऽजनाः। परिऽस्कन्दाः। आसन्। सम्ऽकल्पाः। प्रऽहाय्या ३ः। विश्वानि। भूतानि। उपऽसदः ॥१०॥

देवजनाः इन्द्रादयो देवाः। यद्वा देवजनाः इति "देवमनुष्याः पितरः" (तै० आ० १।२७।७) पितरः इत्यर्थः। **तस्य** व्रात्यस्य **परिष्कन्दाः** परितः गन्तारः, **आसन्** अभूवन्। **सङ्कल्पाः** मानसिकविचाराः **प्रहाय्याः** प्रमुखाः गन्तारो दूताः सञ्जाताः। प्रपूर्वकात् ओहाङ् गतौ (जु०) धातोः 'श्रुदक्षिस्पृहिगृहिभ्यः आय्यः' (उ० ३।९६) इति सूत्रेण आय्यप्रत्ययः। **भूतानि** पञ्चभूतानि। यद्वा 'देवा वै भूताः' (मैत्रा० ३।८।५) सर्वे देवाः **उपसदः** तस्य समीपस्थायिनो जनाः बभूवुः।

विश्वान्येवास्य भूतान्युपसदो भवन्ति य एवं वेद ॥११॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

विश्वानि । एव । अस्य । भूतानि । उपऽसदः । भवन्ति । यः । एवम् । वेद ।।११।।

यो वै पुमान् **एवं वेद** व्रात्यस्यैवंविधं स्वरूपं परिचिनोति **अस्य** विदुषः **विश्वानि** सर्वाण्येव **भूतानि** पञ्चभूतोपलक्षितं सर्वं जगत् । यद्वा सर्वे देवाः, **उपसदः** पार्श्वस्थायिनः तदाज्ञावशंवदाः इत्यर्थः **भवन्ति** जायन्ते ।

इति प्रथमेऽनुवाके तृतीयं पर्यायसूक्तम् ।

चतुर्थं पर्यायसूक्तम्

अष्टादशर्चस्यास्य पर्यायस्य प्रथमा-त्रयोदशी-षोडशीनामृचां दैवी जगती, द्वितीयाष्टम्योरार्च्यनुष्टुप्, तृतीया-द्वादश्योर्द्विपदा प्राजापत्या जगती, चतुर्थी-सप्तमी-दशमीनां प्राजापत्या गायत्री, पञ्चम्याः प्राजापत्या पङ्क्तिः, षष्ठ्या आर्ची जगती, नवम्या आर्ची त्रिष्टुप् (भौमा), एकादश्याः साम्नी त्रिष्टुप्, चतुर्दश्याः प्राजापत्या बृहती, पञ्चदश्यष्टादश्योर्द्विपदार्ची पङ्क्तिः, सप्तदश्याश्चार्च्युष्णिक् छन्दांसि ।

तस्मै प्राच्या दिशः ।।१।।

पदपाठः

तस्मै । प्राच्याः । दिशः ।।१।।

तस्मै व्रात्याय परमात्मने विराट्पुरुषाय **प्राच्याः दिशः** पूर्वदिशातः देवाः इति शेषः— (अत ऊर्ध्वम् अग्रिमेण सम्बन्धः)

वासन्तौ मासौ गोप्तारावकुर्वन् बृहच्च रथन्तरं चानुष्ठातारौ ।२।

पदपाठः

वासन्तौ । मासौ । गोप्तारौ । अकुर्वन् । बृहत् । च । रथम्ऽतरम् । च । अनुऽस्थातारौ ।।२।।

वासन्तौ वसन्तर्तुसम्बद्धौ चैत्रवैशाखौ **मासौ** द्वौ मासौ **गोप्तारौ** रक्षण-विधायिनौ **अकुर्वन्** अकल्पयन् । **बृहत्** बृहन्नामकं साम **रथन्तरं च** एतन्नामकं पार्थिवसाम च अर्थात् इमौ सामगानध्वनी **अनुष्ठातारौ** कार्यसाधकौ सहस्थायिनौ कल्पितवन्तः ।

वासन्तावेनं मासौ प्राच्या दिशो गोपायतो
बृहच्च रथन्तरं चानु तिष्ठतो य एवं वेद ।।३।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

वासन्तौ । एनम् । मासौ । प्राच्याः । दिशः । गोपायतः । बृहत् । च । रथम्ऽतरम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ।।३।।

यः यस्तु याजकः **एवं वेद** व्रात्यस्यैतद् विराड्रूपं वेत्ति एवं विज्ञातारं **वासन्तौ मासौ** वसन्तर्तुसम्बन्धिनौ चैत्र-वैशाखौ द्वावपि मासौ **प्राच्याः दिशः** पूर्वदिशातः **गोपायतः** रक्षतः । चकारः समुच्चयार्थः । **बृहत्** साम **रथन्तरं च** साम **अनुतिष्ठतः** कार्यमस्य साधयतः । अनेन सह वा वर्त्तेते ।

तस्मै दक्षिणाया दिशः ।।४।।

पदपाठः

तस्मै । दक्षिणायाः । दिशः ।।४।।

देवाः **तस्मै** व्रात्याय **दक्षिणायाः दिशः** दक्षिणदिशातः — (अग्रिमेण सम्बन्धः) ।

ग्रैष्मौ मासौ गोप्तारावकुर्वन् यज्ञायज्ञियं
च वामदेव्यं चानुष्ठातारौ ।।५।।

पदपाठः

ग्रैष्मौ । मासौ । गोप्तारौ । अकुर्वन् । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । अनुऽस्थातारौ ।।५।।

ग्रैष्मौ ग्रीष्मकालिकौ ज्येष्ठाषाढौ द्वौ **मासौ गोप्तारौ** रक्षकौ **अकुर्वन्** क्लृप्तवन्तः । **यज्ञायज्ञियं** नाम साम **वामदेव्यं** नाम साम **च** इमौ सामध्वनी इत्यर्थः **अनुष्ठातारौ** कार्यसाधकौ सहस्थायिनौ अकल्पयन् ।

ग्रैष्मावेनं मासौ दक्षिणाया दिशो गोपायतो
यज्ञायज्ञियं च वामदेव्यञ्चानु तिष्ठतो य एवं वेद ।।६।।

पदपाठः

ग्रैष्मौ । एनम् । मासौ । दक्षिणायाः । दिशः । गोपायतः । यज्ञायज्ञियम् । च । वामऽदेव्यम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ।।६।।

यः खलु यजमानः **एवं वेद** विराड्रूपं व्रात्यस्यैवं वेत्ति, एनं वेत्तारं **ग्रैष्मौ मासौ** निदाघकालिकौ ज्येष्ठाषाढमासौ **दक्षिणायाः दिशः** दक्षिणदिशातः **गोपायतः**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

रक्षतः । **यज्ञायज्ञियं** नाम साम तथा **वामदेव्यं** नाम साम **चानुतिष्ठतः** । इमे अभीप्सितमस्य साधयतः । अनेन सह वा वर्त्तेते ।

तस्मै प्रतीच्या दिशः ॥७॥

पदपाठः

तस्मै । प्रतीच्याः । दिशः ॥७॥

तस्मै व्रात्याय भगवते देवाः **प्रतीच्याः दिशः** पश्चिमदिशातः —(अग्रिमेण सम्बन्धः)

वार्षिकौ मासौ गोप्तारावकुर्वन् वैरूपं
च वैराजं चानुष्ठातारौ ॥८॥

पदपाठः

वार्षिकौ । मासौ । गोप्तारौ । अकुर्वन् । वैरूपम् । च । वैराजम् । च । अनुऽस्थातारौ ॥८॥

वार्षिकौ प्रावृट्सम्बन्धिनौ द्वौ **मासौ** श्रावणभाद्रपदौ **गोप्तारौ** रक्षाविधायिनौ **अकुर्वन्** कृतवन्तः । **वैरूपं** वैरूपं नाम साम **च वैराजं** नाम साम चेमे **अनुष्ठातारौ** कार्यसम्पादकौ सहस्थायिनौ वा अकलपयन् ।

वार्षिकावेनं मासौ प्रतीच्या दिशो गोपायतो
वैरूपं च वैराजं चानुतिष्ठतो य एवं वेद ॥९॥

पदपाठः

वार्षिकौ । एनम् । मासौ । प्रतीच्याः । दिशः । गोपायतः । वैरूपम् । च । वैराजम् । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥९॥

यो हि पुरुषः **एवं वेद** विराड्रूपं धृतवतो व्रात्यस्यैवंविधं व्यापकस्वरूपं जानाति, **एनं** जानानं पुरुषं **वार्षिकौ मासौ** वर्षाकालिकौ श्रावणभाद्रपदौ द्वौ मासौ **प्रतीच्याः दिशः** पश्चिमदिशातः **गोपायतः** तं रक्षतः । तथा **वैरूपं** नाम साम **वैराजं** नाम साम च **अनुतिष्ठतः** तस्याभिलाषं साधयतः ।

तस्मा उदीच्या दिशः ॥१०॥

पदपाठः

तस्मै । उदीच्याः । दिशः ॥१०॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मै व्रात्याय देवाः **उदीच्याः दिशः** उत्तरदिशातः —(अग्रिमेण सम्बन्धः)

शारदौ मासौ गोप्तारावकुर्वञ्छ्यैतं च नौधसं चानुष्ठातारौ ॥११॥

पदपाठः

शारदौ । मासौ । गोप्तारौ । अकुर्वन् । श्यैतम् । च । नौधसम् । च । अनुऽस्थातारौ ॥११॥

शारदौ शरत्कालसम्बन्धिनौ **मासौ** आश्विनकार्त्तिकौ मासौ **गोप्तारौ** रक्षकौ **अकुर्वन्** अकल्पयन्। **श्यैतं च** श्यैतं नाम साम तथा **नौधसं** च नौधसनामकं साम च अनयोः साम्नोः ध्वनी इत्यर्थः, **अनुष्ठातारौ** तस्य कार्यसाधकौ अकुर्वन्।

शारदावेनं मासावुदीच्या दिशो गोपायतः ।
श्यैतं च नौधसं चानु तिष्ठतो य एवं वेद ॥१२॥

पदपाठः

शारदौ । एनम् । मासौ । उदीच्याः । दिशः । गोपायतः । श्यैतम् । च । नौधसम् । च । अनु । तिष्ठतः । यः । एवम् । वेद । ॥१२॥

यः कश्चन **एवं वेद** व्रात्यमेवंविधं जानाति, **एनं** तमेनं वेत्तारं **शारदौ मासौ** शरत्कालिकौ द्वौ मासौ **उदीच्याः दिशः** उत्तरदिशातः **गोपायतः** रक्षतः। **श्यैतं च नौधसं** चेति इमे द्वे साम्नी **अनुतिष्ठतः** तस्य कार्याणि सम्पादयतः।

तस्मै ध्रुवाया दिशः ॥१३॥

पदपाठः

तस्मै । ध्रुवायाः । दिशः ॥१३॥

तस्मै व्रात्याय देवाः **ध्रुवायाः दिशः** 'पृथिव्यसि जन्मना ध्रुवा' (मैत्रा० १।१।१२) इति श्रुतेः पृथ्वीदिशातः, अधोदिग्जन्यकष्टेभ्यः इत्यर्थः :—(अग्रिमेण सम्बन्धः)

हैमनौ मासौ गोप्तारावकुर्वन् भूमिं चाग्निं चानुष्ठातारौ ॥१४॥

पदपाठः

हैमनौ । मासौ । गोप्तारौ । अकुर्वन् । भूमिम् । च । अग्निम् । च । अनुऽस्थातारौ ॥१४॥

हैमनौ हेमन्तर्तुसम्बन्धिनौ **मासौ** आग्रहायणपौषनामकौ द्वौ मासौ **गोप्तारौ** रक्षाविधायिनौ **अकुर्वन्** कृतवन्तः। **भूमिं** पृथिवीं च भूलोकमित्यर्थः **अग्निं च** पृथ्वी-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

लोकस्यास्याधिपतिमग्निं च यद्वा "असौ वा आदित्य एषोऽग्निः" (श० ब्रा० ६।४।१।१) आदित्योपलक्षितं द्युलोकं च अनुष्ठातारौ कार्यसम्पादकौ अकल्पयन् ।

हैमनावेनं मासौ ध्रुवाया दिशो गोपायतो भूमिश्चाग्निश्चानु तिष्ठतो य एवं वेद ॥१५॥

पदपाठः

हैमनौ । एनम् । मासौ । ध्रुवायाः । दिशः । गोपायतः । भूमिः । च । अग्निः । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥१५॥

यः पुरुषः **एवं वेद** व्रात्यमेवंविधं जानाति **एनं** ज्ञातारं **हैमनौ मासौ** आग्रहायणिक-पौषौ **ध्रुवायाः दिशः** पृथ्वीदिक्तः **गोपायतः** रक्षतः । **भूमिः च अग्निः च** इमौ देवौ च **अनुतिष्ठतः** अमुष्याभीप्सितं साधयतः ।

तस्मा ऊर्ध्वाया दिशः ॥१६॥

पदपाठः

तस्मै । ऊर्ध्वायाः । दिशः ॥१६॥

देवाः **तस्मै** व्रात्याय **ऊर्ध्वायाः दिशः** अन्तरिक्षात् अर्थात् तस्मादागताभ्यो विपद्भ्यः । भवति चात्र ब्राह्मणम् 'अथैतदन्तरिक्षम् (ऊर्ध्वा दिक्), एषा हि दिक् बृहस्पतेः (श० ब्रा० २।३।४।३६) इति । :—(अग्रिमेण सम्बन्धः)

शैशिरौ मासौ गोप्तारावकुर्वन् दिवं चादित्यं चानुष्ठातारौ ॥१७॥

पदपाठः

शैशिरौ । मासौ । गोप्तारौ । अकुर्वन् । दिवम् । च । आदित्यम् । च । अनुऽस्थातारौ ॥१७॥

शैशिरौ मासौ शिशिरसमयसम्बन्धिनौ माघफाल्गुनौ द्वौ मासौ **गोप्तारौ** रक्षकौ **अकुर्वन्** अकल्पयन् । **दिवं** द्युलोकं **च** तथा **आदित्यं** द्युलोकाधिष्ठातारमादित्यदेवं **च अनुष्ठातारौ** कार्यसञ्चालकौ सहस्थायिनौ वा कृतवन्तः ।

शैशिरावेनं मासावूर्ध्वाया दिशो गोपायतो द्यौश्चादित्यश्चानु तिष्ठतो य एवं वेद ॥१८॥

पदपाठः

शैशिरौ । एनम् । मासौ । ऊर्ध्वायाः । दिशः । गोपायतः । द्यौः । च । आदित्यः । च । अनु । तिष्ठतः । यः । एवम् । वेद ॥१८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः कश्चन **एवं वेद** व्रात्यमेवंविधं परिचिनोति, **एनं** वेत्तारं **शैशिरौ मासौ** माघ-फाल्गुनौ मासौ **ऊर्ध्वायाः दिशः** ऊर्ध्वदिशातः **गोपायतः** रक्षतः। **द्यौः च आदित्यः च** द्युलोकः तदधिष्ठातृदेवः आदित्यश्च **अनुतिष्ठतः** अमुष्य कार्यं सम्पादयतः।

इति प्रथमेऽनुवाके चतुर्थं पर्यायसूक्तम्।

पञ्चमं पर्यायसूक्तम्

षोडशर्चस्यास्य पर्यायस्य प्रथमर्चस्त्रिपदा समविषमा गायत्री, द्वितीयायास्त्रिपदा भुरिगार्ची त्रिष्टुप्, तृतीयायाः पञ्चमीसप्तमीनवम्येकादशीत्रयोदशीनां द्वितीयावसानर्चां षोडश्याश्च द्विपदा प्राजापत्यानुष्टुप्, चतुर्थ्यास्त्रिपदा स्वराट्-प्राजापत्या पङ्क्तिः, पञ्चमी-सप्तमी-नवमी-त्रयोदशीनां, प्रथमावसानर्चां त्रिपदा ब्राह्मी गायत्री, षष्ठ्यष्टमी-द्वादशीनां त्रिपदा ककुप्, दशमी-चतुर्दश्योर्भुरिग्विषमा गायत्री, एकादश्याः प्रथमावसानर्चो निचृद्ब्राह्मी गायत्री, पञ्चदश्याश्च विराट् छन्दांसि।

तस्मै प्राच्या दिशो अन्तर्देशाद् भवमिष्वासमनुष्ठातारमकुर्वन् ।१।

पदपाठः

तस्मै। प्राच्याः। दिशः। अन्तःऽदेशात्। भवम्। इषुऽआसम्। अनुऽस्थातारम्। अकुर्वन् ॥१॥

तस्मै व्रात्याय परमात्मने देवाः इति शेषः। **प्राच्याः दिशः** पूर्वदिशायाः **अन्तर्देशात्** मध्यप्रदेशात् **इष्वासं** शरक्षेपणकर्त्तारं धनुर्धारिणमित्यर्थः। इषुपूर्वकात् असु क्षेपणे (दि०) धातोः अण्। यद्वा हिंसायाः क्षेपकं नाशकम्। ईष हिंसायाम् (भ्वा०) धातोः उः प्रत्ययः। कित् ह्रस्वश्च। ईदृशं **भवं** महादेवम्। यद्वा 'पर्जन्यो वै भवः, पर्जन्याद्धीदं सर्वं भवति' (श० ब्रा० ६।१।३।१५) पर्जन्यं तस्य व्रात्यस्य **अनुष्ठातारं** कार्यसाधकम् **अकुर्वन्** कृतवन्तः।

भव एनमिष्वासः प्राच्या दिशो
अन्तर्देशादनुष्ठातानु तिष्ठति ॥२॥

पदपाठः

भवः। एनम्। इषुऽआसः। प्राच्याः। दिशः। अन्तःऽदेशात्। अनुऽस्थाता। अनु। तिष्ठति ॥२॥

प्राच्याः दिशः पूर्वदिशायाः **अन्तर्देशात्** मध्यप्रान्तात् **इष्वासः** धनुर्धरः शरक्षेपणकारी वा **भवः** जलाधिष्ठाता शङ्करः एतन्नामको देवः पर्जन्यो वा **अनुष्ठाता** कार्यसाधकः सन् **एनम्** व्रात्यम् **अनुतिष्ठति** उपास्ते।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

नैनं शर्वो न भवो नेशानो नास्य पशून्
न समानान् हिनस्ति य एवं वेद ॥३॥

पदपाठः

न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् । हिनस्ति । यः । एवम् । वेद ॥३॥

यः कश्चन जनः **एवं वेद** व्रात्यस्यैवंविधं तत्त्वं वेत्ति **एनं** तत्तत्त्वज्ञं **न शर्वः, न भवः, न ईशानः** । शङ्करस्य अष्टस्वरूपेषु अन्यतमानि इमानि शर्व-भवेशाननामानि त्रीणि रूपाणि । यद्वा अग्निरूपेषु इमे त्रयो देवाः अन्यतमाः । भवति चात्र ब्राह्मणम् । 'एतान्यष्टौ अग्निरूपाणि कुमारो नवमः' (श० ब्रा० ६।१।३।१८) इति । कौषीतकीया अप्येवमामनन्ति शर्वमग्नेः स्वरूपम्—"यच्छर्वोऽग्निस्तेन" (कौषी० ६।३) एते सर्वे **अस्य** याजकस्य अर्थात् व्रात्यतत्त्ववेत्तुः **पशून्** पञ्चापि पशून् तथा **समानान्** समानजातीयान् बन्धून् **न हिनस्ति** न नाशयन्ति ।

तस्मै दक्षिणाया दिशो अन्तर्देशाच्छर्व—
मिष्वासमनुष्ठातारमकुर्वन् ॥४॥

पदपाठः

तस्मै । दक्षिणायाः । दिशः । अन्तःऽदेशात् । शर्वम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥४॥

देवाः इष्वासं धनुर्धरं **शर्वम्** एतन्नामकं देवं **दक्षिणायाः दिशः** दक्षिणदिशायाः **अन्तर्देशात्** मध्यप्रान्तात् **तस्मै** व्रात्याय तमुपासितुमित्यर्थः । **अनुष्ठातारम्** कार्यसम्पादकम् **अकुर्वन्** निर्णीतवन्तः इत्यर्थः ।

शर्व एनमिष्वासो दक्षिणाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति ।
नैनं शर्वो न भवो नेशानो नास्य पशून्० ॥५॥

पदपाठः

शर्वः । एनम् । इषुऽआसः । दक्षिणायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।० ॥५॥

अत एव **इष्वासः** धनुर्धरः **शर्वः** एतन्नामको देवः **दक्षिणायाः दिशः** दक्षिणदिशायाः **अन्तर्देशात्** मध्यप्रदेशात् **अनुष्ठाता** कार्यसाधकः सन् **एनं** व्रात्यम् **अनुतिष्ठति** सेवते । शेषं समानम् । (अथर्व० १५।१।५।३)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्मै प्रतीच्या दिशो अन्तर्देशात् पशुपति-
मिष्वासमनुष्ठातारमकुर्वन् ॥६॥

पदपाठः

तस्मै । प्रतीच्याः । दिशः । अन्तःऽदेशात् । पशुऽपतिम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥६॥

देवाः इष्वासं धनुर्धारिणं **पशुपतिम्** एतन्नामकं देवं **प्राच्याः दिशः** पश्चिमदिशायाः **अन्तर्देशात्** मध्यदेशात् **तस्मै** व्रात्याय **अनुष्ठातारं** कार्यसाधकम् **अकुर्वन्** निश्चितवन्तः ।

पशुपतिरेनमिष्वासः प्रतीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति ।
नैनं शर्वो न भवो नेशानो नास्य पशून्० ॥७॥

पदपाठः

पशुऽपतिः । एनम् । इषुऽआसः । प्रतीच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् ।० ॥७॥

इष्वासः धनुर्धरः **पशुपतिः** देवः **प्रतीच्याः दिशः** पश्चिमदिशायाः **अन्तर्देशात्** मध्यप्रान्तात् **अनुष्ठाता** कार्यसम्पादकः सन् **एनम् अनुतिष्ठति** व्रात्यमेनमुपास्ते । शेषं समानम् ।

तस्मा उदीच्या दिशो अन्तर्देशादुग्रं
देवमिष्वासमनुष्ठातारमकुर्वन् ॥८॥

पदपाठः

तस्मै । उदीच्याः । दिशः । अन्तःऽदेशात् । उग्रम् । देवम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥८॥

तस्मै व्रात्याय परमात्मने देवाः **उदीच्याः दिशः** उत्तरदिशायाः **अन्तर्देशात्** मध्यप्रदेशात् **इष्वासं** धनुर्धरं शरप्रक्षेपकं वा **उग्रं देवं** वायोरभिमानिनम् उग्रं देवम् **अनुष्ठातारम्** कार्यसाधकम् **अकुर्वन्** अकल्पयन् ।

उग्र एनं देव इष्वास उदीच्या दिशो अन्तर्देशादनुष्ठातानु तिष्ठति ।
नैनं शर्वो न भवो नेशानो नास्य पशून्० ॥९॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

उग्रः । एनम् । देवः । इषुऽआसः । उदीच्याः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।० ॥९॥

इष्वासः धनुर्धरः उग्रः वायोरधिष्ठाता उग्रनामको देवः उदीच्याः दिशः उत्तरदिशायाः अन्तर्देशात् मध्यप्रदेशात् अनुष्ठाता कार्यसम्पादकः सन् अनुतिष्ठति एनं व्रात्यं सेवते । शेषं समानम् (अथर्व० १५।१।५।३) ।

तस्मै ध्रुवाया दिशो अन्तर्देशाद् रुद्र-
मिष्वासमनुष्ठातारमकुर्वन् ॥१०॥

पदपाठः

तस्मै । ध्रुवायाः । दिशः । अन्तःऽदेशात् । रुद्रम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥१०॥

तस्मै व्रात्याय विराड्रूपिणे देवाः ध्रुवायाः दिशः 'पृथिव्यसि जन्मना ध्रुवा' (मैत्रा० १।१।१२) पृथ्वीदिग्भागस्य, अधोदिग्भागस्येत्यर्थः । अन्तर्देशात् मध्यप्रदेशात् इष्वासं धनुर्धरं रुद्रम् अग्नेरभिमानिनं रुद्रनामकं देवम् अनुष्ठातारम् तत्कार्यसाधकम् अकुर्वन् कृतवन्तः ।

रुद्र एनमिष्वासो ध्रुवाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति ।
नैनं शर्वो न भवो नेशानो नास्य पशून्० ॥११॥

पदपाठः

रुद्रः । एनम् । इषुऽआसः । ध्रुवायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०॥११॥

इष्वासः धनुर्धरः रुद्रः अग्नेरधिष्ठाता देवो रुद्रः ध्रुवायाः दिशः पृथ्वीदिग्भागस्य अधोभागस्य वा अन्तर्देशात् मध्यमभागात् अनुष्ठाता कार्यसम्पादकः सन् एनं व्रात्यम् अनुतिष्ठति सेवते । शेषं पूर्ववत् (अथर्व० १५।१।५।३)

तस्मा ऊर्ध्वाया दिशो अन्तर्देशान्महादेव-
मिष्वासमनुष्ठातारमकुर्वन् ॥१२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्मै । ऊर्ध्वायाः । दिशः । अन्तःऽदेशात् । महाऽदेवम् । इषुऽआ-सम् । अनुऽस्थातारम् । अकुर्वन् ॥१२॥

तस्मै व्रात्याय देवाः **ऊर्ध्वायाः दिशः** अन्तरिक्षस्य, भवति चात्र श्रुतिः 'अथैतदन्तरिक्षम् (ऊर्ध्वा दिक्), एषा हि दिक् बृहस्पतेः' (श० ब्रा० २।३।४।३६) इति । **अन्तर्देशात्** मध्यप्रान्तात् **इष्वासं** धनुर्धारिणं **महादेवं** चन्द्रमसः अधिष्ठातारं महादेवम् **अनुष्ठातारम् अकुर्वन्** कार्यसम्पादकं निश्चितवन्तः ।

महादेव एनमिष्वास ऊर्ध्वाया दिशो अन्तर्देशादनुष्ठातानु तिष्ठति । नैनं शर्वो न भवो नेशानो नास्य पशून्० ॥१३॥

पदपाठः

महाऽदेवः । एनम् । इषुऽआसः । ऊर्ध्वायाः । दिशः । अन्तःऽदेशात् । अनुऽस्थाता । अनु । तिष्ठति । न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य ।०॥१३॥

इष्वासः धनुर्धारी शरप्रक्षेपको वा **महादेवः** चन्द्रमसोऽधिष्ठातृदेवः **ऊर्ध्वाया दिशः** अन्तरिक्षस्य **अन्तर्देशात्** मध्यप्रदेशात् **अनुष्ठाता** कार्यसाधकः सन् **एनम् अनुतिष्ठति** व्रात्यम् इमं सेवते । शेषं पूर्ववत् । (अथर्व० १५।१।५।३) ।

तस्मै सर्वेभ्यो अन्तर्देशेभ्य ईशान-
मिष्वासमनुष्ठातारमकुर्वन् ॥१४॥

पदपाठः

तस्मै । सर्वेभ्यः । अन्तःऽदेशेभ्यः । ईशानम् । इषुऽआसम् । अनुऽस्थातारम् । अकुर्वन् ॥१४॥

सर्वे देवाः **तस्मै** व्रात्याय **सर्वेभ्यः** निखिलेभ्यः **अन्तर्देशेभ्यः** मध्यदेशेभ्यः **इष्वासं** धनुर्धरम् **ईशानं** सूर्याधिष्ठातारम् ईशानं देवम् **अनुष्ठातारं** कार्यसम्पादकम् **अकुर्वन्** अकल्पयन् ।

ईशान एनमिष्वासः सर्वेभ्यो अन्तर्देशेभ्योनुष्ठातानु तिष्ठति ।१५।

पदपाठः

ईशानः । एनम् । इषुऽआसः । सर्वेभ्यः । अन्तःऽदेशेभ्यः । अनुऽस्थाता । अनु । तिष्ठति ।।१५।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सर्वेभ्यः समस्तेभ्यः **अन्तर्देशेभ्यः** मध्यप्रदेशेभ्यः **एनं** व्रात्यं परमेश्वरम् **इष्वासः** धनुर्धरः बाणप्रक्षेपको वा ईशानः सूर्याधिष्ठातृदेवः ईशानाभिधेयः **अनुष्ठाता** कार्य-सम्पादकः सन् **अनुतिष्ठति** सेवते ।

नैनं शर्वो न भवो नेशानो पशून्
न समानान् हिनस्ति य एवं वेद ।।१६।।

पदपाठः

न । एनम् । शर्वः । न । भवः । न । ईशानः । न । अस्य । पशून् । न । समानान् । हिनस्ति । यः । एवम् । वेद ।।१६।।

पूर्वं व्याख्यातोऽयं मन्त्रः (अथर्व० १५।५।३)

इति प्रथमेऽनुवाके पञ्चमं पर्यायसूक्तम् ।

षष्ठं पर्यायसूक्तम्

षड्विंशत्यृचस्यास्य पर्यायस्य प्रथमा-चतुर्थ्योर्ऋचोरासुरी पङ्क्तिः, द्वितीया-सप्तदश्योरार्ची पङ्क्तिः, तृतीयाया आर्षी पङ्क्तिः, पञ्चम्येकादश्योः साम्नी त्रिष्टुप्, षष्ठी - द्वादश्योर्निचृद्बृहती, सप्तमी-दशमी-त्रयोदशी-षोडशी-चतुर्विंशीनामासुरी बृहती अष्टम्याः साम्नी पङ्क्तिः, नवम्याः प्राजापत्या त्रिष्टुप्, चतुर्दशी-त्रयोविंश्योरार्ची त्रिष्टुप्, पञ्चदश्यष्टादश्योर्विराड्जगती, एकोनविंश्या आर्च्युष्णिक्, विंश्याः साम्न्य-नुष्टुप्, एकविंश्या आर्ची बृहती, द्वाविंश्याः परोष्णिक्, पञ्चविंश्या आर्च्यनुष्टुप्, षड्विंश्याश्च विराड्बृहती छन्दांसि ।

स ध्रुवां दिशमनुव्यऽचलत् ।।१।।

पदपाठः

सः । ध्रुवाम् । दिशम् । अनु । वि । अचलत् ।।१।।

सः विराड्रूपो व्रात्यो **ध्रुवां दिशम् अनु** पृथ्वीमनुलक्ष्य अधोवर्तिनीं दिशामनु इत्यर्थः, **व्यचलत्** विविधं चचाल । पृथिव्यां सर्वत्र प्रससारेत्यर्थः ।

तं भूमिश्चाग्निश्चौषधयश्च वनस्पतयश्च
वानस्पत्याश्च वीरुधश्चानुव्यऽचलन् ।।२।।

पदपाठः

तम् । भूमिः । च । अग्निः । च । ओषधयः । च । वनस्पतयः । च । वानस्पत्याः । च । वीरुधः । च । अनुऽव्यचलन् ।।२।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तम् अधोवर्त्तमानां दिशमनुयान्तं व्रात्यं, **भूमिः** भूम्युपलक्षिताः सर्वे पार्थिवपदार्थाः । अग्रे तदेव स्पष्टयति–**अग्निः** पार्थिवोऽग्निः, **ओषधयः** फलपाकान्ताः, व्रीहियवाद्यन्नानि इत्यर्थः, 'ओषध्यः फलपाकान्ताः' इत्यमरः (२।४।६) । **वनस्पतयः** विना पुष्पोद्गमं फलवन्तस्तरवः । 'तैरपुष्पाद् वनस्पतिः' इत्यप्यमरः (२।४।६) । चकारः समुच्चयार्थकः । वानस्पत्यः "वानस्पत्यः फलैः पुष्पात्" इत्यमरः (२।४।६) इत्युक्तेः पुष्पोद्गमेन सह फलिनो वृक्षाः आम्रनिम्बु-कदलीप्रभृतयः । **वीरुधश्च** शाखादिभिर्विस्तृता लताश्च । विरुणद्धीति वीरुत् । विपूर्वकात् रुधिर् आवरणे (रुधा०) धातोः क्विप् । 'अन्येषामपि दृश्यते' (पा० सू० ६।३।१०७) इत्यनेन दीर्घश्च । **अनुव्यचलन्** तमनुसृत्यागच्छन् । तमन्वसरन्नित्यर्थः ।

भूमेश्च वै सो॒ऽग्नेश्चौषधीनां च वनस्पतीनां च
वानस्पत्यानां च वीरुधां च प्रियं धाम भवति य एवं वेद ॥३॥

पदपाठ;

भूमेः । च । वै । सः । अग्नेः । च । ओषधीनाम् । च । वनस्पतीनाम् । च । वानस्पत्यानाम् । च । वीरुधाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥३॥

यः खलु याजकः **एवं वेद** भगवतो व्रात्यस्यैवंविधं व्यापकस्वरूपं महत्त्वं च वेत्ति **स वै** निश्चयेन **भूमेश्च** पृथिव्याः, **अग्नेः** पार्थिवाग्नेः, **ओषधीनां** व्रीहियवाद्यन्नौषधीनाम्, **वनस्पतीनां** पुष्पोद्गमं विना फलवतां वृक्षाणाम्, **वानस्पत्यानाम्** आम्रकदलीप्रभृतीनां पुष्पोद्गमेन सह फलवतां शाखिनाम्, **वीरुधां च** शाखाप्रशाखादिभिः विस्तृतानां लतानाञ्च **प्रियं धाम** प्रियस्थानं **भवति** जायते । स सर्वेषां स्नेहं लभते । सर्वे तस्मिन् स्निह्यन्तीत्यर्थः ।

स ऊर्ध्वां दिशमनुव्य॑चलत् ॥४॥

पदपाठः

सः । ऊर्ध्वाम् । दिशम् । अनु । वि । अचलत् ॥४॥

सः व्रात्यः **ऊर्ध्वां दिशम् अनु** अन्तरिक्षमभिलक्ष्य **व्यचलत्** चचाल । प्रससारेत्यर्थः ।

तमृतं च सत्यं च सूर्यश्च चन्द्रश्च
नक्षत्राणि चानुव्य॑चलन् ॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तम् । ऋतम् । च । सत्यम् । च । सूर्यः । च । चन्द्रः । च । नक्षत्राणि । च । अनुऽव्यचलन् ॥५॥

तमनु तं व्रात्यमनुलक्ष्य **ऋतं च सत्यं च** पृथ्वी च द्यौश्च । भवति चात्र ब्राह्मणम् "इयं वा ऋतम् असौ सत्यम्" (तै० सं० ५।१।५।८) इति । यद्वा ऋतं सत्यं यज्ञः 'ऋतं वै सत्यं यज्ञः' (मैत्रा० १।१०।११) इति श्रुतेः । चकारः समुच्चयार्थः । **सूर्यः चन्द्रश्च** अन्तरिक्षे प्रकाशमानः आदित्यश्चन्द्रमाश्च । **नक्षत्राणि** तारागणाः अपि **व्यचलन्**, व्रात्यस्यानुगमनमकुर्वन् ।

ऋतस्य च वै स सत्यस्य च सूर्यस्य च
चन्द्रस्य च नक्षत्राणां च प्रियं धाम भवति य एवं वेद ॥६॥

पदपाठः

ऋतस्य । च । वै । सः । सत्यस्य । च । सूर्यस्य । च । चन्द्रस्य । च । नक्षत्राणाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥६॥

यः कश्चिज्जनः व्रात्यस्य **एवं वेद** ईदृशं तत्त्वं वेत्ति **स वै** जनः **ऋतस्य** भूलोकस्य, **सत्यस्य** द्युलोकस्य । यद्वा यज्ञस्य । सूर्यस्य चन्द्रस्य सूर्याचन्द्रमसोः, **नक्षत्राणां** तारागणानां च **प्रियं धाम** प्रेमस्थानं **भवति** । एतेषां सर्वेषां कृपां प्राप्नोति स इत्यर्थः ।

स उत्तमां दिशमनुव्यऽचलत् ॥७॥

पदपाठः

सः । उत्ऽतमाम् । दिशम् । अनु । वि । अचलत् ॥७॥

सः व्रात्यः **उत्तमां दिशमनु** पूर्वदिशामनुसृत्य **व्यचलत्** चलितवान् ।

तमृचश्च सामानि च यजूंषि च ब्रह्म चानुव्यऽचलन् ॥८॥

पदपाठः

तम् । ऋचः । च । सामानि । च । यजूंषि । च । ब्रह्म । च । अनुऽव्यऽचलन् ॥८॥

तमनु तं व्रात्यम् अनुसृत्य **ऋचः** ऋङ्मन्त्राः, **सामानि** साममन्त्राः, **यजूंषि च** यजुर्मन्त्राः, तथा **ब्रह्म** ब्रह्मवेदमन्त्राः अर्थात् अथर्वमन्त्राः । भवत्यत्र ब्राह्मणम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

"अथर्वाणो वै ब्रह्मणः समानः" (काठकसं०)। व्यचलन् चत्वारोऽपि वेदाः व्रात्यमनुसृतवन्तः ।

ऋचां च वै स साम्नां च यजुषां च ब्रह्मणश्च
प्रियं धाम भवति य एवं वेद ॥९॥

पदपाठः

ऋचाम् । च । वै । सः । साम्नाम् । च । यजुषाम् । च । ब्रह्मणः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥९॥

यो हि यजमानः एवं वेद व्रात्यस्यैवंविधं महत्त्वं जानाति **स वै ऋचां साम्नां यजुषां च** त्रयाणां वेदानां **ब्रह्मणः च** चतुर्थस्य ब्रह्मवेदस्य च **प्रियं धाम भवति** जायते, प्रेमास्पदतां लभते इत्यर्थः ।

स बृहतीं दिशमनुव्यऽचलत् ॥१०॥

पदपाठः

सः । बृहतीम् । दिशम् । अनु । वि । अचलत् ॥१०॥

सः व्रात्यः **बृहतीं दिशम् अनु** "अयं मध्यमो (लोको) बृहती" (तां० ब्रा० ७।३।९) इत्युक्तेः आन्तरिक्ष्यं देशम् अनुलक्ष्य । यद्वा 'बृहती स्वर्गो लोकः' (काठ० ३४।७) स्वर्गीयां दिशमनुलक्ष्य **व्यचलत्**, चचाल ।

तमितिहासश्च पुराणं च गाथाश्च
नाराशंसीश्चानुव्यऽचलन् ॥११॥

पदपाठः

तम् । इतिहऽआसः । च । पुराणम् । च । गाथाः । च । नाराशंसीः । च । अनुऽव्यऽचलन् ॥११॥

तम् अनु बृहतीं दिशमनुव्रजन्तं व्रात्यमनुसृत्य **इतिहासः** प्राचीनेतिवादाः **पुराणं** पुराणशास्त्राणि, **गाथाः** प्राक्तनाः कथाश्च, **नाराशंसीः** च नरैः स्तोतृभिः शंसनीयाः ऋचः । यद्वा येन नरा प्रशस्यन्ते स नाराशंसो मन्त्रः । स्त्रियां ङीप् । ईदृश्यः ऋचश्च **व्यचलन्** तदनुगमनमकुर्वन् । अर्थात् सेतिहासपुराणाः सर्वे वेदास्तमन्वगच्छन् ।

इतिहासस्य च वै स पुराणस्य च गाथानां च
नाराशंसीनां च प्रियं धाम भवति य एवं वेद ॥१२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

इतिहऽआसस्य । च । वै । सः । पुराणस्य । च । गाथानाम् । च । नाराशंसीनाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ।।१२।।

यो जनः **एवं वेद** व्रात्यस्यैवंविधं स्वरूपं वेत्ति **स वै** इतिहास-पुराण-गाथानां नाराशंसीनां च ऋचां **प्रियं धाम** प्रियस्थानं **भवति** जायते ।

स परमां दिशमनुव्यऽचलत् ।।१३।।

पदपाठः

सः । परमाम् । दिशम् । अनु । वि । अचलत् ।।१३।।

सः व्रात्यः **परमां** सर्वोत्कृष्टाम् ऊर्ध्वां **दिशमनु** ऊर्ध्वदिशां प्रति **व्यचलत्** चचाल । प्रससारेत्यर्थः ।

तमाहवनीयश्च गार्हपत्यश्च दक्षिणाग्निश्च
यज्ञश्च यजमानश्च पशवश्चानुव्यऽचलन् ।।१४।।

पदपाठः

तम् । आऽहवनीयः । च । गार्हऽपत्यः । च । दक्षिणऽअग्निः । च । यज्ञः । च । यजमानः । च । पशवः । च । अनुऽव्यऽचलन् ।।१४।।

तं परमां दिशमनुचलन्तं व्रात्यम् **अनु** समुदिश्य **आहवनीयः** श्रौतयज्ञेषु द्यु स्थानीयः आहवनीयाग्निः । भवति चात्र श्रुतिः—"द्यौराहवनीयः" (श० ब्रा० ८।६।३।१४) । तैत्तिरीया अप्येवमामनन्ति— "क्वास्त्याहवनीय इत्यसावादित्य इति ब्रूयात् । एतस्मिन् हि सर्वाभ्यो देवताभ्यो जुह्वतीति" (तै० सं० ५।७।४।२) इति । **गार्हपत्यश्च** यज्ञेषु यज्ञमहावेद्याः पश्चिमस्थाने स्थापितः पार्थिवाग्निर्गार्हपत्यश्च, दक्षिणे स्थापितो **दक्षिणाग्निः**, स्वयं **यज्ञः** तथा **यजमानो** याजकः एवं **पशवः** यज्ञ-सम्पादनसाधनभूताः धानाः 'पशवो वै धानाः' (गो० उ० ४।६) इति श्रुतेः । यद्वा 'पशवो वै मरुतः' (ऐ० ब्रा० ५।८) मरुद्गणाः **व्यचलन्** व्रात्यमनु अव्राजिषुः ।

आहवनीस्य च वै स गार्हपत्यस्य च दक्षिणाग्नेश्च
यज्ञस्य च यजमानस्य च पशूनां च प्रियं धाम
भवति य एवं वेद ।।१५।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

आऽहवनीयस्य । च । वै । सः । गार्हऽपत्यस्य । च । दक्षिणऽअग्नेः । च । यज्ञस्य । च । यजमानस्य । च । पशूनाम् । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥१५॥

यो वै जनः **एवं वेद** व्रात्यमहत्त्वमेवंविधं वेत्ति **स** वै याजकः **आहवनीयस्य** आहवनीयकुण्डे स्थापितस्याग्नेः, **गार्हपत्यस्य** गार्हपत्यकुण्डे संस्थापितस्याग्नेः अर्थात् पार्थिवाग्नेः, **दक्षिणाग्नेः** दक्षिणाकुण्डे स्थापितस्याग्नेः, **यज्ञस्य** यज्ञपुरुषस्य, **यजमानस्य** याजकस्य । यद्वा 'एष वै यजमानो यत्सोमः, (तै० ब्रा० १।३।३।५) इति श्रुतेः सोमस्य **पशूनां च** यज्ञसाधनभूतानां धानानां मरुतां वा **प्रियं धाम** प्रियकरं स्थानं **भवति** जायते ।

सोऽनादिष्टां दिशमनु व्य्ऽचलत् ॥१६॥

पदपाठः

सः । अनादिष्टाम् । दिशम् । अनु । वि । अचलत् ॥१६॥

ततः **स** व्रात्यः **अनादिष्टाम्** अनिर्दिष्टां **दिशमनु** दिशां प्रति **व्यचलत्** विविधम् अचालीत् । प्रससार तत्रेत्यर्थः ।

तमृतवश्चार्तवाश्च लोकाश्च लौक्याश्च मासाश्चार्ध-मासाश्चाहोरात्रे चानुव्य्ऽचलन् ॥१७॥

पदपाठः

तम् । ऋतवः । च । आर्तवाः । च । लोकाः । च । लौक्याः । च । मासाः । च । अर्धऽमासाः । च । अहोरात्रे इति । च । अनुऽव्यऽचलन् ॥१७॥

अनादिष्टां दिशमनुचलन्तं तं व्रात्यमनुसृत्य **ऋतवः** वसन्तादयः षड्ऋतवः, **आर्त्तवाः** ऋतुसमुद्भवाः सर्वे पदार्थाः, **लोकाः** भूर्भुवः स्वः—प्रभृतयः सप्त लोकाः । यथा चोक्तं श्रुतौ—"एता वै व्याहृतयः, इमे वै लोकाः" (तै० ब्रा० २।२।४।३) इति । 'सप्त इमे लोकाः' इति काठकाश्च । (काठं० सं० २५।२।३) यद्वा त्रयो लोकाः । आमनन्ति चैवं याज्ञिकाः "त्रयो वाव लोकाः मनुष्यलोकः पितृलोको देवलोकश्चेति" (श० ब्रा० १४।४।३।२४) इति । **लौक्याश्च** लोकेष्वेषु भवाः पदार्थाः, **मासाः** द्वादश त्रयोदश वा चैत्राद्या मासाः, **अर्धमासाः** पक्षाः इत्यर्थः, तथा **अहोरात्रे** रात्रयः दिवसाश्च **अनुव्यचलन्** इमे सर्वे तमेवान्वसरन् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋतूनां च वै स आर्तवानां च लोकानां च लौक्यानां च मासानां चार्धमासानां चाहोरात्रयोश्च प्रियं धाम भवति य एवं वेद ।।१८।।

पदपाठः

ऋतूनाम् । च । वै । सः । आर्तवानाम् । च । लोकानाम् । च । लौक्यानाम् । च । मासानाम् । च । अर्धऽमासानाम् । च । अहोरात्रयोः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ।।१८।।

यो जनः **एवं वेद** व्रात्यस्येदृशं व्यापकं रूपं जानाति **स वै** निश्चयपूर्वकं स **ऋतूनां** षण्णामृतूनाम्, **आर्त्तवानाम्** ऋतूद्भवानां पदार्थानां, **लोकानां** पृथिव्यादि-लोकानां, **लौक्यानां च** लोकोद्भवानां पदार्थानां च **द्वादश मासानाम्, अर्धमासानां** पक्षाभिधेयानां मासार्धानाम् **अहोरात्रयोश्च** रात्रीणां दिनानां च **प्रियं धाम भवति** प्रेमास्पदत्वं लभते इत्यर्थः ।

सोऽनावृत्तां दिशमनु व्य१चलत् ततो नावत्स्यंन्नमन्यत ।।१९।।

पदपाठः

सः । अनावृत्ताम् । दिशम् । अनु । वि । अचलत् । ततः । न । आऽवत्स्र्यन् । अमन्यत ।।१९।।

सः व्रात्यः **अनावृत्ताम्** अज्ञातां प्रत्यावर्त्तनरहितां वा **दिशमनु** दिशामुद्दिश्य **व्यचलत्** विविधं चचाल । **ततः स** व्रात्यः तस्याः दिशः **न आवत्स्र्यन्** नैव प्रत्यागमनेच्छुर्भविष्यतीति **अमन्यत** अबुध्यत । नाहं ततः प्रत्यागमिष्यामीति स मनसि निश्चयमकार्षीत् इत्यर्थः ।

तं दितिश्चादितिश्चेडा चेन्द्राणी चानुव्य१चलन् ।।२०।।

पदपाठः

तम् । दितिः । च । अदितिः । च । इडा । च । इन्द्राणी । च । अनुऽव्यऽचलन् ।।२०।।

अनावृत्तां दिशमनुप्रयान्तं **तं** व्रात्यमनु अनुसृत्य **दितिः** दैत्यानां माता । यद्वा खण्डिता नाशशीला सृष्टिः । दो अवखण्डने (दि०) धातोः स्त्रियां क्तिन् । **अदितिश्च** आदित्यानां देवानां माता । यद्वा जगत्प्रतिष्ठास्वरूपा अखण्डिता नाश-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

शून्या प्रकृतिः । अत एवोच्यते "प्रतिष्ठा वा अदितिः" (तै०ब्रा० ५।३।४।४) इति । अथवा "इयं वै पृथिव्यदितिः" (श० ब्रा० १।१।४।५) इति श्रुतेः इयं पृथिवी । **इडा च,** वाङ्नामसु पाठात् वाक्, यद्वा 'अन्नं वा इडा' (ऐ० ब्रा० ८।२६) अन्नानि । **इन्द्राणी** च इन्द्रपत्नी च "इन्द्राणी इन्द्रस्य पत्नी" इति नैरुक्ताः (निरु० ११।४।३७) । भवति चात्र ब्राह्मणम् "इन्द्राणी ह वा इन्द्रस्य प्रिया पत्नी" (श० ब्रा० १४।२।१।८) इति । एताः सर्वा देवताः **अनुव्यचलन्,** तमन्वगच्छन् ।

दितेश्च वै सोदितेश्चेडायाश्चेन्द्राण्याश्च
प्रियं धाम भवति य एवं वेद ॥२१॥

पदपाठः

दितेः । च । वै । सः । अदितेः । च । इडायाः । च । इन्द्राण्याः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥२१॥

यः कश्चन जनः **एवं वेद** व्रात्यस्यैवंविधं तत्त्वं वेत्ति **सः वै** पुरुषः **दितेः, अदितेः, इडायाः** अन्नस्य **इन्द्राण्याः च प्रियं धाम** प्रियं स्थानं **भवति** जायते ।

स दिशोनु व्य१चलत् तं विराडनु व्य१चलत्
सर्वे च देवाः सर्वाश्च देवताः ॥२२॥

पदपाठः

सः । दिशः । अनु । वि । अचलत् । तम् । विऽराट् । अनु । वि । अचलत् । सर्वे । च । देवाः । सर्वाः । च । देवताः ॥२२॥

यदा **सः** व्रात्यः, **दिशः** सर्वा दिशाः **अनुव्यचलत्** अनुसृत्य चचाल । तदा समस्तास्ता दिशाः अनुप्रसरन्तं तं व्रात्यमनु **विराट्** 'स्वर्गो वै लोको विराट्' (काठ० ३३।२) इति श्रुतेः स्वर्गो लोकः, **सर्वे देवाः** स्वर्गवासिनो देवाः इन्द्राद्याः, **सर्वाः** समस्ताः **देवताः** इन्द्राणीप्रभृतयः सर्वाः देव्यश्च । यद्वा 'प्राणा वै देवताः' (मैत्रा० २।३।५) सर्वे प्राणाश्च तमन्वगच्छन् इति शेषः ।

विराजश्च वै स सर्वेषां च देवानां सर्वासां च
देवतानां प्रियं धाम भवति य एवं वेद ॥२३॥

पदपाठः

विऽराजः । च । वै । सः । सर्वेषाम् । च । देवानाम् । सर्वासाम् । च । देवतानाम् । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥२३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः पुरुषः, **एवं वेद** व्रात्यस्यैवंविधं विराड्रूपं जानाति, **स वै** निश्चयेन सः पुरुषः **विराजः** विराट्पुरुषस्य, **सर्वेषां देवानां** समस्तसुराणामिन्द्रादीनां **सर्वासां देवतानां** समस्तदेवीनां च **प्रियं धाम** प्रियस्थानं **भवति** जायते ।

स सर्वानन्तर्देशाननु व्यऽचलत् ।।२४।।

पदपाठः

सः । सर्वान् । अन्तऽर्देशान् । अनु । वि । अचलत् ।।२४।।

सः व्रात्यः **सर्वान्** निखिलान् **अन्तर्देशान् अनु** मध्यप्रदेशान् प्रति **व्यचलत्** विविधं चचाल ।

तं प्रजापतिश्च परमेष्ठी च पिता च

पितामहश्चानुव्यऽचलन् ।।२५।।

पदपाठः

तम् । प्रजाऽपतिः । च । परमेऽस्थी । च । पिता । च । पितामहः । च । अनुऽव्यऽचलन् ।।२५।।

सर्वान् मध्यप्रदेशाननु प्रसरन्तं **तं** व्रात्यम् **अनु** तेन सार्धमित्यर्थः । **प्रजापतिः** 'आत्मा वै प्रजापतिः' (श०ब्रा० ४।५।६।२) इति श्रुतेः आत्मा । यद्वा 'एतद्वै प्रजापतेः प्रत्यक्षं रूपं यद्वायुः' (कौषी० १६।२) इति वचनाद् वायुः । **परमेष्ठी** च परमे स्थाने स्थितो ब्रह्मा । यद्वा 'आपो वै प्रजापतिः परमेष्ठी' (श०ब्रा० ८।२।३।१३) । आपोदेव्यः । अस्य निर्वचनं प्रतिपादयति श्रुतिः—परमाद्वा एतत्स्थानाद् वर्षति यद्दिवः, तस्मात् परमेष्ठी नाम' (श०ब्रा० ११।१।६।१६) । तथा **पिता** सूर्यः । भवति चात्र ब्राह्मणम् ' एष वै पिता य एष तपति ।' श० ब्रा० १४।१।४।५) इति । **पितामहश्च** एतेषां पितुरपि पिता चापि एते सर्वे एव **व्यचलन्** तमन्वगच्छन् ।

प्रजापतेश्च वै स परमेष्ठिनश्च पितुश्च

पितामहस्य च प्रियं धाम भवति य एवं वेद ।।२६।।

पदपाठः

प्रजाऽपतेः । च । वै । सः । परमेऽस्थिनः । च । पितुः । च । पितामहस्य । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ।।२६।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः कश्चन **एवं वेद** व्रात्यमेवंविधं वेत्ति **सः वै** निश्चप्रचं स पुरुषः **प्रजापतेः** आत्मनः वायोर्वा **परमेष्ठिनः** परमस्थानस्थितस्य ब्रह्मणः, **पितुः** सवितुः **पितामहस्य** विश्वसृजश्च **प्रियं धाम भवति** ।

इति प्रथमेऽनुवाके षष्ठं पर्यायसूक्तम् ।

सप्तमं पर्यायसूक्तम्

पञ्चर्चस्यास्य पर्यायस्य प्रथमर्चस्त्रिपदा निचृद्गायत्री, द्वितीयाया एकपदा विराड्बृहती, तृतीयाया विराडुष्णिक्, चतुर्थ्या एकपदा गायत्री, पञ्चम्याश्च पङ्क्तिश्छन्दांसि ।

स महिमा सद्रुर्भूत्वान्तं पृथिव्या अगच्छत् स समुद्रोऽभवत् ॥१॥

पदपाठः

सः । महिमा । सद्रुः । भूत्वा । अन्तम् । पृथिव्याः । अगच्छत् । सः । समुद्रः । अभवत् ॥१॥

सः व्रात्यो विराट्, **महिमा** आत्ममहिम्ना **सद्रुः** गतिशीलः वेगशाली इत्यर्थः । भूत्वा **पृथिव्याः** भूमेः **अन्तम् अगच्छत्** गतवान्, समुद्रपर्यन्तं प्रससारेत्यर्थः । भवति चात्र श्रुतिः—'**तस्या** अस्यै (पृथिव्यै) समुद्रोऽन्तः' (जै०ब्रा० १।२६३) इति । अतः **सः** व्रात्यस्तत्र **समुद्रः** अभवत् । समुद्रं प्राप्य स समुद्ररूप एवाभवत् । अत एवामनन्ति आथर्वणिकाः–'तद् यत् समद्रवन्त तस्मात् समुद्र उच्यते' (गोप०ब्रा० १।१।७) इति । महिमा इत्यत्र मह पूजायां (भ्वा०) धातोः औणादिकः अत्प्रत्ययः ।

तं प्रजापतिश्च परमेष्ठी च पिता च पितामहश्चापश्च श्रद्धा च वर्षं भूत्वानुव्य्वर्तयन्त ॥२॥

पदपाठः

तम् । प्रजाऽपतिः । च । परमेऽस्थी । च । पिता । च । पितामहः । च । आपः । च । श्रद्धा । च । वर्षम् । भूत्वा । अनुऽव्यऽवर्तयन्त ॥२॥

समुद्रस्वरूपं व्रात्यं **तं प्रजापतिः** आत्मप्रजापतिः वायुर्वा **परमेष्ठी** च परमे स्थाने स्थितो ब्रह्मा, यद्वा आपोदेवताः, 'आपो वै प्रजापतिः परमेष्ठी' (श० ब्रा० ८।२।३।१३) इति श्रुतेः । **पिता** सविता, **पितामहश्च**, **आपश्च** जलानि, **श्रद्धा** च सूर्यदुहिता च 'श्रद्धा वै सूर्यस्य दुहिता' इति शतपथब्राह्मणम् (१२।७।३।११) । यद्वा दीक्षारूपश्रद्धा । यथा चामनन्ति माध्यन्दिनीयाः 'एतद्दीक्षायै रूपं यच्छ्रद्धा'

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

(श०ब्रा० १२।८।२।४) इति । काठकास्तु 'आपः श्रद्धा' (३१।३) इत्युद्घोषयन्ति । इमे सर्वे **वर्षं** भूत्वा वृष्टिर्भूत्वा **अनु व्यवर्तयन्त** तं व्रात्यमनु प्राप्य तत्र वर्त्तमाना अभवन् । तदनुकूलमाचरन्तस्तत्सेवायां संलग्ना जाता इत्यर्थः ।

ऐनमापो गच्छन्त्यैनं श्रद्धा गच्छत्यैनं वर्षं
गच्छति य एवं वेद ॥३॥

पदपाठः

आ । एनम् । आपः । गच्छति । आ । एनम् । श्रद्धा । गच्छति । आ । एनम् । वर्षम् । गच्छति । यः । एवम् । वेद ॥३॥

यो यजमानः **एवं वेद** व्रात्यस्यैवंविधं महत्त्वं जानाति **एनं** जनम् **आपो** जलानि आगच्छन्ति, एनं **श्रद्धा** दीक्षा सूर्यसुता वा **आगच्छति,** **एनं** च **वर्षं** वृष्टिः आगच्छति । स सर्वान् इमान् पदार्थान् लभते इत्यर्थः ।

तं श्रद्धा च यज्ञश्च लोकश्चान्नं
चान्नाद्यं च भूत्वाभिपर्यावर्तन्त ॥४॥

पदपाठः

तम् । श्रद्धा । च । यज्ञः । च । लोकः । च । अन्नम् । च । अन्नऽअद्यम् । च । भूत्वा । अभिऽपर्यावर्तन्त ॥४॥

तं व्रात्यं परमात्मानं **श्रद्धा. यज्ञः लोकः** लोकसमूहः, **अन्नम्** व्रीहियवाद्यन्न-जातम् । **अन्नाद्यं** भक्षणीयं सुपक्वं सुसंस्कृतं च भोज्यजातम् । इमानि सर्वाणि वस्तूनि **भूत्वा** तन्मयत्वं लब्ध्वा इत्यर्थः, **अभिपर्यावर्त्तन्त** तमभितः अवर्त्तन्त, तमुपासाञ्चक्रु-रित्यर्थः ।

ऐनं श्रद्धा गच्छत्यैनं यज्ञो गच्छत्यैनं लोको
गच्छत्यैनमन्नं गच्छत्यैनमन्नाद्यं गच्छति य एवं वेद ॥५॥

पदपाठः

आ । एनम् । श्रद्धा । गच्छति । आ । एनम् । यज्ञः । गच्छति । आ । एनम् । लोकः । गच्छति । आ । एनम् । अन्नम् । गच्छति । आ । एनम् । अन्नऽअद्यम् । गच्छति । यः । एवम् । वेद ॥५॥

यः कश्चन जनः **एवं वेद** व्रात्यमेवंविधं जानाति **एनं** जनं **श्रद्धा आगच्छति,** एनं यज्ञः आगच्छति, एनं **लोकः आगच्छति,** एनम् अन्नम् **आगच्छति,** एनम् अन्ना-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्यम् **आगच्छति च**। व्रात्यमहत्त्वं जानानो जनः सर्वाणि इमानि वस्तूनि लभते इत्यर्थः।

इति प्रथमेऽनुवाके सप्तमं पर्यायसूक्तम्।

इति प्रथमोऽनुवाकः

अष्टमं पर्यायसूक्तम्

तृचस्यास्य पर्यायस्य प्रथमर्चः साम्न्युष्णिक्, द्वितीयायाः प्राजापत्यानुष्टुप्, तृतीयायाश्चार्ची पङ्क्तिश्छन्दांसि।

सोऽरज्यत ततो राजन्योऽजायत ॥१॥

सः। अरज्यत। ततः। राजन्यः। अजायत ॥१॥

व्रात्यं गणाध्यक्षं परमेश्वरं सर्वत्र व्याप्तञ्च विनिर्दिश्य श्रुतिः साम्प्रतमस्य लोकरक्षकस्वरूपं विनिर्दिशति। **स** व्रात्यः **अरज्यत** प्रजास्वनुरक्तोऽभूत्, प्रजानुरञ्जनं चकारेत्यर्थः। **ततः** तस्मादेव **राजन्यः** अजायत प्रजानामधिपतिरुद्बभूव। भवति चात्र श्रुतिः "राजन्यो वै प्रजानामधिपतिः" (काठ० २८।१) इति। राजन्यः क्षत्रियत्वजातिविशिष्टः —इत्यन्यत्र सायणः (ऋ० १०।९।१२)

स विशः सबन्धूनन्नमन्नाद्यमभ्युदतिष्ठत् ॥२॥

पदपाठः

सः। विशः। सऽबन्धून्। अन्नम्। अन्नऽअद्यम्। अभिऽउदतिष्ठत् ॥२॥

राजन्यो भूत्वा **सः** व्रात्यः **विशः** प्रजाजनान् **सबन्धून्** समानान् वन्धुजनान्, यद्वा सबन्धून् इति केचन विशो विशेषणम्, बन्धुभिः सहितान् प्रजाजनान्, **अन्नम्** व्रीहियवाद्यन्नजातम्, **अन्नाद्यं** च अदनीयं सुसम्पादितं पदार्थजातम्, **अभि उदतिष्ठत्**। अभीत्य अधिष्ठितवान्। एतेषां सर्वेषाम् अधिष्ठाता अभूत्। स सर्वेष्वेषु व्याप्तवानित्यर्थः।

विशां च वै स सबन्धूनां चान्नस्य चान्नाद्यस्य च प्रियं धाम भवति य एवं वेद ॥३॥

पदपाठः

विशाम्। च। वै। सः। सऽबन्धूनाम्। च। अन्नस्य। च। अन्नऽअद्यस्य। च। प्रियम्। धाम। भवति। यः। एवम्। वेद ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यो याजकः **एवं वेद** व्रात्यस्यैवंविधं स्वरूपं वेत्ति **स वै** निश्चयेन **सबन्धूनां विशां** वन्धुजनसहितानां विशां प्रजानां **चान्नस्य** अन्नसमूहस्य **अन्नाद्यस्य** च सुसंस्कृतस्य भक्षणीयपदार्थजातस्य च **प्रियं धाम भवति** । तदुपरि इमे सर्वे प्रसन्ना जायन्ते इत्यर्थः ।

इति द्वितीयेऽनुवाके प्रथमं पर्यायसूक्तम् ।

नवमं पर्यायसूक्तम्

त्र्यृचस्यास्य पर्यायस्य प्रथमर्च आसुरी जगती, द्वितीयाया आर्ची गायत्री, तृतीयायाश्चार्ची पङ्क्तिश्छन्दांसि ।

स विशोऽनु व्य॑चलत् ॥१॥

पदपाठः

सः । विशः । अनु । वि । अचलत् ॥१॥

सः व्रात्यः **विशः** प्रजाजनान् **अनु** अनुसृत्य **व्यचलत्** विविधं चचाल ।

तं सभा च समितिश्च सेना च सुरा चानु व्यचलन् ॥२॥

पदपाठः

तम् । सभा । च । सम्ऽइतिः । च । सेना । च । सुरा । च । अनुऽव्यचलन् ॥२॥

विशोऽनुचलन्तं **तं** व्रात्यं **सभा** राज्यशासनसभा, **समितिः** समाजव्यवस्था सभा । यद्वा संग्रामनामसु पाठात् समितिः संग्रामः, **सेना** सैन्यम्, **सुरा** च षुर दीप्तौ ऐश्वर्ये च (तुदा०) धातोः कः, स्त्रियां टाप् च । राज्यैश्वर्यम् । यद्वा सु अतीव रायन्ति अनया । रै शब्दे (भ्वा०) धातोः "आतश्चोपसर्गे" (पा० सू० ३।३।१०६) इत्यङ् । वक्तृत्वशक्तिरित्यर्थः । सर्वाण्येतानि **अनुव्यचलन्** तमन्वगच्छन् ।

सभायाश्च वै स समितेश्च सेनायाश्च सुरायाश्च
प्रियं धाम भवति य एवं वेद ॥३॥

पदपाठः

सभायाः । च । वै । सः । सम्ऽइतेः । च । सेनायाः । च । सुरायाः । च । प्रियम् । धाम । भवति । यः । एवम् । वेद ॥३॥

यो याजकः **एवं वेद** व्रात्यस्यैवंविधं महत्त्वं वेत्ति **स वै** जनो निश्चयेन । शेषं स्पष्टम् ।

इति द्वितीयेऽनुवाके द्वितीयं पर्यायसूक्तम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

दशमं पर्यायसूक्तम्

एकादशर्चस्यास्य पर्यायस्य प्रथमर्चो द्विपदा साम्नी बृहती, द्वितीयायास्त्रिपदार्ची पङ्क्तिः, तृतीयाया द्विपदा प्राजापत्या पङ्क्तिः, चतुर्थ्यास्त्रिपदा वर्धमाना गायत्री, पञ्चम्यास्त्रिपदा साम्नी बृहती, षष्ठचष्टमी-दशमीनां द्विपदासुरी गायत्री, सप्तमीनवम्योः साम्न्युष्णिक्, एकादश्याश्चासुरी बृहती छन्दांसि ।

तद् यस्यैवं विद्वान् व्रात्यो राज्ञोऽतिथिर्गृहानागच्छेत् ॥१॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । राज्ञः । अतिथिः । गृहान् । आऽगच्छेत् ।

एवं **विद्वान्** सर्वं जानान एवंविधो **व्रात्यो** भगवान् **यस्य राज्ञः** भूपतेः **गृहान्** गेहम् **अतिथिः** प्राघुणिकः सन् **आगच्छेत्** उपस्थितो भवेत्, **तद्** तदा :— (अत ऊर्ध्वम् अग्रिमेण मन्त्रेण सम्बन्धः)

श्रेयांसमेनमात्मनो मानयेत् तथा क्षत्राय

ना वृश्चते तथा राष्ट्राय ना वृश्चते ॥२॥

पदपाठः

श्रेयांसम् । एनम् । आत्मनः । मानयेत् । तथा । क्षत्राय । न । आ । वृश्चते । तथा । राष्ट्राय । न । आ । वृश्चते ॥२॥

एनं समागतं गणाध्यक्षं व्रात्यम् **आत्मनः** आत्मनोऽपेक्षया **श्रेयांसं** समुच्चतरं लोकश्रेयस्करं **मानयेत्** स्वीकृत्य सत्कुर्यात् । **तथा** तथाकृते सति **न क्षत्राय** नैव आत्मनः क्षात्रधर्माय स **आवृश्चते** छिद्यते अपराधी भवति इत्यर्थः । तथा **न** स **राष्ट्राय** समस्तराज्यायैव **आवृश्चते** दोषी भवति । व्रात्यं सम्मान्य स सर्वेषां प्रियो भवतीत्यर्थः ।

अतो वै ब्रह्म च क्षत्रं च चोदतिष्ठतां

ते अब्रूतां कं प्र विशावेति ॥३॥

पदपाठः

अतः । वै । ब्रह्म । च । क्षत्रम् । च । उत् । अतिष्ठताम् । ते इति । अब्रूताम् । कम् । प्र । विशाव । इति ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वै इति निर्धारणे । **अतः** अस्मादेव व्रात्यात् **ब्रह्म च क्षत्रं** च ब्राह्मणक्षत्रियौ **उदतिष्ठताम्** समुदभवताम् । तौ ब्राह्मणक्षत्रियौ **अब्रूताम्** अवदताम्, अपृच्छतामित्यर्थः । **कं प्रविशाव** इति आवां कुत्र स्थानं लभेवहि ।

अतो वै बृहस्पतिमेव ब्रह्म प्रविशत्विन्द्रं क्षत्रं तथा वा इति ॥४॥

पदपाठः

अतः । वै । बृहस्पतिम् । एव । ब्रह्म । प्र । विशतु । इन्द्रम् । क्षत्रम् । तथा । वै । इति ॥४॥

अतो वै व्रात्यपरमेश्वराद् उत्पत्तिकारणादेव **ब्रह्म** ब्रह्मबलं **बृहस्पतिमेव** बृहतां पतिं देवमेव **प्रविशतु** तस्मिन्नेव प्रवेशं लभताम् । अत एवात्र भवन्ति श्रुतिवाक्यानि—'बृहस्पतिर्ब्रह्म ब्रह्मपतिः' (तै०ब्रा० २।५।७।४) । 'ब्रह्म बृहस्पतिः' (मैत्रा० २।३।५) । 'बृहस्पतिर्वै सर्वं ब्रह्म' (गो० ब्रा० २।१।३।४) इति च । **तथा** तथैव **क्षत्रं** क्षत्रियं बलं वर्चस्वं वा **इन्द्रं** प्रविशतु । अत एवाम्नायते—'इन्द्रः क्षत्रम्' श० ब्रा० १०।४।१।५) । 'इन्द्रो देवता (राजन्यस्य)' (तां० ब्रा० ६।१।८) । 'क्षत्रं वा इन्द्रः' (मैत्रा० १।१०।१३) इत्यादि ।

अतो वै बृहस्पतिमेव ब्रह्म प्राविशदिन्द्रं क्षत्रम् ॥५॥

पदपाठः

अतः । वै । बृहस्पतिम् । एव । ब्रह्म । प्र । अविशत् । इन्द्रम् । क्षत्रम् ॥५॥

अतो वै अस्मादेव हेतोः **ब्रह्म** ब्राह्मं तेजः **बृहस्पतिमेव** देवं **प्राविशत्** समविशत्, **क्षत्रं** क्षात्रं तेजश्च **इन्द्रं** देवं प्राविशत् ।

इयं वा उ पृथिवी बृहस्पतिर्द्यौरेवेन्द्रः ॥६॥

पदपाठः

इयम् । वै । ऊं इति । पृथिवी । बृहस्पतिः । द्यौः । एव । इन्द्रः ॥६॥

इयं वै उ एषैव **पृथिवी** विस्तृता भूमिः **बृहस्पतिः** बृहस्पतिरूपा अस्ति । **द्यौः एव च इन्द्रो** वर्त्तते । आम्नायते चैवमन्यत्रापि—'इन्द्रो द्यौः' (मैत्रा० ४।१४।७) इति ।

अयं वा उ अग्निर्ब्रह्मासावादित्यः क्षत्रम् ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

अयम् । वै । ॐ इति । अग्निः । ब्रह्म । असौ । आदित्यः । क्षत्रम् ।।७।।

अयं वै उ एष एव प्रत्यक्षं दृश्यमानः **अग्निः** ब्रह्म विद्यते । असौ द्यु्स्थानीय **आदित्यः** क्षत्रं वर्त्तते । अत एवोच्यते—'अग्निरेव ब्रह्म' (श० ब्रा० १०।४।१।५) तथा 'तद्दैव्यं क्षत्रम् (आदित्यलोकस्थानम्)' (तै० ब्रा० ३।८।१०।३) इति ।

ऐनं ब्रह्म गच्छति ब्रह्मवर्चसी भवति ।।८।।

यः पृथिवीं बृहस्पतिमग्निं ब्रह्म वेद ।।९।।

पदपाठः

आ । एनम् । ब्रह्म । गच्छति । ब्रह्मऽवर्चसी । भवति ।।८।।

यः । पृथिवीम् । बृहस्पतिम् । अग्निम् । ब्रह्म । वेद ।।९।।

यो यजमानः **पृथिवीं** विस्तृतां भूमिं तु **बृहस्पतिं** बृहस्पतिस्वरूपाम्, **अग्निं** च **ब्रह्म** ब्रह्मस्वरूपं वेद वेत्ति ।।८।।

एनं एवं ज्ञातारं **ब्रह्म आगच्छति,** स ब्रह्मणा युज्यते, स **ब्रह्मवर्चसी** ब्रह्मतेजस्वी **भवति** जायते च ।।९।।

ऐनमिन्द्रियं गच्छतीन्द्रियवान् भवति ।।१०।।

य आदित्यं क्षत्रं दिवमिन्द्रं वेद ।।११।।

पदपाठः

आ । एनम् । इन्द्रियम् । गच्छति । इन्द्रियऽवान् । भवति ।।१०।।

यः । आदित्यम् । क्षत्रम् । दिवम् । इन्द्रम् । वेद ।।११।।

एनं जनं इन्द्रियं सामर्थ्यं यद्वा धननामसु पाठात् (निघं० २।१०) धनम् **आगच्छति** । अत एव स **इन्द्रियवान्** सामर्थ्यशाली ऐश्वर्यवान् वा भवति ।।१०।।

यो हि जन **आदित्यं** देवं **क्षत्रं** क्षत्ररूपेण **वेद** वेत्ति यश्च **दिवं** द्युलोकम् **इन्द्रम्** इन्द्ररूपेण जानाति । एनम् इति पूर्वेण सम्बन्धः ।।११।।

इति द्वितीयेऽनुवाके तृतीयं पर्यायसूक्तम् ।

एकादशं पर्यायसूक्तम्

एकादशर्चस्यास्य पर्यायस्य प्रथमर्चो दैवी पङ्क्तिः, द्वितीयाया द्विपदापूर्वात्रिष्टुबतिशक्वरी, तृतीयादिचतसृणामष्टम्याश्च निचृदार्ची बृहती, सप्तमी-नवम्यो-

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

द्विपदा प्राजापत्या बृहती, दशम्या भुरिगार्ची बृहती, एकादश्याश्च द्विपदार्च्यनुष्टुप् छन्दांसि ।

तद् यस्यैवं विद्वान् व्रात्योऽतिथिर्गृहानागच्छेत् ।

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । अतिथिः । गृहान् । आऽगच्छेत् ॥१॥

पूर्वं व्याख्यातः (अथर्व० १५।२।३।१)

स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्य क्वाऽवात्सीर्व्रात्योदकं
व्रात्य तर्पयन्तु व्रात्य यथा ते प्रियं तथास्तु
व्रात्य यथा ते वशस्तथास्तु व्रात्य यथा ते
निकामस्तथास्त्विति ॥२॥

पदपाठः

स्वयम् । एनम् । अभिऽउदेत्य । ब्रूयात् । व्रात्य । क्वऽ । अवात्सीः । व्रात्य । उदकम् । व्रात्य । तर्पयन्तु । व्रात्य । यथा । ते । प्रियम् । तथा । अस्तु । व्रात्य । यथा । ते । वशः । तथा । अस्तु । व्रात्य । यथा । ते । निऽकामः । तथा । अस्तु । इति ॥२॥

स्वयं गृहस्वामी **एनम् अभि** समागतमिमं व्रात्यम् **उदेत्य** उपेत्य **ब्रूयात्** आत्मीयत्वं प्रदर्शयन् सविनयं निवेदयेत्—हे **व्रात्य** समुपस्थित-गणाध्यक्ष ! **क्व अवात्सीः** त्वम् इयन्ति दिनानि कुत्र निवासमकरोः ? बहोः कालादनन्तरं कथमद्य इह समायातोऽसीत्यर्थः । अद्य त्वदागमनेन धन्योऽहं जातः इत्यस्ति प्रश्नस्वारस्यम् । हे **व्रात्य** ! इदम् **उदकम्**, जलोपलक्षिता एषा सर्वा स्वागतसामग्री विद्यते । हे **व्रात्य** ! सर्वे इमे पदार्थास्त्वां **तर्पयन्तु** मृडयन्तु । यद्वा अस्माकं स्वागतं स्वीकृत्य भवन्तोऽस्मान् सुखयन्तु । **यथा** येन प्रकारेण **ते** युष्मत्कृते **प्रियं** भवेत् **तथाऽस्तु** तथैव भवेत् । यथा भवते रोचते तथा भवान् करोतु इत्यर्थः । **यथा** च **ते वशः** तव वशित्वं प्रधानत्वं भवेत् **तथा अस्तु** 'वशो जनस्पृहायत्तप्रभुत्वयोः' इति हैमः । हे **व्रात्य** ! **यथा** च **ते निकामः** अभिलाषः अस्ति **तथैवास्तु** । भवान् यदिच्छति तथा करोत्वित्यर्थः ।

यदेनमाह व्रात्य क्वाऽवात्सीरिति पथ एव
तेन देवयानानव रुन्द्धे ॥३॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यत् । एनम् । आह । व्रात्य । क्वऽ । अवात्सीः । इति । पथः । एव । तेन । देवऽयानान् । अव । रुन्द्धे ।।३।।

यत् यदा गृहस्वामी **एनं** व्रात्यम् एवम् **आह** कथयति यत् हे **व्रात्य** ! **क्व अवात्सीः** त्वमेतावन्तं समयं कुत्र न्यवसः ? **तेन** एतेन आत्मीयत्वभरितेन प्रियप्रश्नेन स गृहस्वामी स्वर्गं गन्तुं **देवयानान् पथः** देवयानमार्गान् **अवरुन्द्धे** स्ववशे करोति ।

यदेनमाह व्रात्योदकमित्यप एव तेनाव रुन्द्धे ।।४।।

पदपाठः

यत् । एनम् । आह । व्रात्य । उदकम् । इति । अपः । एव । तेन । अव । रुन्द्धे ।।४।।

यत् यच्च गृहस्वामी **एनं** व्रात्यम् इदम् **आह** कथयति, हे **व्रात्य** ! त्वदर्थम् एतत् **उदकम्** आनीतमस्ति, **तेन** अनेन पुण्यकथनेन स **अपः** जलानि आपोलोकमित्यर्थः, **अवरुन्द्धे** स्ववशे विदधाति ।

यदेनमाह व्रात्य तर्पयन्त्विति प्राणमेव
तेन वर्षीयांसं कुरुते ।।५।।

पदपाठः

यत् । एनम् । आह । व्रात्य । तर्पयन्तु । इति । प्राणम् । एव । तेन । वर्षीयांसम् । कुरुते ।।५।।

यत् यदा गृहपतिः एनं व्रात्यम् **आह** इत्थं निवेदयति हे **व्रात्य** ! इमे पदार्थाः भवन्तं **तर्पयन्तु** हर्षयन्तु, **तेन** मृदुवचनकथनेन स आत्मनः **प्राणमेव** जीवनमेव वर्षीयांसं वृद्धतरं कुरुते करोति । अतिशयेन वृद्धो वर्षीयान् । वृद्धशब्दात् अतिशायने ईयसुन्प्रत्यये 'प्रियस्थिरस्फिरो०' (पा० सू० ६।४।१५७) इति सूत्रेण वर्षिरादेशः ।

यदेनमाह व्रात्य यथा ते प्रियं तथास्त्विति
प्रियमेव तेनाव रुन्द्धे ।।६।।

पदपाठः

यत् । एनम् । आह । व्रात्य । यथा । ते । प्रियम् । तथा । अस्तु । इति । प्रियम् । एव । तेन । अव । रुन्द्धे ।।६।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् यदा गृहस्वामी **एनं** समुपस्थितं व्रात्यम् एवम् **आह** ब्रूते, हे **व्रात्य** ! **यथा ते** येन प्रकारेण तव प्रियं प्रियता **भवेत् तथा अस्तु** तथैव भवेत् इति । **तेन** अनेन प्रियनिवेदनेन **प्रियम्** एव आत्मनः प्रियतरमेव वस्तुजातम् **अवरुन्द्धे** स्वाधीनं कुरुते । स सर्वमेव प्रियं लभते इत्यर्थः ।

ऐनं प्रियं गच्छति प्रियः प्रियस्य भवति य एवं वेद ॥७॥

पदपाठः

आ । एनम् । प्रियम् । गच्छति । प्रियः । प्रियस्य । भवति । यः । एवम् । वेद ॥७॥

यो जनः **एवं वेद** व्रात्यस्यैवंविधं तत्त्वं वेत्ति । यद्वा स्वागतविधेः एनं प्रकारं जानाति, **एनं** वेत्तारं **प्रियं** हृदयानुकूलं प्रियवस्तु **आगच्छति** समेति, स प्रियाणि प्राप्नोतीत्यर्थः । **प्रियस्य** चात्मनः प्रियजनस्य च स **प्रियः भवति** जायते ।

यदेनमाह व्रात्य यथा ते वशस्तथास्त्विति
वशमेव तेनाव रुन्द्धे ॥८॥

पदपाठः

यत् । एनम् । आह । व्रात्य । यथा । ते । वशः । तथा । अस्तु । इति । वशम् । एव । तेन । अव । रुन्द्धे ॥८॥

यत् यदा गृहस्वामी गृहागतम् **एनं** व्रात्यम् एवम् **आह** कथयति हे **व्रात्य** ! **यथा ते वशः** यादृशी तवेच्छा वर्त्तते **तथा अस्तु इति** तथैव भवत्विति । **तेन** प्रियवाक्येन स **वशमेव** सर्वमेव स्वकीयं कामम् **अवरुन्द्धे** वशं नयति । 'वशः कान्तौ' इत्यमरः (३।२।८) । वश कान्तौ (अ०) धातोः 'वशिरण्योः' (वा० ३।३।५८) इत्यप् । अत्र कान्तिशब्दः कमु कान्तौ इतिवद् इच्छार्थको ज्ञेयः ।

ऐनं वशो गच्छति वशी वशिनां भवति य एवं वेद ॥९॥

पदपाठः

आ । एनम् । वशः । गच्छति । वशी । वशिनाम् । भवति । यः । एवम् । वेद ॥९॥

यः पुरुषः **एवं वेद** व्रात्यस्यैवंविधं रहस्यं जानाति, **एनं** जानानं जनं **वशः** सर्वस्पृहा वशीकरणं वा **आगच्छति** समभ्येति, स सर्वं स्ववशं करोतीत्यर्थः । तथा **वशिनां** वशे कारिणां पुरुषाणामपि **वशी** वशयिता **भवति** जायते । वशयितॄणामपि स वशयिता जायते इत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यदेनमाह व्रात्य यथा ते निकामस्तथास्त्विति निकाममेव तेनावरुन्द्धे ।।१०।।

पदपाठः

यत् । एनम् । आह । व्रात्य । यथा । ते । निऽकामः । तथा । अस्तु । इति । निऽकामम् । एव । तेन । अव । रुन्द्धे ।।१०।।

यत् यदा गृहस्वामी आत्मनो गेहमुपेतम् **एनं** व्रात्यम् एवम् **आह** ब्रूते—हे **व्रात्य ! यथा ते निकामः** अभिलाषः अस्ति **तथा** ते **अस्तु इति । तेन** अनेन कथनेन स **निकाममेव** स्वाभिलाषमेव **अवरुन्द्धे** स्ववशं नयति ।

ऐनं निकामो गच्छति निकामे निकामस्य भवति य एवं वेद ।११।

पदपाठः

आ । एनम् । निऽकामः । गच्छति । निऽकामे । निऽकामस्य । भवति । यः । एवम् । वेद ।।११।।

यः कश्चन **एवं वेद** स्वागतविधेः ईदृशं प्रकारं जानाति **एनं** पुरुषं प्रति **निकामः आगच्छति** अभीष्टपदार्थः समेति, स हि **निकामस्य** अभीष्टाभिलाषस्य **निकामे** अभिलाषपूर्त्तौ **भवति,** सफलो भवतीति ।

इति द्वितीयेऽनुवाके चतुर्थं पर्यायसूक्तम् ।

द्वादशं पर्यायसूक्तम्

एकादशर्चस्यास्य पर्यायस्य प्रथमर्चस्त्रिपदा गायत्री, द्वितीयायाः प्राजापत्या बृहती, तृतीयाया भुरिक्प्राजापत्यानुष्टुप्, चतुर्थ्या भुरिक्साम्न्यनुष्टुप्, पञ्चमी-षष्ठी-नवमी-दशमीनामासुरी गायत्री, सप्तम्येकादश्योस्त्रिपदा प्राजापत्या त्रिष्टुप्, अष्टम्याश्च विराड्गायत्री छन्दांसि ।

तद् यस्यैवं विद्वान् व्रात्य उद्धृतेष्वग्निष्वधिश्रितेऽग्निहोत्रेऽतिथिर्गृहानागच्छेत् ।।१।।

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । उद्धृतेषु । अग्निषु । अधिऽश्रिते । अग्निऽहोत्रे । अतिथिः । गृहान् । आऽगच्छेत् ।।१।।

यस्य जनस्य **गृहान्** भवनम् **एवं विद्वान्** एवंविधो जानानो **व्रात्यः अतिथिः** प्राघुणो भूत्वा **अग्निहोत्रे** अग्निहोत्रकर्मणि अग्निहोत्रकर्मारम्भे इत्यर्थः, **अग्निषु**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यज्ञाग्निषु **उद्धृतेषु** ऊर्ध्वं प्रज्वलितेषु, **अधिश्रिते** तत्र च चरुपुरोडाशादिषु स्थापितेषु **आगच्छेत्** तत्रोपस्थितो भवेत् **तत्** तदा :—(अग्रिमेण सम्बन्धः)

स्वयमेनमभ्युदेत्य ब्रूयाद् व्रात्याति सृज होष्यामीति ॥२॥

पदपाठः

स्वयम् । एनम् । अभिऽउदेत्य । ब्रूयात् । व्रात्य । अति । सृज । होष्यामि । इति ॥२॥

स्वयं गृहस्वामी **एनम् अभ्युदेत्य** अस्य सम्मुखमुपेत्य **ब्रूयात्** कथयेत्, नम्रेण वचसैवं निवेदयेदित्यर्थः । हे **व्रात्य ! अतिसृज** माम् आज्ञापय **होष्यामीति** अहं हवनं करिष्यामीति । अनतिक्रमणीये अग्निहोत्रावसरेऽपि अतिथिजने समायाते तं पृष्ट्वैव हवनमपि कुर्यात् इत्यर्थः ।

स चातिसृजेज्जुहुयान्न चातिसृजेन्न जुहुयात् ॥३॥

पदपाठः

सः । च । अतिऽसृजेत् । जुहुयात् । न । च । अतिऽसृजेत् । न । जुहुयात् ॥३॥

सः गृहस्वामिना पृष्टो व्रात्यः अतिथिः **अतिसृजेत्** चेत् आज्ञापयेद् यदि **जुहुयात्** तर्हि हवनं कुर्यात् । **न अतिसृजेत्** नादिशेत् चेत् सः, तर्हि **न जुहुयात्** नैवा ग्निहोत्रं कर्म सम्पादयेत् । अत एवामनन्ति महर्षयः —"यदातिथ्येन यजते विष्णुमेव देवतां यजते" (श० ब्रा० १२।१।३।४) इति । काठका अपि एवमुद्घोषयन्ति "पूर्वं हि अतिथिमाशयन्ति" (काठ० सं० १२) इति ।

स य एवं विदुषा व्रात्येनाति सृष्टो जुहोति ॥४॥

पदपाठः

सः । यः । एवम् । विदुषा । व्रात्येन । अतिऽसृष्टः । जुहोति ॥४॥

यो यजमानः **एवं विदुषा** जानता सर्वविदा इत्यर्थः **व्रात्येन अतिसृष्टः** आज्ञापितः **जुहोति** हवनकर्म सम्पादयति, **सः** यजमानः —(अग्रिमेण सम्बन्धः)

प्र पितृयाणं पन्थां जानाति प्र देवयानम् ॥५॥

पदपाठः

प्र । पितृऽयानम् । पन्थाम् । जानाति । प्र । देवऽयानम् ॥५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पितृयाणं पन्थां पितृयानमार्गं **प्रजानाति** प्रकर्षेणावगच्छति एवं **देवयानं** देवयानस्य पन्थानमपि प्रकर्षेण वेत्ति। अर्थात् व्रात्योपदिष्टो यजमानो हवनं कुर्वन् देवयान-पितृयाणयोरुभयोरपि मार्गयोः अधिकारी भवतीति।

न देवेष्वा वृश्चते हुतमस्य भवति ॥६॥

पदपाठः

न। देवेषु। आ। वृश्चते। हुतम्। अस्य। भवति ॥६॥

स याजको **देवेषु** देवसम्बन्धिषु कर्मसु **न आवृश्चते** न दोषभाग् भवति। **अस्य** जनस्य च **हुतम्** अग्नौ सम्पादितो यज्ञः सफलो **भवति**।

पर्यस्यास्मिल्लोक आयतनं शिष्यते य एवं
विदुषा व्रात्येनातिसृष्टो जुहोति ॥७॥

पदपाठः

परि। अस्य। अस्मिन्। लोके। आऽयतनम्। शिष्यते। यः। एवम्। विदुषा। व्रात्येन। अतिऽसृष्टः। जुहोति ॥७॥

यो वै याजकः **एवं विदुषा** एवंविधेन सर्वज्ञेन **व्रात्येन अतिसृष्टः** समादिष्टः सन् **जुहोति** अग्निहोत्रं कर्म सम्पादयति **अस्य** याजकस्य अतिथिसत्कारमाचरतः **आयतनं** स्थानम् आश्रयः इत्यर्थः **अस्मिन् लोके** अत्र जगति **परिशिष्यते** सुरक्षित-रूपेण तिष्ठति।

अथ य एवं विदुषा व्रात्येनानतिसृष्टो जुहोति ॥८॥

पदपाठः

अथ। यः। एवम्। विदुषा। व्रात्येन। अनतिऽसृष्टः। जुहोति ॥८॥

अथ च किन्तु **यः** जनः **एवं विदुषा** एवंविधेन सर्वज्ञेन **व्रात्येन अनतिसृष्टः** अनाज्ञापितः **जुहोति** स तु :—(अग्रिमेण सम्बन्धः)।

न पितृयाणं पन्थां जानाति न देवयानम् ॥९॥

पदपाठः

न पितृऽयानम्। पन्थाम्। जानाति। न। देवऽयानम् ॥९॥

पितृयाणं पन्थां पितृयाणमार्गं **न जानाति** न वेत्ति, **न च देवयानं** देवयान-मार्गं परिचिनोति। न स तदधिकारी भवतीत्यर्थः।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आ देवेषु वृश्चते अहुतमस्य भवति ॥१०॥

पदपाठः

आ । देवेषु । वृश्चते । अहुतम् । अस्य । भवति ॥१०॥

स हि देवेषु आवृश्चते दोषभाग् भवति तथा अस्य याजकस्य अहुतं भवति, यज्ञो निष्फलो जायते ।

नास्यास्मिल्लोक आयतनं शिष्यते य एवं
विदुषा व्रात्येनानतिसृष्टो जुहोति ॥११॥

पदपाठः

न । अस्य । अस्मिन् । लोके । आऽयतनम् । शिष्यते । यः । एवम् । विदुषा । व्रात्येन । अनतिऽसृष्टः । जुहोति ॥११॥

पूर्वं व्याख्यातोऽयं मन्त्रः ।

इति द्वितीयेऽनुवाके पञ्चमं पर्यायसूक्तम् ।

त्रयोदशं पर्यायसूक्तम्

चतुर्दशर्चस्यास्य पर्यायस्य प्रथमर्चः साम्न्युष्णिक्, द्वितीयाषष्ठचोः प्राजापत्यानुष्टुप्, तृतीया-पञ्चमी-सप्तमीनामासुरी गायत्री, चतुर्थ्यष्टम्योः साम्नी बृहती, नवम्या द्विपदा निचृद्गायत्री, दशम्या द्विपदा विराड्गायत्री, एकादश्याः प्राजापत्या पङ्क्तिः, द्वादश्या आसुरी जगती, त्रयोदश्याः सतःपङ्क्तिः, चतुर्दश्याश्चाक्षरपङ्क्तिश्छन्दांसि ।

तद् यस्यैवं विद्वान् व्रात्य एकां रात्रिमतिथिर्गृहे वसति ॥१॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । एकाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥१॥

एवं विद्वान् एवंविधः सर्वं जानानो व्रात्यो गणाध्यक्षः अतिथिः प्राघुणिको भूत्वा यस्य याजकस्य गृहस्वामिनो वा गृहे गेहे स्वागतं स्वीकृत्य एकां रात्रिम् एकामपि निशां वसति निवासं करोति । तत् तदा :-(अग्रिमेण सम्बन्धः) ।

ये पृथिव्यां पुण्या लोकास्तानेव तेनावरुन्द्धे ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ये । पृथिव्याम् । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥२॥

तेन पुण्यप्रभावेण स जनः **ये पृथिव्यां** भूमौ **पुण्याः लोकाः** पवित्रलोकाः सन्ति **तान्** सर्वान् **एव अवरुन्द्धे** स्ववशे करोति । अतिथिसत्कारात् स पुण्यलोकं लभते इत्यर्थः ।

तद् यस्यैवं विद्वान् व्रात्यो द्वितीयां रात्रि-
मतिथिर्गृहे वसति ॥३॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । द्वितीयाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥३॥

एवं विद्वान् एवंविधः सर्वज्ञो **व्रात्यः अतिथिः** अभ्यागतो भूत्वा **द्वितीयां रात्रिं** द्वितीयस्यामपि रात्रौ **यस्य** याजकस्य **गृहे** गेहे **वसति** वासं लभते **तत्** तदा सः— (अग्रिमेण सम्बन्धः) ।

ये१ऽन्तरिक्षे पुण्या लोकास्तानेव तेनावरुन्द्धे ॥४॥

पदपाठः

ये । अन्तरिक्षे । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥४॥

तेन पुण्यकर्मणा **ये अन्तरिक्षे** मध्यमे स्थाने **पुण्याः लोकाः** पवित्रस्थानानि सन्ति **तानेव** तान्येव स्थानानि **अवरुन्द्धे** आत्मवशे नयति ।

तद् यस्यैवं विद्वान् व्रात्यस्तृतीयां रात्रिमतिथिर्गृहे वसति ॥५॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । तृतीयाम् । रात्रिम् । अतिथिः । गृहे । वसति ॥५॥

एवं विद्वान् एवंविधः सर्वेषां वेत्ता **व्रात्यो यस्य गृहे** भवने **अतिथिः** अध्वनीनो भूत्वा **तृतीयां रात्रिं** दिनत्रयमित्यर्थः, **वसति** निवासं करोति **तत्** तदा :— (शेषं पूर्ववत्) ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ये दिवि पुण्या लोकास्तानेव तेनावरुन्द्धे ॥६॥

पदपाठः

ये । दिवि । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥६॥

पूर्वं व्याख्यातः (अथर्व० १५।२।६।२)

तद् यस्यैवं विद्वान् व्रात्यश्चतुर्थीं रात्रिमतिथिर्गृहे वसति ॥७॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । चतुर्थीम् । रात्रिम् । अतिथिः । गृहे । वसति ॥७॥

पूर्वं व्याख्यातः (अथर्व० १५।२।६।१) ।

ये पुण्यानां पुण्या लोकास्तानेव तेनावरुन्द्धे ॥८॥

पदपाठः

ये । पुण्यानाम् । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥८॥

पुण्यानां पुण्यकर्मकारिणां **ये पुण्या लोकाः** पवित्रलोकाः । शेषं पूर्ववत् । (अथर्व० १५।२।६।२) ।

तद् यस्यैवं विद्वान् व्रात्योपरिमिता रात्रीरतिथिर्गृहे वसति ॥९॥

पदपाठः

तत् । यस्य । एवम् । विद्वान् । व्रात्यः । अपरिऽमिताः । रात्रीः । अतिथिः । गृहे । वसति ॥९॥

अपरिमिताः रात्रीः असङ्ख्यातान् दिवसान् इत्यर्थः । शेषं पूर्ववत् । (अथर्व० १५।२।६।१) ।

य एवापरिमिताः पुण्या लोकास्तानेव तेनाव रुन्द्धे ॥१०॥

पदपाठः

ये । एव । अपरिऽमिताः । पुण्याः । लोकाः । तान् । एव । तेन । अव । रुन्द्धे ॥१०॥

पूर्वं व्याख्यातः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ यस्याव्रात्यो व्रात्यब्रुवो नामबिभ्रत्यतिथिर्गृहानागच्छेत् ॥११॥

पदपाठः

अथ । यस्य । अव्रात्यः । व्रात्यऽब्रुवः । नामऽबिभ्रती । अतिथिः । गृहान् । आगच्छेत् ॥११॥

व्रात्यं विद्वांसमतिरिच्य अन्यस्मिन् कस्मिंश्चिदपि अभ्यागते गृहमुपागते तमपि सत्कुर्यादेवेति श्रुतिः कथयति । **अथ** अपि च **यस्य** गृहस्थस्य **गृहान्** भवनम् **अव्रात्यः** व्रात्यगणाध्यक्ष-विद्वज्जनातिरिक्तः अन्यः कश्चन **व्रात्यब्रुवः** आत्मानं व्रात्यं ब्रुवन्, **नामबिभ्रती** नाममात्रं धारयन् **अतिथिः** प्राघुणो भूत्वा **आगच्छेत्** समुपस्थितो भवेत्, तदा किम् :—(अग्रिमेण सम्बन्धः) ।

कर्षेदेनं न चैनं कर्षेत् ॥१२॥

पदपाठः

कर्षेत् । एनम् । न । च । एनम् । कर्षेत् ॥१२॥

एनम् आगतं कृत्रिमनामधारिणं व्रात्यं **कर्षेत्** तिरस्कुर्यात् अवकृष्य गृहाद् बहिर् निष्कासयेत् ? नहि नहि, **एनं** समभ्यागतम् अतिथिं **न कर्षेत्** नैव तिरस्कुर्यात्, संमानयेदेव तम् ।

अस्यै देवताया उदकं याचामीमां देवतां वासय
इमामिमां देवतां परि वेवेष्मीत्येनं परि वेविष्यात् ॥१३॥

पदपाठः

अस्यै । देवतायै । उदकम् । याचामि । इमाम् । देवताम् । वासये । इमाम् । इमाम् । देवताम् । परि । वेवेष्मि । इति । एनम् । परि । वेविष्यात् ॥१३॥

अस्यै देवतायै समागताय अस्मै देवरूपिणे अतिथये अहम् **उदकं** जलग्रहणार्थं **याचामि** । जलपानार्थमहमेनं निवेदयामीत्यर्थः । अहम् **इमां देवताम्** अतिथिदेवमिमं **वासये** स्वकीये भवने निवासयामि, मदीये भवने स्थातुमप्यहमेनं निवेदयामीत्यर्थः । **इमां देवताम्** एनम् अतिथिदेवमहम् **इमां** भोजनसामग्रीं **परिवेवेष्मि** परितः प्रयच्छामि अस्मै । **इति** अनेन प्रकारेण **एनं** समागतमतिथिं **वेविष्यात्** भोजनप्रदानादिना परिचरेदिति भावः । अतिथिरूपेणागतं व्रात्यं विद्वांसं तु स्वागतविधिना परिचरेदेव किन्तु अन्यस्मिन्नपि जने गृहमागते तमपि देवरूपिणं मत्वा सत्कुर्यादेवेति मन्त्राणामेषां स्वारस्यम् । अत एवामनन्ति महर्षयः उपनिषत्सु — "वैश्वानरः

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

प्रविशत्यतिथिर्ब्राह्मणो गृहान् । आशा प्रतीक्षे सङ्गतं सूनृतां च । इष्टापूर्त्ते पुत्रपशूंश्च सर्वान् । एतद् वृङ्क्ते पुरुषस्याल्पमेधसो यस्यानश्नन् वसति ब्राह्मणो गृहे" (कठो० १।१।७।८) इति ।

तस्यामेवास्य तद् देवतायां हुतं भवति य एवं वेद ॥१४॥

पदपाठः

तस्याम् । एव । अस्य । तद् । देवतायाम् । हुतम् । भवति । यः । एवम् । वेद ॥१४॥

यो जनः **एवं वेद** स्वागतविधेः ईदृशं महत्त्वं वेत्ति **अस्य** एतस्य जनस्य **तस्यामेव देवतायां** तस्मिन्नेव देवाधिदेवे व्रात्ये **तत्** सर्वं **हुतं भवति** समर्पितं जायते । अतिथि-पूजनं परमेश्वरपूजनमेवेत्यर्थः ।

इति द्वितीयेऽनुवाके षष्ठं पर्यायसूक्तम् ।

चतुर्दशं पर्यायसूक्तम्

चतुर्विंशत्यृचस्यास्य पर्यायस्य प्रचमर्चस्त्रिपदानुष्टुप्, द्वितीया-चतुर्थी-षष्ठचष्टमी-दशमी-विंशी-द्वाविंशी-चतुर्विंशीनां द्विपदासुरी गायत्री तृतीयानवम्योः पुर उष्णिक्, पञ्चम्या अनुष्टुप्, सप्तम्याः प्रस्तारपङ्क्तिः, एकादश्याः स्वराड्गायत्री, द्वादशी–चतुर्दशी–षोडश्यष्टादशीनां भुरिक्–प्राजापत्यानुष्टुप्, त्रयोदशी–पञ्चदश्योः (सप्तदश्याश्च) आर्ची पङ्क्तिः, एकोनविंश्या भुरिङ्नागी गायत्री, एकविंश्याः प्राजापत्या त्रिष्टुप्, (त्रयोविंश्याश्च निचृदार्ची पङ्क्तिः) छन्दांसि ।

स यत् प्राचीं दिशमनु व्यचलन्मारुतं शर्धो
भूत्वानुव्य्ऽचलन्मनोन्नादं कृत्वा ॥१॥

पदपाठः

सः । यत् । प्राचीम् । दिशम् । अनु । विऽअचलत् । मारुतम् । शर्धः । भूत्वा । अनुऽव्यऽचलत् । मनः । अन्नऽअदम् । कृत्वा ॥१॥

अथ भूयो व्रात्यस्याधिदैविकं विराट्स्वरूपं वर्ण्यते । **यत्** यदा **स** व्रात्यो गणाध्यक्षः **प्राचीं दिशमनु** पूर्वदिशाम् अनुलक्ष्य **व्यचलत्** चचाल प्रससारेत्यर्थः । तदा **स मारुतं** मेघम् इति निरु० (११।४) मेघानां **शर्धः** बलं (निघ० २।३) यद्वा मरुद्गणानां बलं भूत्वा **अनुव्यचलत्** तत्र चचाल । तथा स तदानीं मनः 'वागिति मनः' (जै० उ० ४।२२।२१) वाचमेव । यद्वा 'मनश्चन्द्रमाः' (जै० उ० ३।२।६)

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

चन्द्रमसमेव अन्नादं जीवनरक्षणसाधनं कृत्वा विधाय विविधं चचाल । मनः मनु अवबोधने (तना०), मन ज्ञाने (दि०) धातोर्वा औणादिकः असुन् प्रत्ययः ।

मनसान्नादेनान्नमत्ति य एवं वेद ॥२॥

पदपाठः

मनसा । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥२॥

यो विद्वान् **एवं वेद** एवंविधं व्रात्यवैशिष्ट्यं वेत्ति स **अन्नादेन** जीवनरक्षण-साधनभूतेन **मनसा** चेतसा **अन्नम् अत्ति** भक्षयति ।

स यद् दक्षिणां दिशमनु व्यचलदिन्द्रो भूत्वा-
नुव्य१चलद् बलमन्नादं कृत्वा ॥३॥

पदपाठः

सः । यत् । दक्षिणाम् । दिशम् । अनु । विऽअचलत् । इन्द्रः । भूत्वा । अनुऽव्य१चलत् । बलम् । अन्नऽअदम् । कृत्वा ॥३॥

यत् यदा **सः** व्रात्यः **दक्षिणां दिशमनु** दक्षिणदिशायां **व्यचलत्** विविधम् अचालीत् तदा स **इन्द्रो भूत्वा** इन्द्रस्वरूपं परिकल्प्य **बलम्** ऐन्द्रं बलं च **अन्नादं** जीवनरक्षणसाधनं **कृत्वा** विधाय **अनुव्यचलत्** विविधं चचाल प्रससारेत्यर्थः ।

बलेनान्नादेनान्नमत्ति य एवं वेद ॥४॥

पदपाठः

बलेन । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥४॥

यो जनः **एवं वेद** व्रात्यस्यैवंविधं महत्त्वं वेत्ति स **बलेन** बलस्वरूपेण **अन्नादेन** जीवनरक्षणसाधनभूतेन **अन्नं** भोज्यजातम् **अत्ति** भक्षयति प्राप्नोतीत्यर्थः ।

स यत् प्रतीचीं दिशमनु व्यचलद् वरुणो राजा
भूत्वानुव्य१चलदपो१न्नादीः कृत्वा ॥५॥

पदपाठः

सः । यत् । प्रतीचीम् । दिशम् । अनु । विऽअचलत् । वरुणः । राजा । भूत्वा । अनुऽव्य१चलत् । अपः । अन्नऽअदीः । कृत्वा ॥५॥

यत् यदा **सः** व्रात्यः **प्रतीचीं** वारुणीं **दिशमनु** दिशामनुलक्ष्य **व्यचलत्** विविधं चचाल तदा स **वरुणः** अपां स्वामी **वरुणो** नाम **राजा भूत्वा अपः** जलानि च **अन्नादीः** जीवनरक्षिकाः **कृत्वा व्यचलत्** चचाल ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अद्भिरन्नादीभिरन्नमत्ति य एवं वेद ॥६॥

पदपाठः

अत्ऽभिः । अन्नऽअदीभिः । अन्नम् । अत्ति । यः । एवम् । वेद ॥६॥

यो यजमानः **एवं वेद** व्रात्यस्यैवं विधं रूपं जानाति सः **अन्नादीभिः** जीवनरक्षण-साधनभूताभिः **अद्भिः** आपोदेवीभिः **अन्नमत्ति** भक्षयति तल्लभते इत्यर्थः । जलैः सह स अन्नानि प्राप्नोतीति भावः ।

स यदुदीचीं दिशमनु व्यचलत् सोमो राजा

भूत्वानुव्य॑चलत् सप्तर्षिभिर्हुत आहुतिमन्नादीं कृत्वा ॥७॥

पदपाठः

सः । यत् । उदीचीम् । दिशम् । अनु । विऽअचलत् । सोमः । राजा । भूत्वा । अनुऽव्य॑चलत् । सप्तर्षिभिः । हुते । आऽहुतिम् । अन्नऽअदीम् । कृत्वा ॥७॥

यत् यदा सः व्रात्यः **उदीचीं दिशमनु** कौवेरीं दिशामुद्दिश्य **व्यचलत्** विविधं अचालीत् प्रासरीसरीत् इत्यर्थः, तदा स **सोमो राजा भूत्वा** सोमस्वरूपेणेति शेषः, भवति चात्र ब्राह्मणम् -'उत्तरो ह वै सोमो राजा' (ऐ० ब्रा० १।८) इति । **अनुव्यचलत्** तस्यां दिशि प्रससार तदानीं स तत्र **सप्तर्षिभिः** महर्षिभिः **हुते** यज्ञे, यतो हि सप्तर्षयः उत्तरस्यां दिशि उद्यन्ति । यथाम्नायते शतपथे—"अमी ह्युत्तरा हि सप्तर्षय उद्यन्ति" (श० ब्रा० २।१।२।४) इति । **अन्नादीं** जीवनरक्षणसाधिकाम् **आहुतिं कृत्वा** विधाय **व्यचलत्** ।

आहुत्यान्नाद्यान्नमत्ति य एवं वेद ॥८॥

पदपाठः

आऽहुत्या । अन्नऽअद्या । अन्नम् । अत्ति । यः । एवम् । वेद ॥८॥

यः पुरुषः **एवं वेद** इत्थं वेत्ति स **अन्नाद्या** जीवनरक्षणसाधनभूतया **आहुत्या अन्नमत्ति** अन्नानि भक्षयति ।

स यद् ध्रुवां दिशमनु व्यचलद् विष्णुर्भूत्वानुव्य॑चलद्

विराजमन्नादीं कृत्वा ॥९॥

पदपाठः

सः । यत् । ध्रुवाम् । दिशम् । अनु । विऽअचलत् । विष्णुः । भूत्वा । अनुऽव्य॑चलत् । विऽराजम् । अन्नऽअदीम् । कृत्वा ॥९॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् यदा **सः** व्रात्यः **ध्रुवां दिशमनु** 'इयं ध्रुवा' (तै० सं० २।३।५।६) इति श्रुतेः पृथिवीम् अनुलक्ष्य **व्यचलत्** चचाल तदा स **विष्णुः भूत्वा** व्यापकरूपं विधाय **अनुव्यचलत्** प्रससार । अत एव पठचते कपिष्ठलकठसंहितायाम्—"पृथिवीमेष (विष्णुः) एतां विचक्रमे (क० ३८।५) इति । भवति चात्र तैत्तिरीयश्रुतिरपि—"दाधार (विष्णुः) पृथिवीमभितो मयूखैः" (तै० सं० १।२।१३।२) इति । तदानीं स व्रात्यः **विराजम्** "अयं वै लोको विराट्" (श० ब्रा० ७।४।२।२३) इति श्रुतेः विराड्रूपिणीं पृथिवीमेव **अन्नादीं** जीवनरक्षणसाधिकां **कृत्वा** विधाय प्रससार । अत एव आमनन्ति कौषीतकीयाः—"इयं वा अन्नादी" (कौषी० २७।५) इति ।

विराजान्नाद्यान्नमत्ति य एवं वेद ॥१०॥

पदपाठः

विऽराजा । अन्नऽअद्या । अन्नम् । अत्ति । यः । एवम् वेद ॥१०॥

यो याजकः **एवं वेद** एवं जानाति स **अन्नाद्या** जीवनरक्षणसाधिकया पृथिव्या । यद्वा 'एषा वै स्तनवती विराट्' (तां० ब्रा० २०।१।५) इति श्रुतेः धेन्वा, धेन्वा प्रदत्तमित्यर्थः **अन्नमत्ति** भक्षयति ।

स यत् पशूननु व्यचलद् रुद्रो भूत्वानुव्य१चलदोषधीरन्नादीः कृत्वा ॥११॥

पदपाठः

सः । यत् । पशून् । अनु । विऽअचलत् । रुद्रः । भूत्वा । अनुऽव्यऽचलत् । ओषधीः । अन्नऽअदीः । कृत्वा ॥११॥

यत् यदा **सः** व्रात्यो विराट् **पशूननु** पुरुषाश्वादिपञ्च पशूननुसृत्य **व्यचलद्** विविधं चचाल तदा स **रुद्रो भूत्वा** पशुपतिरुद्ररूपेण **अनुव्यचलत्** प्रससार । यद्वा स व्रात्यः सप्त ग्राम्यान् सप्त च आरण्यकान् पशूननुचचाल । भवति चात्र श्रुतिः "सप्त वै ग्राम्याः पशवः सप्त चारण्याः" (तै० सं० २।४।६।२) इति । ते च ग्राम्याः सप्त पशवः आम्नायन्ते ऐतरेयब्राह्मणे "(अजाश्वो गौर्महिषी वराहो हस्त्यश्वतरी चेति) सप्त वै ग्राम्याः पशवः" (ऐ० ब्रा० २।१७) इति । रुद्रस्य पशुपतित्वमपि श्रूयते । यथा हि–"रुद्रः पशूनामीशे" (काठ० २५।१) 'रुद्राय पशुपतये' (मै० ३।१३।४) इति च । तदानीं स व्रात्यः **अन्नादीः** जीवनरक्षणसाधनभूता **ओषधीः** व्रीहियवादिफलपाकान्ताः **कृत्वा** विधाय प्रासरीसरीत् । ओषधीषु पशुप्रतिष्ठापनं तैत्तिरीयसंहितायामपि श्रूयते— "ओषधीष्वेव पशून् प्रतिष्ठापयति" (३।५।२।४) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ओषधीभिरन्नादीभिरन्नमत्ति य एवं वेद ॥१२॥

पदपाठः

ओषधीभिः । अन्नऽअदीभिः । अन्नम् । अत्ति । यः । एवम् । वेद ॥१२॥

यः पुरुषः **एवं वेद** व्रात्यस्यैवं सर्वत्र प्रसरणं वेत्ति स **अन्नादीभिः ओषधीभिः अन्नमत्ति** । अन्नानि लभते ।

स यत् पितॄननु व्यचलद् यमो राजा भूत्वानु-
व्य॒चलत् स्वधाकारमन्नादं कृत्वा ॥१३॥

पदपाठः

सः । यत् । पितॄन् । अनु । विऽअचलत् । यमः । राजा । भूत्वा । अनुऽव्यऽचलत् । स्वधाऽकारम् । अन्नऽअदम् । कृत्वा ॥१३॥

यत् यदा **सः** व्रात्यः **पितॄननु** पितृगणमनुलक्ष्य **व्यचलत्** तदा स **यमो राजा भूत्वा** यमरूपं धृत्वा तथा **स्वधाकारं** च अन्नादम् अन्नभोक्तारं **कृत्वा व्यचलत्** । आम्नायते च "यमो वैवस्वतो राजेत्याह तस्य पितरो विशः" (श०ब्रा० १३।४।३।६) इति । स्वधाकारो हि पितॄणां भवतीति मन्यन्ते तैत्तिरीया अपि 'स्वधाकारो हि पितॄणाम्' (तै०ब्रा० १।६।६।५) इति । इमे हि पितरः स्वधाकारेण जीवन्ति– इत्यपि प्रतिपादितं भवति ब्राह्मणे–"पितर आयुष्मन्तस्ते स्वधया आयुष्मन्तः" (तै० सं० २।३।१०।४) इति ।

स्वधाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१४॥

पदपाठः

स्वधाऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥१४॥

यः जनः **एवं वेद** इत्थं वेत्ति स **स्वधाकारेण अन्नादेन** अन्नभोक्त्रा सह **अन्नमत्ति** प्राप्नोतीत्यर्थः ।

स यन्मनुष्या३ननु व्यचलदग्निर्भू॒त्वानुव्य॒चलत् स्वाहाकार-
मन्नादं कृत्वा ॥१५॥

पदपाठः

सः । यत् । मनुष्याऽन् । अनु । विऽअचलत् । अग्निः । भूत्वा । अनुऽव्यऽचलत् । स्वाहाऽकारम् । अन्नऽअदम् । कृत्वा ॥१५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यत् यदा सः व्रात्यः मनुष्याननु मानवानुद्दिश्य व्यचलत् तदा सः अग्निः भूत्वा स्वाहाकारं च अन्नादम् अन्नभोक्तारं कृत्वाताननु व्यचलत्। यद्वा 'अनिरुक्तो वै स्वाहाकारः' (श० ब्रा० २।२।१३) अनिरुक्तं प्रजापतिमन्नादं विधाय स प्रससार।

स्वाहाकारेणान्नादेनान्नमत्ति य एवं वेद ॥१६॥

पदपाठः

स्वाहाऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥१६॥

यः पुरुषः एवं वेद इत्थं वेत्ति स स्वाहाकारेण अनिरुक्तप्रजापतिना अन्नादेन सह अन्नम् अत्ति भुङ्क्ते।

स यदूर्ध्वां दिशमनु व्यचलद् बृहस्पतिर्भूत्वानुव्य ऽचलद् वषट्कारमन्नादं कृत्वा ॥१७॥

पदपाठः

सः । यत् । ऊर्ध्वाम् । दिशम् । अनु । विऽअचलत् । बृहस्पतिः । भूत्वा । अनुऽव्यऽचलत् । वषट्ऽकारम् । अन्नऽअदम् । कृत्वा ॥१७॥

यत् यदा सः व्रात्यो गणाध्यक्षः ऊर्ध्वां दिशमनु अन्तरिक्षमुद्दिश्य व्यचलत् तदा स बृहस्पतिः भूत्वा, अस्याः बृहत्याः दिशः अधिपतिर्बृहस्पतिर्भूत्वाऽचलत्। आम्नायते च—"अथैतदन्तरिक्षम् (ऊर्ध्वा दिक्) एषा हि दिग् बृहस्पतेः" (श० ब्रा० २।३।४।३६) इति मैत्रायणीया अपि आमनन्ति—"ऊर्ध्वा दिक् बृहस्पतेः" (मै० १।५।४) इति। वषट्कारं च 'यो धाता स वषट्कारः' (ऐ० ब्रा० ३।४७) इति श्रुतेः धातारम्। यद्वा 'एष वै वषट्कारो य एष तपति' (श० ब्रा० १।७।२।११) आदित्यम् अन्नादं कृत्वा अनुव्यचलत् तां दिशमनु व्यचालीत्।

वषट्कारेणान्नादेनान्नमत्ति य एवं वेद ॥१८॥

पदपाठः

वषट्ऽकारेण । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥१८॥

यः कश्चन एवं वेद इत्थं वेत्ति स वषट्कारेण अन्नादेन अन्नभोक्त्रा अन्नमत्ति अन्नानि भुङ्क्ते।

स यद् देवाननु व्यचलदीशानो भूत्वानुव्य ऽचलन्मन्युमन्नादं कृत्वा ॥१९॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सः । यत् । देवान् । अनु । विऽअचलत् । ईशानः । भूत्वा । अनुऽव्यऽचलत् । मन्युम् । अन्नऽअदम् । कृत्वा ॥१९॥

यत् यदा सः विराडीश्वरो व्रात्यः **देवाननु** देवान् प्रति **व्यचलत्** अचालीत् तदा **सः ईशानः** समर्थः शासको **भूत्वा मन्युं** क्रोधं च **अन्नादम्** अन्नभोक्तारं **कृत्वा** विधाय **अनु व्यचलत्** । यतो मन्युनैव शासनं प्रचाल्यते । भवत्यत्र श्रुतिः "मन्युना वै वीर्यं क्रियते इन्द्रियेण जयति" (मैत्रा० २।२।१२) इति । यद्वा ईशान आदित्यो भूत्वा । यथा ह्याम्नायते शतपथे—"आदित्यो वा ईशानः, आदित्यो ह्यस्य सर्वस्येष्टे" (श० ब्रा० ६।१।३।१७) इति । अर्थात् सोऽयमीशान आदित्यः सर्वत्र प्रजासु व्याप्तः । भवति चात्रोपनिषत् "स एष एतस्य रश्मिसुरसुर्भूत्वा सर्वास्वासु प्रजासु प्रत्यवस्थितः" (जै० उ० १।२९।३) इति । ईशानः ईश ऐश्वर्ये (अदा०) धातोस्ताच्छीलिकश्चानश् । "मन्युः मन्यतेर्दीप्तिकर्मणः क्रोधकर्मणो वा वधकर्मणो वा" (निरु० १०।३।२९)

मन्युनान्नादेनान्नमत्ति य एवं वेद ॥२०॥

पदपाठः

मन्युना । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥२०॥

यः पुरुषः **एवं वेद** स **मन्युना** दीप्तिमता क्रोधवता वा **अन्नादेन** भोक्त्रा **अन्नम् अत्ति** अन्नानि भुङ्क्ते ॥

स यत् प्रजा अनु व्यचलत् प्रजापतिर्भूत्वानुव्य चलत्
प्राणमन्नादं कृत्वा ॥२१॥

पदपाठः

सः । यत् । प्रऽजाः । अनु । विऽअचलत् । प्रजाऽपतिः । भूत्वा । अनुऽव्यचलत् । प्राणम् । अन्नऽअदम् । कृत्वा ॥२१॥

यत् यदा स व्रात्यः **प्रजाः अनु** 'प्रजा वै भूतानि' (श० ब्रा० २।४।२।१) इति श्रुतेः भूतान्युद्दिश्य **व्यचलत्** चचाल तदा **सः प्रजापतिः** प्रजापालको **भूत्वा प्राणं** च **अन्नादं** भोक्तारं **कृत्वा अनुव्यचलत्** ।

प्राणेनान्नादेनान्नमत्ति य एवं वेद ॥२२॥

पदपाठः

प्राणेन । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥२२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यो जनः **एवं वेद** इत्थं वेत्ति स **प्राणेन अन्नादेन** अन्नभोक्त्रा **अन्नमत्ति** भक्षति ।

स यत् सर्वानन्तर्देशानन्नु व्यचलत् परमेष्ठी
भूत्वानुव्य१चलद् ब्रह्मान्नादं कृत्वा ॥२३॥

पदपाठः

सः । यत् । सर्वान् । अन्तःऽदेशान् । अनु । विऽअचलत् । परमेऽस्थी-भूत्वा । अनुऽव्य१चलत् । ब्रह्म । अन्नऽअदम् । कृत्वा ॥२३॥

यत् यदा स व्रात्यो विराट् **सर्वानन्तर्देशान् अनु** समस्तमध्यवर्त्तिनो देशाननुसृत्य **व्यचलत्** तदा **सः परमेष्ठी भूत्वा** आपोमयं पारमेष्ठ्यं स्वरूपं विधाय **ब्रह्म च** "ब्रह्म वै ब्रह्मा" (मैत्रा० २।३।५) ब्रह्माणमेव च **अन्नादं कृत्वा व्यचलत्** । परमेष्ठिनमापोमयं प्रतिपादयति शातपथी श्रुतिः "आपो वै प्रजापतिः परमेष्ठी, ता हि परमे स्थाने तिष्ठन्ति" (श० ब्रा० ८।२।३।१३) इति, अत एव च मैत्रायणीयाः परमेष्ठिनं मनुष्याणां राजन्यं मन्यन्ते—"परमेष्ठी राजन्यो मनुष्याणाम्" (मैत्रा० २।२।५) इति ।

ब्रह्मणान्नादेनान्नमत्ति य एवं वेद ॥२४॥

पदपाठः

ब्रह्मणा । अन्नऽअदेन । अन्नम् । अत्ति । यः । एवम् । वेद ॥२४॥

यो वै पुरुषो याजकः **एवं वेद** व्रात्यस्यैवंविधं ब्रह्मरूपतत्त्वं वेत्ति स **ब्रह्मणा अन्नादेन** अन्नभोक्त्रा **अन्नमत्ति** अन्नजातं भक्षयति ।

इति द्वितीयेऽनुवाके सप्तमं पर्यायसूक्तम् ।

पञ्चदशं पर्यायसूक्तम्

नवर्चस्यास्य पर्यायस्य प्रथमर्चः (तृतीयादिषु 'तस्य व्रात्यस्य' इत्यस्य च) दैवी पङ्क्तिः, द्वितीयाया आसुरी बृहती, तृतीयायाः प्राजापत्यानुष्टप्, चतुर्थी-सप्तम्यष्टमीनां भुरिक्प्राजापत्यानुष्टुप्, पञ्चमी-षष्ठयोर्द्विपदा साम्नी बृहती, नवम्याश्च विराड्गायत्री छन्दांसि ।

तस्य व्रात्यस्य ॥१॥

पदपाठः

तस्य । व्रात्यस्य ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य तादृशस्य सर्वव्यापकस्य विराड्रूपिणो व्रात्यस्य व्रात्यगणाध्यक्षस्य :—(अग्रिमेण सम्वन्धः) ।

सप्त प्राणाः सप्तापानाः सप्त व्यानाः ।।२।।

पदपाठः

सप्त । प्राणाः । सप्त । अपानाः । सप्त । विऽआनाः ।।२।।

सप्त सप्तसङ्ख्यावन्तः **प्राणाः** शरीरान्तर्गामिनो जीवनाधायका वायवः सन्तीति शेषः । **सप्त** एव **अपानाः** शरीराद् बहिर्गामिन अपानवायवः सन्ति, **सप्त** एव च **व्यानाः** प्राणापानयोराधारभूता व्यानवायवः सन्ति । प्राणापानयोराधारभूतत्वेनैव व्यानवायोः प्राधान्यं स्मर्यतेऽन्यत्र—"न प्राणेनापानेन मर्त्यो जीवति कश्चन । इतरेण तु जीवन्ति यस्मिन्नेतावुपाश्रितौ" इति ।

तस्य व्रात्यस्य । योऽस्य प्रथमः प्राण ऊर्ध्वो
नामायं सो अग्निः ।।३।।

पदपाठ;

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । प्राणः । ऊर्ध्वः । नाम । अयम् । सः । अग्निः ।।३।।

तस्य तादृशस्य **व्रात्यस्य** परमेश्वरस्य सप्तसु प्राणेषु **योऽस्य** व्रात्यस्य **प्रथमः** आद्यः **प्राणः** ऊर्ध्वः **नाम** वर्त्तते, **अयम्** एव **स अग्निः** विद्यते । अत एवाम्नायते—'ऊर्ध्वो ह्ययमग्निः' (जै० ब्रा० १।२४७) इति ।

तस्य व्रात्यस्य । योऽस्य द्वितीयः प्राणः प्रौढो
नामासौ स आदित्यः ।।४।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । प्राणः । प्रऽऊढः । नाम । असौ । सः । आदित्यः ।।४।।

तस्य तादृशस्य **व्रात्यस्य** सप्तसु प्राणेषु **योऽस्य द्वितीयः प्राणः प्रौढः** नाम प्रौढाभिधेयो विद्यते **असौ स आदित्य** एवास्ति ।

तस्य व्रात्यस्य । योऽस्य तृतीयः प्राणो३ऽभ्यूऽढो
नामासौ स चन्द्रमाः ।।५।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । प्राणः । अभिऽऊढः । नाम । असौ । सः । चन्द्रमाः ।।५।।

तस्य सर्वत्र व्यापकस्य **व्रात्यस्य अस्य यः तृतीयः प्राणः अभ्यूढः नाम** वर्त्तते **असौ एव** प्राणः **चन्द्रमाः** इति कथ्यते । भवति चात्र ब्राह्मणम् "यत्ततः पर आकाशस्तस्यैव आत्मा समभ्यूढो यच्चन्द्रमाः" (जै० ब्रा० २।५६) इति ।

तस्य व्रात्यस्य । योऽस्य चतुर्थः प्राणो
विभूर्नामायं स पवमानः ।।६।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । प्राणः । विऽभूः । नाम । अयम् । सः । पवमानः ।।६।।

तस्य व्रात्यस्य विराड्रूपस्य **अस्य यश्चतुर्थः प्राणः** अस्ति सः खलु **अयं विभूर्नाम** । अयमेव च **स** प्रसिद्धः **पवमानः** कथ्यते । अत एवाम्नायते "प्राणो वै पवमानः" (मैत्रा० ३।३।२) इति । तथा "अयं प्राणः पवमान आविष्टः" (जै० २।२२६) इति च ।

तस्य व्रात्यस्य । योऽस्य पञ्चमः प्राणो
योनिर्नाम ता इमा आपः ।।७।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । पञ्चमः । प्राणः । योनिः । नाम । ताः । इमाः । आपः ।।७।।

तस्य अस्य **व्रात्यस्य** परमात्मनः सप्तसु प्राणेषु **यः पञ्चमः प्राणः योनिर्नाम** वर्त्तते, **ता इमाः** प्रसिद्धाः **आपः** जलान्येव सन्ति । प्राणानामापोरूपत्वं प्राप्यतेऽन्यत्रापि । "आपो वै प्राणाः" (श० ब्रा० ३।८।२।४) "प्राणा वा आपः" (तां० ब्रा० ९।९।४) इति च ।

तस्य व्रात्यस्य । योऽस्य षष्ठः प्राणः
प्रियो नाम त इमे पशवः ।।८।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । प्राणः । प्रियः । नाम । ते । इमे । पशवः ॥८॥

तस्यास्य व्रात्यस्य यः षष्ठः प्राणः प्रियो नाम प्रियाभिधेयः विद्यते, **ते इमे पशव** एव सन्ति । अत एवोच्यते—"प्रजा वै प्रियाणि पशवः प्रियाणि" (तां० ब्रा० ८।५।१५) इति । एतेनैव हेतुना पशवो दैवीविशः कथ्यन्ते– एता वै दैवीविशो यत् पशवः" (मैत्रा० ३।९।९) इति ।

तस्य व्रात्यस्य । योऽस्य सप्तमः प्राणोऽपरिमितो
नाम ता इमाः प्रजाः ॥९॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । प्राणः । अपरिऽमितः । नाम । ताः । इमाः । प्रऽजाः ॥९॥

तस्यास्य व्रात्यस्य सप्तप्राणेषु अन्तिमः **सप्तमः प्राणः अपरिमितो नाम** विद्यते । **ता इमाः प्रजाः** एव सन्ति । अर्थात् प्रजाः सर्वा व्रात्यस्य प्राणा एवेति । ते च प्राणा अपरिमिताः । आमनन्ति आथर्वणिकाः प्रजापतिमपरिमितम् :— "अपरिमितो वै प्रजापतिः" (गोप०ब्रा०) तथा तैत्तिरीयसं० (१।७।३।२) च ।

इति द्वितीयेऽनुवाके अष्टमं पर्यायसूक्तम् ।

षोडशं पर्यायसूक्तम्

सप्तर्चस्यास्य पर्यायस्य प्रथमातृतीययोर्ऋचोः साम्न्युष्णिक्, (सर्वासु 'तस्य व्रात्यस्य' इत्यस्य दैवी पङ्क्तिः), द्वितीयाचतुर्थीपञ्चमीनां प्राजापत्योष्णिक्, षष्ठ्या याजुषी त्रिष्टुप्, सप्तम्याश्चासुरी गायत्री छन्दांसि ।

तस्य व्रात्यस्य । योऽस्य प्रथमोऽपानः सा पौर्णमासी ॥१॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । अपानः । सा । पौर्णऽमासी ॥१॥

तस्यास्य व्रात्यस्य सप्तसु अपानेषु **यः प्रथमः अपानः पौर्णमासी सा** एव विद्यते इति सर्वं स्पष्टम् ।

तस्य व्रात्यस्य । योऽस्य द्वितीयोपानः साष्टका ॥२॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । अपानः । सा । अष्टका ॥२॥

तस्य व्रात्यस्यास्य यः द्वितीयः अपानः सा अष्टका एव । अत एवाष्टका पर्व मन्यते—"पर्वैतत्संवत्सरस्य यदष्टका" (श० ६।२।२।२०) इति ।

तस्य व्रात्यस्य । योऽस्य तृतीयोपानः सामावास्याऽ ॥३॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । अपानः । सा । अमाऽवास्याऽ ॥३॥

तस्यास्य व्रात्यस्य यः तृतीयः अपानः सा अमावस्या एवास्तीति सर्वं स्पष्टम् ।

तस्य व्रात्यस्य । योऽस्य चतुर्थोऽपानः सा श्रद्धा ॥४॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । अपानः । सा । श्रद्धा ॥४॥

तस्य तादृशस्य व्रात्यस्यास्य यश्चतुर्थः अपानः सा एव श्रद्धा अस्ति । श्रद्धाऽपि व्रात्यरूपैवेत्यर्थः ।

तस्य व्रात्यस्य । योऽस्य पञ्चमोऽपानः सा दीक्षा ॥५॥

पदपाठः

तस्य । व्रात्यस्य । यः । पञ्चमः । अपानः । सा । दीक्षा ॥५॥

तस्य व्रात्यस्य अस्य परमातमनः यः पञ्चमः अपानः सा दीक्षा एवास्ति ।

तस्य व्रात्यस्य । योऽस्य षष्ठोऽपानः स यज्ञः ॥६॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । अपानः । सः । यज्ञः ॥६॥

तस्य व्रात्यस्यास्य यः षष्ठः अपानो वायुः स एव यज्ञः कथ्यते ।

तस्य व्रात्यस्य । योऽस्य सप्तमोऽपानस्ता इमा दक्षिणाः ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । अपानः । ताः । इमाः । दक्षिणाः ।।७।।

तस्य तादृशस्य अस्य व्रात्यस्य यः सप्तमः अपानः ताः दक्षिणा एव सन्ति ।

इति द्वितीयेऽनुवाके नवमं पर्यायसूक्तम् ।

सप्तदशं पर्यायसूक्तम्

दशर्चस्यास्य पर्यायस्य प्रथमा-पञ्चम्योः प्राजापत्योष्णिक्, (सर्वासु 'तस्य व्रात्यस्य' इत्यस्य दैवी पङ्क्तिः) । द्वितीया-सप्तम्योरासुर्यनुष्टुप्, तृतीयाया याजुषी पङ्क्तिः, चतुर्थ्याः साम्न्युष्णिक् षष्ठ्या याजुषी त्रिष्टुप्, अष्टम्यास्त्रिपदा प्रतिष्ठार्ची पङ्क्तिः, नवम्या द्विपदा साम्नी त्रिष्टुप्, दशम्याश्च साम्न्यनुष्टुप् छन्दांसि ।

तस्य व्रात्यस्य । योऽस्य प्रथमो व्यानः सेयं भूमिः ।।१।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । प्रथमः । विऽआनः । सा । इयम् । भूमिः ।

तस्यास्य व्रात्यस्य भगवतः सप्तसु व्यानवायुषु **यः प्रथमो व्यानः** सा एव **इयं भूमिः** । भूमिरपीयं व्रात्यस्यैव स्वरूपं कलयतीति भावः ।

तस्य व्रात्यस्य । योऽस्य द्वितीयो व्यानस्तदन्तरिक्षम् ।।२।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । द्वितीयः । विऽआनः । तत् । अन्तरिक्षम् ।।२।।

तस्यास्य व्रात्यस्य यो द्वितीयो व्यानः सर्वशरीरगो वायुर्विद्यते **तदन्तरिक्षम्** अस्तीति शेषः ।

तस्य व्रात्यस्य । योऽस्य तृतीयो व्यानः सा द्यौः ।।३।।

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । तृतीयः । विऽआनः । सा । द्यौः ।।३।।

तस्यास्य व्रात्यस्य यस्तृतीयो व्यानः वायुः **सा द्यौः** स द्युलोकोऽस्तीति ।

तस्य व्रात्यस्य । योऽस्य चतुर्थो व्यानस्तानि नक्षत्राणि ।।४।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । चतुर्थः । विऽआनः । तानि । नक्षत्राणि ॥४॥

तस्यास्य व्रात्यस्य यश्चतुर्थो व्यानः वायुः तानि नक्षत्राणि एव विद्यन्ते ।

तस्य व्रात्यस्य । योऽस्य पञ्चमो व्यानस्त ऋतवः ॥५॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । पञ्चमः । विऽआनः । ते । ऋतवः ॥५॥

तस्यास्य व्रात्यस्य यः षष्ठः व्यानः ते एव ऋतवः सन्ति ।

तस्य व्रात्यस्य । योऽस्य षष्ठो व्यानस्त आर्त्तवाः ॥६॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । षष्ठः । विऽआनः । ते । आर्त्तवाः ॥६॥

तस्यास्य व्रात्यस्य यः षष्ठः व्यानः, ते एव ऋतूद्भवाः पदार्थाः सन्ति ।

तस्य व्रात्यस्य । योऽस्य सप्तमो व्यानः स संवत्सरः ॥७॥

पदपाठः

तस्य । व्रात्यस्य । यः । अस्य । सप्तमः । विऽआनः । सः । सम्ऽवत्सरः ॥७॥

तस्यास्य व्रात्यस्य यः अन्तिमः सप्तमो व्यानः वायुः सः एव संवत्सरः अस्तीति शेषः । अर्थात् भूम्यन्तरिक्षद्यु नक्षत्रादीनीमानि सर्वाणि व्रात्यस्यैव स्वरूपाणि ।

तस्य व्रात्यस्य । समानमर्थं परि यन्ति देवाः

संवत्सरं वा एतदृतवो नु परि यन्ति व्रात्यं च ॥८॥

पदपाठः

तस्य । व्रात्यस्य । समानम् । अर्थम् । परि । यन्ति । देवाः । सम्ऽवत्सरम् । वा । एतत् । ऋतवः । अनुऽपरियन्ति । व्रात्यम् । च ॥८॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ऋतवो वा यथा ऋतवः **संवत्सरमनुपरियन्ति** संवत्सरप्रजापतिमनुयान्ति, तं वा परितो भ्रमन्ति तथैव **देवाः** इन्द्रादयः **तस्य** अस्य **व्रात्यस्य** परमात्मनः **समानमर्थं** पूरयितुं, तस्य विश्वकर्मणः विश्वसृष्टेः कार्याणि सञ्चालयितुमित्यर्थः, **एतद्व्रात्यं** परितः **अनुपरियन्ति** अनुचलन्ति । तदाज्ञां वहन्तीत्यर्थः ।

तस्य व्रात्यस्य । यदादित्यमभिसंविशन्त्यमावास्यांऽचैव तत् पौर्णमासीं च ॥९॥

पदपाठः

तस्य । व्रात्यस्य । यत् । आदित्यम् । अभिऽसंविशन्ति । अमाऽवास्याम् । च । एव । तत् । पौर्णऽमासीम् । च ॥९॥

तस्य व्रात्यस्य गणाध्यक्षस्य **यद्** ये गुणाः **आदित्यम् अभिसंविशन्ति** आदित्यं प्रवेशं लभन्ते **तत्** ते **अमावास्यां पौर्णमासीम्** अपि च प्रविशन्ति एव । व्रात्यो यथा सूर्ये प्रविश्य सर्वत्र प्रकाशितो भवति तथा स भगवान् चन्द्ररूपेण पौर्णमास्यामपि प्रकाशते, तमोरूपेण चामायामपि विद्यते । तमःप्रकाशावुभावपि तस्यैव भागौ इत्यर्थः ।

तस्य व्रात्यस्य । एकं तदेषाममृतत्वमित्याहुतिरेव ॥१०॥

पदपाठः

तस्य । व्रात्यस्य । एकम् । तत् । एषाम् । अमृतऽत्वम् । इति । आहुतिः । एव ॥१०॥

तस्य व्रात्यस्य परमात्मनः **तदेकम्** अद्वितीयं रूपम् **अमृतत्वं** ब्रह्मत्वम् एव वर्त्तते । यथा आम्नायते—'अथ यद् ब्रह्म तदमृतम्' (जै० उ० १।८।१।१०) इति । यद्वा स्वर्गस्थानं विद्यते । 'स्वर्गो वै लोकोऽमृतत्वम्' । (मैत्रा० १।१०।१७) इति श्रुतेः । तदेव हि **एषां** सर्वेषां देवादीनाम् **आहुतिः** आह्वानं विद्यते । अर्थात् व्रात्यस्वरूपं ब्रह्ममयं विद्यते, तत्प्राप्त्या च सर्वे देवादयः समाहूता भवन्तीति ।

इति द्वितीयेऽनुवाके दशमं पर्यायसूक्तम् ।

अष्टादशं पर्यायसूक्तम्

पञ्चर्चस्यास्य पर्यायस्य प्रथमर्चो दैवी पङ्क्तिः, द्वितीया–तृतीययोरार्ची बृहती, चतुर्थ्या आर्च्यनुष्टुप्, पञ्चम्याश्च साम्न्युष्णिक् छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तस्य व्रात्यस्य ॥१॥

पदपाठः

तस्य । व्रात्यस्य ॥१॥

व्रात्यस्य विराड्रूपं पुनः प्रतिपाद्यते । **तस्य व्रात्यस्य** विराड्रूपस्य :— (अग्रिमेण सम्बन्धः)

यदस्य दक्षिणमक्ष्यसौ स आदित्यो यदस्य सव्यमक्ष्यसौ स चन्द्रमाः ॥२॥

पदपाठः

यत् । अस्य । दक्षिणम् । अक्षि । असौ । सः । आदित्यः । यत् । अस्य । सव्यम् । अक्षि । असौ । सः । चन्द्रमाः ॥२॥

अस्य व्रात्यस्य **यद् दक्षिणमक्षि** वामेतरं नेत्रम् **असौ** एव दृश्यमानः **सः आदित्यः** आदीप्यमानः सूर्योऽस्ति । **यत्** च **अस्य सव्यमक्षि** वामं नेत्रम् **असौ सः** आह्लादकारी **चन्द्रमाः** । व्रात्यस्य लोचने सूर्याचन्द्रमसौ इत्यर्थः ।

योऽस्य दक्षिणः कर्णोऽयं सो अग्निर्योऽस्य सव्यः कर्णोयं स पवमानः ॥३॥

पदपाठः

यः । अस्य । दक्षिणः । कर्णः । अयम् । सः । अग्निः । यः । अस्य । सव्यः । कर्णः । अयम् । सः । पवमानः ॥३॥

अस्य व्रात्यस्य **यो दक्षिणः** वामेतरः **कर्णः** श्रोत्रम्, **अयम्** एव कर्णः **सः** प्रसिद्धः **अग्निः** अस्ति । **यः** च **अस्य सव्यः** वामः **कर्णः अयमेव सः पवमानः** पवनो विद्यते ।

अहोरात्रे नासिके दितिश्चादितिश्च शीर्षकपाले संवत्सरः शिरः ।४।

पदपाठः

अहोरात्रे इति । नासिके इति । दितिः । च । अदितिः । च । शीर्षकपाले इति शीर्षऽकपाले । सम्ऽवत्सरः । शिरः ॥४॥

नासिके तस्य व्रात्यस्य नासाछिद्रे, **अहोरात्रे** अहश्च रात्रिश्च विद्येते । अहोरात्रे एव व्रात्यस्य नासाछिद्रे स्तः इत्यर्थः । **दितिः अदितिश्च शीर्षकपाले** शिरसः कपालद्वयमस्ति । संवत्सरः च शिरः शिरःस्थानीयो वर्त्तते ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अह्ना प्रत्यङ् व्रात्यो रात्र्या प्राङ् नमो व्रात्याय ।।५।।

पदपाठः

अह्ना । प्रत्यङ् । व्रात्यः । रात्र्या । प्राङ् । नमः । व्रात्याय ।।५।।

सर्वदेवमयो व्रात्यः परमेश्वरो गणाध्यक्ष आदित्यरूपेण **अह्ना** दिवसेन सहैव सायं **प्रत्यङ्** पश्चिममभ्येतीति शेषः, अस्तं यातीत्यर्थः । **रात्र्या** च रात्र्याः समाप्त्या सहैव च **प्राङ्** पूर्वस्यां दिशि उदेति । ईदृग्विधाय **व्रात्याय** परमात्मने **नमः** नमनम् अस्तु ।

इति द्वितीयेऽनुवाके एकादशं पर्यायसूक्तम् ।

इति प्रथमोऽनुवाकः

इति पञ्चदशं काण्डं समाप्तम्

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

श्री गुरुगङ्गेश्वरग्रन्थमालापुष्प—३०

शौनकीयायाः

अथर्ववेदसंहितायाः

षोडशं काण्डम्

अभिनवसायणभाष्येण समन्वितम्

卐

भाष्यकाराः
वेद-दर्शनाचार्य - महामण्डलेश्वर-
श्रीस्वामि-गङ्गेश्वरानन्दा उदासीनाः

❖

सम्पादकौ
स्वामी गोविन्दानन्दो वेदान्ताचार्यः
तथा
महामहिमोपाध्यायः विद्यावाचस्पतिः
आचार्य - नवलकिशोर - काङ्करः

卐

प्रकाशकः
सद्गुरु गङ्गेश्वर इण्टरनेशनल वेदमिशन
बम्बई

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अथ

शौनकीयायाम् अथर्ववेदसंहितायां

षोडशं काण्डम्

मङ्गलम्

विश्ववन्द्यपदो वन्दे विबुधान् वेदविश्रुतान् ।
पञ्च हेरम्ब-वैकुण्ठ-शक्ति-शङ्कर-भास्करान् ।।१।।

श्रौतवंशसमुद्भूतः श्रौतमार्गप्रवर्त्तकः ।
भक्ति-विक्ति-समुच्चेता श्रीचन्द्रः पातु सद्गुरुः ।।२।।

स्वान्त-ध्वान्तमपाकुर्वन् वेदविज्ञान-भानुभिः ।
सर्वं समीहितं देयाद्रामानन्दो दिवाकरः ।।३।।

अभिनवमिदं भाष्यं सायणकृतिसन्निभम् ।
अनुपलब्ध-तद्भाष्यस्थाने निर्मीयतेऽधुना ।।४।।

प्रथमं पर्यायसूक्तम्

त्रयोदशर्चस्यास्य पर्यायस्याथर्वा ऋषिः । प्रजापतिर्देवता । प्रथमा-तृतीययोऋर्चोर्द्विपदा साम्नी बृहती, द्वितीया-दशम्योर्याजुषी त्रिष्टुप्, चतुर्थ्या आसुरी गायत्री, पञ्चम्या द्विपदा साम्नी पङ्क्तिः, षष्ठ्याः साम्न्यनुष्टुप्, सप्तम्या निचृद्विराड्-गायत्री, अष्टम्याः साम्नी पङ्क्तिः, नवम्या आसुरीपङ्क्तिः, एकादश्याः साम्न्युष्णिक्, द्वादशी-त्रयोदश्योश्चार्च्यनुष्टुप् छन्दांसि ।

कतिषुचित् कर्मसु शान्त्युदकं विहितम् । तेन हि आचमन-प्रोक्षणावसेचना-प्लावनानि कर्त्तव्यानि भवन्ति । तच्छान्त्युदकं कतिभिश्चिच्छान्तिनामकैः सूक्तैः कर्त्तव्यं भवति । तत् कांस्यपात्रे कर्त्तव्यम् । तथाकरणात् पूर्वम् 'अतिसृष्टो अपां वृषभः' इति सूक्तेन अपोऽतिसृज्य अवकरं विसर्जयति इति साम्प्रदायिकाः । सूचितं हि—"अतिसृष्टो अपां वृषभः इत्यपोतिसृज्य" (कौ० सू० ९।९) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अतिसृष्टो अपां वृषभोऽतिसृष्टा अग्नयो दिव्याः ॥१॥

पदपाठः

अतिसृष्टः । अपाम् । वृषभः । अतिऽसृष्टाः । अग्नयः । दिव्याः ॥१॥

रोगशान्तये मया **अपां** जलानां मध्ये **वृषभः** श्रेष्ठः । यद्वा 'वर्षणाद् वृषभः' (निरु० ६।३) सेचनकर्त्ता घनरसो जलपृषतः अतिसृष्टः कांस्यपात्रे परित्यक्तः । वृषभः इत्यत्र वृषु सेचने (भ्वा०) धातोः 'ऋषिवृषिभ्यां कित्' (उ० ३।१२३) इत्यनेन अभच्, किच्च । **दिव्याः** दिव् इति दीव्यतेः क्विप् । ततः 'द्यु प्रागपागुदक् प्रतीचो यत्' (पा० सू० ४।२।१०१) इत्यनेन भवार्थे यत् । **अग्नयः** अपि, दिव्याः दिवि भवाः अग्नयोऽपि **अतिसृष्टाः** विमुक्ताः । अस्य रोगस्य शान्तये मया शान्त्युदकमपि सिक्तम्, अग्नयोऽपि च शान्ति प्रापिता इत्यर्थः । अपां जलानां वृषभः स्वामी अतिसृष्टः विमुक्तः इत्यपि कश्चिन्मनुतेऽस्यार्थम् ।

रुजन् परिरुजन् मृणन् प्रमृणन् ॥२॥

पदपाठः

रुजन् । परिऽरुजन् । मृणन् । प्रऽमृणन् ॥२॥

कीदृशः स जलविन्दुरतिसृष्टः ? **रुजन्** रोगान् उत्पादयन् । रुजो भङ्गे (तु०) धातोः शतृ प्रत्ययः । **परिरुजन्** तान् परितोऽपि रुजन् समूलमुन्मूलयन्, **मृणन्** रोगान् नाशयन् **प्रमृणन्** प्रकर्षेण नाशयंश्च । मृण हिंसायां (तु०) धातोः शतृ प्रत्ययः । अतिसृष्टः इति पूर्वेण सम्वन्धः ।

स्रोको मनोहा खनो निर्दाह आत्मदूषिस्तनूदूषिः ॥३॥

पदपाठः

स्रोकः । मनःऽहा । खनः । निःऽदाहः । आत्मऽदूषिः । तनूऽदूषिः ॥३॥

सम्प्रति शरीरतापं विशिनष्टि । **स्रोकः** स्रोचति स्वास्थ्यमपहृत्य गच्छतीति स्रोकः । स्रुचु गतौ (भ्वा०) धातोः 'पुंसि संज्ञायां घः प्रायेण' (पा० सू० ३।३।११८) इति व्यत्ययेन कर्त्तरि घः । 'चजोः कुघिण्ण्यतोः' (पा०सू० ७।३।५२) इति कुत्वञ्च । स्वास्थ्यनाशकः इत्यर्थः । स्रुचु गतौ (भ्वा०) इति धातुं वेदे हिंसनेऽपि मन्वानः कश्चित् स्रोकः हिंसकः एवमपि व्याख्याति । पुनः कीदृशः ? **मनोहा** मनो हन्तीति मनोहा मनोहर्षविनाशक इत्यर्थः । **खनः** हृदयविदारकः । खनु

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विदारणे (भ्वा०) धातोः अच् । **निर्दाहः** नितरां दाहकारी । **आत्मदूषिः** आत्मदूषकः **तनूदूषिः** शरीरे विकृत्युत्पादकश्च यः देहसन्तापो वर्त्तते :—(अग्रिमेण सम्बन्धः)

इदं तमति सृजामि तं माभ्यवनिक्षि ॥४॥

पदपाठः

इदम् । तम् । अति । सृजामि । तम् । मा । अभिऽअवनिक्षि ॥४॥

इदम् इत्युदकनामसु पाठात् (निघ० १।१२) अनेन जलेन, विभक्तिव्यत्ययश्छन्दसः । इदम् इदानीमपि कश्चित् । **तं** शरीरसन्तापं, रोगमित्यर्थः । **अतिसृजामि** विनाशयामि । साम्प्रतं तं सन्तापमहं **मा अभि अवनिक्षि** नैव कदापि पुष्येयम् । णिजिर् शौचपोषणयोः (जु०) धातोः लुङ्, अडभावः ।

तेन तमभ्यतिसृजामो यो३स्मान् द्वेष्टि यं वयं द्विष्मः ॥५॥

पदपाठः

तेन । तम् । अभिऽअतिसृजामः । यः । अस्मान् । द्वेष्टि । यम् । वयम् । द्विष्मः ॥५॥

तेन जलप्रोक्षणेन **वयं तं** रोगसन्तापम्, **अभिअतिसृजामः** अभितो दूरं प्रक्षिपामः । तथा **यः** रोगः शत्रुर्वा अस्मान् **द्वेष्टि** बाधते पीडयति च तमप्यतिसृजामः । एवं **यं** रोगं शत्रुं वा वयं **द्विष्मः** बाधामहे पीडयितुं वाञ्छामो वा तमपि दूरे प्रक्षिपामः ।

अपामग्रमसि समुद्रं वोऽभ्यवसृजामि ॥६॥

पदपाठः

अपाम् । अग्रम् । असि । समुद्रम् । वः । अभिऽअवसृजामि ॥६॥

हे शान्त्युदक ! त्वम् **अपां** जलानाम् **अग्रम्** उपरिभवम् **असि** मूर्धन्यं वर्त्तसे । गत्यर्थकात् अग (भ्वा०) धातोः औणादिको रन् प्रत्ययः, नुमोऽभावश्च । अतो **वः** युष्मान् **समुद्रम् अभि** त्वदीयं विपुलं स्थानं सागरं प्रति गन्तुम् **अवसृजामि** प्रक्षिपामि । अथ कश्चित् परमात्मानमुद्दिश्य व्याख्याति । हे मनुष्याः ! परमात्मा अपां प्रजानाम् अग्रम् आलम्बनम् असि अस्ति । पुरुषव्यत्ययश्छान्दसः । अहं वो युष्मान् समुद्रं भूतानां समुदयकारकं परमात्मानमभिलक्ष्य त्यजामि इति ।

यो३प्स्व१ग्निरति तं सृजामि म्रोकं खनिं तनूदूषिम् ॥७॥

पदपाठः

यः । अप्ऽसु । अग्निः । अति । तम् । सृजामि । म्रोकम् । खनिम् । तनूऽदूषिम् ॥७॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

यः च रोगः **अप्सु** 'आपो वै प्राणाः' (श० ब्रा० ३।८।२।४) प्राणेषु प्राणावलम्बनभूतेषु शरीरावयवेषु इत्यर्थः । अपां मध्ये वा । **अग्निः** अग्निवद् दाहकः । यद्वा 'अग्निर्वै मृत्युः' (श० ब्रा० १४।६।२।१०) इति श्रुतेः मृत्युरूपेण स्थितो वर्त्तते तं रोगं, कीदृशं ? **स्रोकं** स्वास्थ्यघातकं, **खर्निं** रुजामाकरं यद्वा हृदयविदारकं तथा **तनूदूर्षिं** शरीरदूषकम् । **अतिसृजामि** सर्वथा त्यजामि ।

यो व आपोऽग्निराविवेश स एष यद् वो घोरं तदेतत् ॥८॥

पदपाठः

यः । वः । आपः । अग्निः । आऽविवेश । सः । एषः । यत् । वः । घोरम् । तत् । एतत् ॥८॥

हे **आपः** जलानि ! **यः अग्निः** दाहकारी **वः** युष्मान् **आविवेश** प्रविष्टोऽस्ति **स एषः** स एवायमस्य रोगिणः सन्तापकोऽस्ति । **यत्** च **वः घोरं** युष्मासु यच्च भयङ्करं रूपं **तदेतत्** तदपीदमेव रूपं विद्यते । केनचन अग्निशब्दस्य पारमार्थिकोऽर्थः परमेश्वरो गृहीतः ।

इन्द्रस्य व इन्द्रियेणाभि षिञ्चेत् ॥९॥

पदपाठः

इन्द्रस्य । वः । इन्द्रियेण । अभि । सिञ्चेत् ॥९॥

हे रोगिणः ! विकृतावयवाः ! अयं मन्त्रः, शान्त्युदकाभिषेको वा **वः** युष्मान् **इन्द्रस्य** देवानां परमबलिष्ठस्येन्द्रस्य । आमनन्ति चैवं कौषीतकीया अपि 'इन्द्रो वै देवानामोजिष्ठो बलिष्ठः' (कौ० ६।१४) इति । **इन्द्रियेण** 'प्राणा इन्द्रियाणि' (तां० ब्रा० २।१४।२) इति श्रुतेः प्राणोपलक्षितेन बलेन । यद्वा इन्द्रियमिति धननामसु पाठात् (निघं० २।१०) धनैश्वर्यादिना **अभिषिञ्चेत्** युष्मदभिषेकं कुर्यात् । "इन्द्रस्येन्द्रियेणाभिषिञ्चामि' एवमामन्यतेऽन्यत्राऽपि ऐतरेयब्राह्मणे (८।७) ।

अरिप्रा आपो अप रिप्रमस्मत् ॥१०॥

पदपाठः

अरिप्राः । आपः । अप । रिप्रम् । अस्मत् ॥१०॥

अरिप्राः रिप्रमिति पापनाम 'रपो रिप्रमिति पापनामनी भवतः' (निरु० ४।३) इति वचनात् निष्पापाः शुद्धा इत्यर्थः । रीङ् श्रवणे (दि०) धातोः 'लीरीङो

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

ह्रस्वः' (उ० ५।५५) इत्यनेन रः प्रत्ययः पुगागमो ह्रस्वश्च । नञ्समासः । **आपो** जलानि **अस्मत्** अस्मत्तः रिप्रं पापं रोगजातमित्यर्थः । **अप** अपनयन्तु ।

प्रास्मदेनो वहन्तु प्र दुष्वप्न्यं वहन्तु ।।११।।

पदपाठः

प्र । अस्मत् । एनः । वहन्तु । प्र । दुःऽस्वप्न्यम् । वहन्तु ।।११।।

इमानि शान्त्युदकानि **अस्मत्** अस्मत्तः **एनः** सर्वाणि रोगकल्मषाणि **प्रवहन्तु** दूरं गमयन्तु । **दुःस्वप्न्यं** दुःस्वप्नजनितं दुष्टफलमपि **प्रवहन्तु** दूरमपनयन्तु ।

शिवेन मा चक्षुषा पश्यतापः शिवया तन्वोप स्पृशत त्वचं मे ।१२।

पदपाठः

शिवेन । मा । चक्षुषा । पश्यत । आपः । शिवया । तन्वाऽ । उप । स्पृशत । त्वचम् । मे ।।१२।।

हे **आपः** ! यूयं **मा** मां **शिवेन** कल्याणकारिणा **चक्षुषा** नेत्रेण आह्लादकारिण्या दृष्टया इत्यर्थः । **पश्यत** विलोकयत । मयि कृपां कुरुत इति भावः । **मे** मम रोगिणः **त्वचं** त्वगुपलक्षितं शरीरं **शिवया तन्वा** आत्मनः सुखदशरीरेण **उपस्पृशत** संस्पृशत । आत्मनः शरीरस्पर्शप्रदानेन मां सुखयन्तु भवत्यः इत्यर्थः ।

शिवानग्नीनप्सुषदो हवामहे मयि क्षत्रं वर्च आ धत्त देवीः ।।१३।।

पदपाठः

शिवान् । अग्नीन् । अप्सुऽसदः । हवामहे । मयि । क्षत्रम् । वर्चः । आ । धत्त । देवीः ।।१३।।

वयमत्र **अप्सुसदः** जलेषु निवसतः **शिवान्** कल्याणकारिणः **अग्नीन् हवामहे** आह्वयामः । **देवीः** हे आपोदेव्यः ! यूयमपि **मयि क्षत्रं वर्चः** रोगक्षतात् त्राणकारि तेजः **आधत्त** स्थापयत । मां रोगेभ्यो रक्षत इत्यर्थः ।

इति प्रथमेऽनुवाके प्रथमं पर्यायसूक्तम् ।

द्वितीयं पर्यायसूक्तम्

षड्चस्यास्य पर्यायस्याथर्वा ऋषिः । वाग् देवता । प्रथमर्च आसुर्यनुष्टुप्, द्वितीयाया आसुर्युष्णिक्, तृतीयायाः साम्न्युष्णिक्, चतुर्थ्यास्त्रिपदा साम्नी बृहती, पञ्चम्या आर्च्यनुष्टुप्, षष्ठ्याश्च निचृद्विराड्गायत्री छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मरणं व्यसनं चैव बन्धनं च विशेषतः ।
प्रणिपातोन्मत्तता वा दैवोपहतिरेव च ।।
पुत्रादिधननाशश्च गृहे दोषान् बहूनपि ।।

एतानि सर्वाणि कानिचिद्वा तेषां मध्ये यथा शत्रोर्भवन्ति तथोद्देशेन यत् कर्म तदभिचारकर्म । एतन्नामकः कर्मविशेषः । तादृशस्याभिचारकर्मणः समाप्तौ अवभृथे स्नात्वा 'निर्दुरर्मण्यः' इति सूक्तेन सर्वौषधीभिर्नाम कैश्चिदोषधिविशेषैरात्मानमभिमृशति । तदुक्तं कौशिकेन—"निर्दुरर्मण्यः इति संधाव्याभिमृशति" (कौ० सू० ४६।२७) इति । अभिचारं कृत्वा कर्त्ता शान्तिमिमां करोतीत्यर्थः ।

तथोपनयनकर्मणि अनेन सूक्तेन कुङ्कुमचन्दनसर्वौषध्यादिना शरीरं समालभ्यात्मानमभिमन्त्रयते आयुष्कामः । सूत्रितं हि—"निर्दुरर्मण्यः' इति संधाव्य" (कौ० सू० ५८।१६) इति ।

तथा चक्षुरादीन्द्रियदार्ढ्यकामः अरण्ये गत्वा अनेन सूक्तेन सर्वौषधिमभिमन्त्र्य अनुलोमं प्रलिम्पति । तथा च सूत्रम्—"निर्दुरर्मण्यः' इति सर्वसुरभिचूर्णैररण्येऽप्रतीहारं प्रलिम्पति" (कौ० सू० ५८।१२) इति ।

श्रोत्रं वाग् मनश्चक्षुर्दन्ता नासिका अन्यच्च सर्वं विकलेन्द्रियं दृढं भवति । यो विकलेन्द्रियस्तस्येदं कर्म ।

निर्दुरर्मण्यऽऊर्जा मधुमती वाक् ।।१।।

पदपाठः

निः । दुःऽअर्मण्यःऽ । ऊर्जा । मधुऽमती । वाक् ।।१।।

अस्माकं **वाक्** वाणी, कीदृशी **मधुमती** मधुररसवती । भवति चात्र ब्राह्मणम्—"अपो देवा मधुमतीरगृभ्णन्नित्यपो देवा रसवतीरगृह्णन्नित्येवैतदाह" (श० ब्रा० ५।३।४।३) इति । **ऊर्जा** अन्ननामसु पाठाद् विविधेनान्नेन सह । यद्वा 'ऊर्ग् वै स्वम्' (श० ब्रा० ५।३।५।१२) इनि श्रुतेः धनवैभवेन सह **दुरर्मण्यः निः** दुर्गतेः पृथग् भवेत् । दुर्पूर्वकाद् ऋ गतिप्रापणयोः (भ्वा०) धातोः 'सर्वधातुभ्यो मनिन्' (उ० ४।१४५) इति मनिन् । **'ऋन्नेभ्यो ङीप्'** (पा० सू० ४।१।५) इति सूत्रेण ङीप् । छान्दसं रूपं हीदम् । दुरर्मण्यः दूषितभोजनम् इत्यपि कश्चिद् व्याचख्यौ । अस्माकं वाण्यां माधुर्यं भवेत्, धनवैभवादिकं भवेत्, दुर्गतेश्च सा वाक् दूरं तिष्ठेदित्यर्थः ।

मधुमती स्थ मधुमतीं वाचमुदेयम् ।।२।।

पदपाठः

मधुऽमतीः । स्थ । मधुऽमतीम् । वाचम् । उदेयम् ।।२।।

हे अन्नाद्योषधयः ! यूयं **मधुमतीः** रसवत्यः **स्थ** भवथ । अतोऽहमपि **मधुमतीं** माधुर्यपूर्णां **वाचं** वाणीम् **उदेयम्** वदेयम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

उपहूतो मे गोपा उपहूतो गोपीथः ॥३॥

पदपाठः

उपऽहूतः । मे । गोपाः । उपहूतो । गोपीथः ॥३॥

मे मम **गोपाः** इन्द्रियरक्षको वाणीरक्षको वा। यद्वा "एष वै गोपा य एष तपति" (श० ब्रा० १४।१।४।९) आदित्यः सर्वरक्षकः **उपहूतः** समीपे आहूतो वर्त्तते। तथा **गोपीथः** 'यज्ञो वै गौः' (तै० ब्रा० ३।६।८।३) इति श्रुतेः यज्ञपतिरपि **उपहूतः** समाहूतः। गोपूर्वकात् पा रक्षणे (अ०) धातोः 'निशीथगोपीथावगथाः' (उ० २।९) इत्यनेन थक् ईत्वञ्च। यद्वा गोपीथः सोमपानकर्त्ता देवः समाहूतः। अस्मिन्नर्थे पा पाने (भ्वा०) धातोः थक्। 'गोपीथाय सोमपानाय' इति यास्कः (निरु० १०।३)।

सुश्रुतौ कर्णौ भद्रश्रुतौ कर्णौ भद्रं श्लोकं श्रूयासम् ॥४॥

पदपाठः

सुऽश्रुतौ । कर्णौ । भद्रऽश्रुतौ । कर्णौ । भद्रम् । श्लोकम् । श्रूयासम् ॥४॥

कर्णौ मदीये श्रोत्रे **सुश्रुतौ** शोभनश्रोतारौ स्यातामिति शेषः। मदीयौ **कर्णौ भद्रश्रुतौ** माङ्गलिकवचनश्रोतारौ च भवेताम्। किमन्यत्, अहं सदैव **भद्रं श्लोकं** 'श्लोकमिति वाङ्नाम' (निघं० १।११) मङ्गलमयीं वाचं **श्रूयासम्** आकर्णयेयम्। श्लोकमित्यत्र श्लोकृ सङ्घाते (भ्वा०) धातोर्घञ्।

सुश्रुतिश्च मोपश्रुतिश्च मा हासिष्टां सौपर्णं चक्षुरजस्रं ज्योतिः ।५।

पदपाठः

सुऽश्रुतिः । च । मा । उपऽश्रुतिः । च । मा । हासिष्टाम् । सौपर्णम् । चक्षुः । अजस्रम् । ज्योतिः ॥५॥

मा मां **सुश्रुतिः** सुन्दरश्रवणशक्तिः, चकारः समुच्चयार्थः, **उपश्रुतिः** दूरश्रवणशक्तिः विषयाणामङ्गीकारशक्तिरित्यर्थः। **मा हासिष्टां** न त्यजेताम्। ओहाक् त्यागे (जु०) धातोर्लुङि रूपम्। मे **चक्षुः** नेत्रं, नेत्रज्योतिरित्यर्थः, **सौपर्णं** गारुडं गरुडपक्षिवद् दूरगामि भवेत्। तच्च ज्योतिः **अजस्रं** निरन्तरं तिष्ठेदिति शेषः।

ऋषीणां प्रस्तरोऽसि नमोस्तु दैवाय प्रस्तराय ॥६॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

ऋषीणाम् । प्रऽस्तरः । असि । नमः । अस्तु । दैवाय । प्रऽस्तराय ।।६।।

अनेन पर्वणि कुशास्तरणं विधीयते (वैता० २।६) । हे कुशस्तोम ! त्वम् **ऋषीणाम्** 'प्राणा वा ऋषयः' (श० ब्रा० ७।२।३।५) ऋषिप्राणानां **प्रस्तरः असि** आस्तरणस्थानीयोऽसि । अत्र यज्ञे प्राणरूपिणो देवास्त्वामधितिष्ठन्तीत्यर्थः । अतो **दैवाय** दिव्यगुणाय **प्रस्तराय** देवास्तरणभूताय तुभ्यं **नमः अस्तु** नमनं भवतु ।

इति प्रथमेऽनुवाके द्वितीयं पर्यायसूक्तम् ।

तृतीयं पर्यायसूक्तम्

षडृचस्यास्य पर्यायस्य ब्रह्मा ऋषिः । आदित्यो देवता । प्रथमर्च आसुरी गायत्री, द्वितीया-तृतीययोरार्च्यनुष्टुप्, चतुर्थ्याः प्राजापत्या त्रिष्टुप्, पञ्चम्याः साम्न्युष्णिक्, षष्ठ्याश्च द्विपदा साम्नी त्रिष्टुप् छन्दांसि ।

उपनयने 'मूर्धाहं' 'नाभिरहम्' इति सूक्ताभ्यामायुरभिवृद्ध्यर्थं माणवक उद्यन्तमादित्यमुपतिष्ठते । तदुक्तं कौशिकेन–" 'मूर्धाहम्' (अथर्व० १६।३), 'विषासहिम्' (अथर्व० १७।१) इत्युद्यन्तमुपतिष्ठते" (कौ० सू० ५८।२२) ।

मूर्धाहं रयीणां मूर्धा समानानां भूयासम् ।।१।।

पदपाठः

मूर्धा । अहम् । रयीणाम् । मूर्धा । समानानाम् । भूयासम् ।।१।।

हे भगवन्नादित्य ! **अहं** स्तोता माणवको वा **रयीणां** धनानां तद्वतामित्यर्थः । **मूर्धा** शिरःस्थानीयो मूर्धन्य इति भावः । **भूयासम्** भवेयम् । **समानानां** स्वतुल्यगुणवैभवविद्यावतां लोकानामपि **मूर्धा** मूर्धन्यो भवेयम् । त्वदनुग्रहेण न मत्तोऽधिकः कश्चन धनवान् भवेत्, न वा समानकुटुम्बिषु मत्तोऽधिकः कोऽपि विशिष्टो जायेतेति तात्पर्यार्थः ।

रुजश्च मा वेनश्च मा हासिष्टां मूर्धा च मा विधर्मा च मा हासिष्टाम् ।।२।।

पदपाठः

रुजः । च । मा । वेनः । च । मा । हासिष्टाम् । मूर्धा । च । मा । विऽधर्मा । च । मा । हासिष्टाम् ।।२।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

हे आदित्य ! **मा** मां **रुजः** । अत्र वर्णव्यत्ययश्छान्दसः, रुचः, शारीरिकी शोभा इत्यर्थः, **वेनः च** 'आत्मा वै वेनः'' (कौषी० ८।५) प्राणात्मा च **मा हासिष्टाम्**, नैव त्यजेताम् । तथा **मा** मां **मूर्धा** सर्वंजनमूर्धन्यभावः **विधर्मा** च विशेषरूपेण सर्वप्राधान्यञ्च **मा हासिष्टाम्** न त्यजेताम् । मयि शारीरिकं सौन्दर्यम् आत्मतेजश्च सदैव तिष्ठेताम् । सर्वेषां मूर्धन्यश्चाप्यहं सदा तिष्ठेयमिति भावः ।

उखश्च मा चमसश्च मा हासिष्टां धर्त्ता च मा धरुणश्च
मा हासिष्टाम् ।।३।।

पदपाठः

उखः । च । मा । चमसः । च । मा । हासिष्टाम् । धर्त्ता । च । मा । धरुणः । च । मा । हासिष्टाम् ।।३।।

उखः अग्निहोत्रकर्मणि पचनस्थालीपात्रम्, **चमसः** आचामति येन स सोमपानपात्रविशेषः । इमे द्वे अपि पात्रे **मा** मां **मा हासिष्टां** न त्यजेताम् । नैव कदाप्यहमग्निहोत्रादिश्रौतकर्म परित्यजेयमित्यर्थः । **धर्त्ता च** सकलविश्वधारणकर्त्ता परमेश्वरो **धरुणश्च** 'प्रतिष्ठा वै धरुणम्'' (श० ब्रा० ७।४।२।५) प्रतिष्ठा च यद्वा 'अथ यद् धरुण एकविंश इत्यसौ हि स आदित्यः'' (जै० ब्रा० ३।३०९) आदित्यश्च **मा** मां **मा हासिष्टाम्**, न त्यजेताम् । अर्थात् परमेश्वरतः प्रतिष्ठातः आदित्यतो वाप्यहं न विमुखो भवेयमिति ।

अत्र मन्त्राद्यपादे उखः इत्यत्र उर्वः इत्यपि पठन्ति केचित् । परं तत्रापि चरुपचनपात्रमित्येवास्यार्थं स्वीकुर्वन्ति ते ।

विमोकश्च मार्द्रपविश्च मा हासिष्टामार्द्रदानुश्च
मा मातरिश्वा च मा हासिष्टाम् ।।४।।

पदपाठः

विऽमोकः । च । मा । आर्द्रऽपविः । च । मा । हासिष्टाम् । आर्द्रऽदानुः । च । मा । मातरिश्वा । च । मा । हासिष्टाम् ।।४।।

मा मां, **विमोकः** विमुक्तकारी शौर्यादिगुणः स्वातन्त्र्यप्राप्तिसामर्थ्यमित्यर्थः । यद्वा विमोको जलविमोचनकारी मेघः । **आर्द्रपविः च**, पविरिति वाङ्नाम (निघं० १।११), मधुरसान्द्रा वाणी च, गर्जनशीलविद्युदित्यपि कश्चित् । **मा हासिष्टाम्** इमौ द्वावपि न त्यजेताम् । तथा **आर्द्रदानुः** आर्द्राणां दानुर्दाता, आर्द्रताप्रदाता वायुः । भवति चात्र ब्राह्मणम् ''आर्द्रदानुरित्येष वायुर्हि आर्द्रं ददाति'' (श० ब्रा०

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

६।४।२।५) इति । 'प्राणो मातरिश्वा' (ऐ० ब्रा० २।३८) इति श्रुतेः प्राणश्च **मा मां, मा हासिष्टाम्** न त्यजेताम् । अर्थादहं स्वातन्त्र्यप्राप्तिसामर्थ्यं लभेय, मधुर-सान्द्रवाचमुच्चारयेयञ्च । सदैव सान्द्रपवनो मदनुकूलो वहेत्, प्राणैश्च नाहं विमुक्तः स्यामिति ।

बृहस्पतिर्म आत्मा नृमणा नाम हृद्यः ॥५॥

पदपाठः

बृहस्पतिः । मे । आत्मा । नृऽमनाः । नाम । हृद्यः ॥५॥

मे मम स्तोतुः **आत्मा बृहस्पतिः** 'ब्रह्म वै बृहस्पतिः' (तै० सं० २।२।९।१०) ब्रह्म वर्त्तते । यद्वा 'बृहस्पतिर्वै वाच ईष्टे' (श० ब्रा० ७।२।३।५) वाचां स्वामी बृहस्पतिर्मे आत्मा अस्तीति शेषः । अतोऽहं **नृमनाः** नृषु 'नरो ह वै देवविशः' (जै० ब्रा० १।८९) दैवीप्रजासु, देवेष्वित्यर्थः । मननशीलो **हृद्यः** च हृदयग्राही च, **नामेति** प्रसिद्धौ । भवेयमिति शेषः । यद्वा नृमनाः नृषु नेतृषु मनुष्येषु मनोयुक्तो हृद्यश्च भूयासम् ।

असंतापं मे हृदयमुर्वी गव्यूतिः समुद्रो अस्मि विधर्मणा ॥६॥

पदपाठः

असम्ऽतापम् । मे । हृदयम् । उर्वी । गव्यूतिः । समुद्रः । अस्मि । विऽधर्मणा ॥६॥

हे आदित्य ! **मे** मम स्तोतुः **हृदयं** मनः, **असन्तापं** तापत्रयरहितं भवेत् । मम **गव्यूतिः**, गवां वाचां यूतिः मिश्रणमार्गः **उर्वी** विशालः स्यात् । अहम् असम्बद्धां वाचं न वदेयमित्यर्थः । अहं **विधर्मणा** विशेषेण धारणसामर्थ्येन **समुद्रोऽस्मि** समुद्रवद् अगाधो भवेयमिति ।

इति प्रथमेऽनुवाके तृतीयं पर्यायसूक्तम् ।

चतुर्थं पर्यायसूक्तम्

सप्तर्चस्यास्य पर्यायस्य ब्रह्मा ऋषिः । आदित्यो देवता । प्रथमा-तृतीययो-र्ऋचोः साम्न्यनुष्टुप्, द्वितीयायाः साम्न्युष्णिक्, चतुर्थ्यास्त्रिपदानुष्टुप् पञ्चम्या आसुरी गायत्री, षष्ठ्या आर्च्युष्णिक्, सप्तम्याश्च त्रिपदा विराड्गर्भानुष्टुप् छन्दांसि ।

'नाभिरहम्' इति सूक्तस्य पूर्वसूक्तेन सह उक्तो विनियोगः ।

नाभिरहं रयीणां नाभिः समानानां भूयासम् ॥१॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

नाभिः । अहम् । रयीणाम् । नाभिः । समानानाम् । भूयासम् ।।१।।

नाभिः केन्द्रभूतः । भवति चात्र ब्राह्मणम् 'मध्यं वै नाभिः, मध्यमभयम्' (श० ब्रा० १।१।२।२३) इति । शेषं पूर्ववत् (अथर्व० १६।२।३।१) ।

स्वासदसि सूषा अमृतो मर्त्येष्वा ।।२।।

पदपाठः

सुऽआसत् । असि । सुऽउषाः । अमृतः । मर्त्येषु । आ ।।२।।

अनेनादित्यमुपतिष्ठते । हे आदित्य ! त्वं **मर्त्येषु** विनश्वरेषु सांसारिकेषु पदार्थेषु **अमृतः** अमरणधर्मा अविनश्वरः इत्यर्थः, **आ असि** आसमन्ताद् भवसि । अतः अस्मभ्यं **सूषाः** शोभना उषा यस्मिन् स एतादृशो भवान् **सु आसत्** समन्ताद् भवतु । आङ् + भू (भ्वा०) धातोः लेटि रूपम् । अत्र कश्चित् स्वासत् इति क्रियापदममन्यमानः शोभनसत्तावान् इत्यस्यार्थं स्वीकुरुते । शोभनस्थातेत्यपि कश्चित् ।

मा मां प्राणो हासीन्मो अपानोऽवहाय परागात् ।।३।।

पदपाठः

मा । माम् । प्राणः । हासीत् । मो इति । अपानः । अवऽहाय । परा । गात् ।।३।।

मां स्तोतृजनं **प्राणः** जीवनाधायकः अन्तर्गच्छन् श्वासवायुः **मा हासीत्** न त्यजतु । तथा **अपानः** बहिर्निर्गच्छन् अपानः एतन्नामकः श्वासवायुरपि माम् **अवहाय** परित्यज्य **मा परागात्** न दूरं गच्छतु । श्वासप्रश्वासप्रक्रिया सदैव मयि तिष्ठेत् येन दीर्घायुरहं भूयासमित्यर्थः ।

सूर्यो माह्नः पात्वग्निः पृथिव्या वायुरन्तरिक्षाद्
यमो मनुष्येऽभ्यः सरस्वती पार्थिवेभ्यः ।।४।।

पदपाठः

सूर्यः । मा । अह्नः । पातु । अग्निः । पृथिव्याः । वायुः । अन्तरिक्षात् । यमः । मनुष्येऽभ्यः । सरस्वती । पार्थिवेभ्यः ।।४।।

सूर्यः अयमादित्यो देवः । 'सर्त्तेर्वा सुवतेर्वा स्वीर्यतेर्वा' (निरु० १२।१४) । सृ गतौ (भ्वा०) धातोः अथवा षू प्रेरणे (दि०) धातोः 'राज-सूय-सूर्य-मृषोद्यरुच्य०' (पा० सू० ३।१।११४) सूत्रेण क्यप्प्रत्यये सर्त्तेरुत्वं सुवतेर्वा रुडागमो निपात्यते । भवति चात्र श्रुतिः "असौ वा आदित्यः सूर्यः" (श० ब्रा० ६।४।२।२३) इति ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मा मां स्तोतारम् **अह्नः** दिवसात्, दिवसे समुत्पन्नेभ्यो भयेभ्यः इत्यर्थः, **पातु** रक्षतु। **वायुः** पवनो देवो माम् **अन्तरिक्षात्** मध्यमलोकजनितोपद्रवेभ्यः पातु। **यमः** सर्वनियमनकारी यमो राजा मां **मनुष्येभ्यः** मानवोत्पादितेभ्यः कष्टेभ्यः पातु। **सरस्वती** देवता च मां **पार्थिवेभ्यः** पार्थिवपदार्थेभ्यो रक्षतु।

प्राणापानौ मा मा हासिष्टं मा जने प्रमेषि ॥५॥

पदपाठः

प्राणापानौ। मा। मा। हासिष्टम्। मा। जने। प्र। मेषि ॥५॥

मा मां **प्राणापानौ** श्वासप्रश्वासौ **मा हासिष्टं** न त्यजेताम्। **जने** मानवसमुदायेऽहं **मा प्रमेषि** हिंसां न लभेय। मेषि, मीङ् हिंसायां (दि०) धातोर्लुङ्।

स्वस्त्य[1]द्योषसो दोषसश्च सर्व आपः सर्वगणो अशीय ॥६॥

पदपाठः

स्वस्ति। अद्य। उषसः। दोषसः। च। सर्वः। आपः। सर्वऽगणः। अशीय।

आपः हे आपोदेव्यः! **अद्य** साम्प्रतं **स्वस्ति** शुभं भवेत्, **उषसः** उषःकालस्य समये **दोषसश्च** रात्रेश्च समये अहं **सर्वगणः** कुटुम्बिजनसहितः **सर्वः** सम्पूर्णतां प्राप्तः सन् **अशीय** सुखानि लभेय। यद्वा सर्वगणैरुपेतोऽहं सर्वतां प्राप्तः सन् उषसः प्रभातवेलाः दोषसश्च रात्रीश्च अशीय लभेय। अहं पूर्णायुर्भवेयमित्यर्थः।

शक्वरीः स्थ पशवो मोप स्थेषुर्मित्रावरुणौ
मे प्राणापानावग्निर्मे दक्षं दधातु ॥७॥

पदपाठः

शक्वरीः। स्थ। पशवः। मा। उप। स्थेषुः। मित्रावरुणौ। मे। प्राणापानौ। अग्निः। मे। दक्षम्। दधातु ॥७॥

हे आपोदेव्यः! यूयं **शक्वरीः स्थ** शक्तिशालिन्यो भवथ। शक्लृ शक्तौ (स्वा०) धातोर्मत्वर्थे 'छन्दसीवनिपौ' इति वार्त्तिकेन वनिप्, ततः स्त्रियां 'वनोरच' (पा०सू० ४।१।७) इति ङीप् रेफश्चान्तादेशः। अत एवाम्नायते 'आपो वै शक्वर्यः' (जै० ब्रा० ३।९२) इति। शक्वर्यः पशुरूपा अपि सन्ति। यथा चाम्नायते 'पशवो वै शक्वर्यः' (तां०ब्रा० १३।४।१३) इति। अतः **पशवः मा** माम् **उपस्थेषुः** उपतिष्ठेयुः। पशुधनमप्यहं लभेय इत्यर्थः। **मित्रावरुणौ** इमौ युग्मदेवौ **मे** मम देहे **प्राणापानौ**

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

आधत्ताम् । **अग्निः** अयं देवः **मे मयि दक्षं** बलं **दधातु** आदधातु । यद्वा 'प्राणा वै दक्षाः' (जै० ब्रा० १।१५१) प्राणान् दधातु, मम प्राणान् रक्षतु इत्यर्थः ।

इति प्रथमेऽनुवाके चतुर्थं पर्यायसूक्तम् ।

इति प्रथमोऽनुवाकः

पञ्चमं पर्यायसूक्तम्

दशर्चस्यास्य पर्यायस्य यम ऋषिः दुःस्वप्ननाशनं देवता । प्रथमर्चश्चतुर्थ्यादितृचस्य प्रथमावसानर्चाञ्च विराड्गायत्री, द्वितीयायाश्चतुर्थ्यादिचतुर्द्वितीयावसानर्चां नवम्याश्च प्राजापत्या गायत्री, तृनीयायाश्चतुर्थ्यादिचतुस्तृतीयावसानर्चां दशम्याश्च द्विपदा साम्नी बृहती, सप्तम्याः प्रथमावसानर्चो भुरिग्विराड्गायत्री, अष्टम्याश्च स्वराड्विराड्गायत्री छन्दांसि ।

दुःस्वप्नदर्शने शान्तावेतत् पर्यायसूक्तं विनियुज्यते । तद्यथा —'विद्म ते स्वप्न' इत्येकेन पर्यायेण दुःस्वप्नं दृष्ट्वा मुखं विमार्ष्टि । तथा अतिघोरं दुःस्वप्नं दृष्ट्वा अनेन सूक्तेन मैश्रधान्यं पुरोडाशं जुहोति । तथा 'विद्म ते स्वप्न' इति सूक्तेन दुःस्वप्नं दृष्ट्वा पार्श्वेन द्वितीयेन भूयते । येन पार्श्वेन दुःस्वप्नो दृष्टस्ततोऽन्येन पार्श्वेन शेते इत्यर्थः । तथा अनेन सूक्तेनान्नं स्वप्ने दृष्ट्वा निरीक्षते । तदुक्तं कौशिकेन —"विद्म ते स्वप्न' इति सर्वेषामप्ययः" (कौ० सू० ४६।१३) इति ।

विद्म ते स्वप्न जनित्रं ग्राह्याः पुत्रोऽसि यमस्य करणः ।।१।।

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । ग्राह्याः । पुत्रः । असि । यमस्य । करणः ।।१।।

हे **स्वप्न** स्वाप ! यद्वा हे स्वप्नाभिमानिन् देव ! वयं **ते** तव **जनित्रं** जन्म **विद्म** जानीमः । जनित्रमित्यत्र जनि प्रादुर्भावे (दि०) धातोः इत्रप्रत्ययः । अयमेवार्थः अग्रेऽपि निरूप्यते । हे स्वप्न ! त्वं **ग्राह्याः** 'घडियाल' इति नाम्ना लोके प्रसिद्धायाः जलचर्याः, तद्वत् प्राणान्तकारिण्याः विपदः इत्यर्थः **पुत्रोऽसि** आत्मजोऽसि । यद्वा ग्राही प्राणान्तकारिणी रुक्, तस्यास्तनय इवोत्पन्नोऽसि । यतस्तादृशी भयावहा पीडैव प्राणिनो भाविनं परिणामं सूचयितुं स्वप्नं प्रकटयतीति सार्वजनीनम् । यथा च पठ्यते ऐतरेयारण्यकेऽपि "पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति" (ऐ० आ० ३।२।४) इति । अतस्त्वं हे स्वप्न ! **यमस्य करणः** । यमशब्दोऽत्र प्राणापहरणलक्षणं तद्व्यापारं सूचयति । प्राणापहरणस्य कर्त्ता भवसीत्यर्थः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अन्तकोऽसि मृत्युरसि ॥ २ ॥

पदपाठः

अन्तकः । असि । मृत्युः । असि ॥ २ ॥

हे स्वप्नाभिमानिन् देव ! अत एव त्वम् **अन्तकः असि** प्राणिनाम् अन्तकारी असि । तथा **मृत्युः** अपि **असि**, प्राणिनां जीवनावसानकर्त्ता अपि त्वमेव भवसि ।

तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुष्वप्न्यात् पाहि ॥३॥

पदपाठः

तम् । त्वा । स्वप्न । तथा । सम् । विद्म । सः । नः । स्वप्न । दुःऽस्वप्न्यात् । पाहि ॥ ३ ॥

स्वप्न हे स्वप्नाभिमानिन् देव ! **तं** तादृग्विधमुपर्युक्तं **त्वा** त्वां वयं **तथा** पूर्वोक्तप्रकारेण सर्वान्तकारिणं **संविद्म** सम्यग् अवगच्छामः, जानीम इत्यर्थः । हे **स्वप्न** ! **सः** तादृशस्त्वं **नः** अस्मान् स्तोतृजनान् **दुःस्वप्न्यात्** दुष्टस्वापजनितात् अरिष्टात् **पाहि** रक्ष ।

विद्म ते स्वप्न जनित्रं निर्ऋत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोऽसि० । तं त्वा० ॥ ४ ॥

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । निःऽऋत्याः । पुत्रः ।०।०॥४॥

हे **स्वप्न** ! त्वं **निर्ऋत्याः** कार्योपरोधिकायाः पापरूपिण्याः घोरादेव्याः । भवन्ति चात्र ब्राह्मणवाक्यानि—"घोरा वै निर्ऋतिः" (श० ब्रा० ७।२।१।१०), "निर्ऋतिर्वै कर्मण उपद्रष्टिका" (मैत्रा० ३।२।४), "पाप्मा वै निर्ऋतिः" (श० ब्रा० ७।२।१।१) इति च । **पुत्रोऽसि** तनयोऽसि । शेषं पूर्ववत् (अथर्व० १६।२।१।१-३)

विद्म ते स्वप्न जनित्रमभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोसि० । तं त्वा० ॥ ५ ॥

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । अभूत्याः । पुत्रः ।०।०॥ ५ ॥

हे **स्वप्न** ! त्वम् **अभूत्याः** असमृद्धयाः दुर्गतेः इत्यर्थः, **पुत्रोऽसि** आत्मजोऽसि । शेषं पूर्ववत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

विद्म ते स्वप्न जनित्रं निर्भूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोसि० । तं त्वा० ॥ ६ ॥

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । निःऽभूत्याः । पुत्र० ।०।।० ॥ ६ ॥

हे स्वप्न ! त्वं निर्भूत्याः असम्पत्तेः दरिद्रतायाः इत्यर्थः, पुत्रोऽसि आत्मजोऽसि, शेषं पूर्ववत् ।

विद्म ते स्वप्न जनित्रं पराभूत्याः पुत्रोऽसि यमस्य करणः ।
अन्तकोसि० । तं त्वा० ॥ ७ ॥

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । पराऽभूत्याः । पुत्र० ।०।०॥७॥

हे स्वप्न ! त्वं पराभूत्याः पराजितेः पराभवस्येत्यर्थः । पुत्रोऽसि । शेषं पूर्ववत् ।

विद्म ते स्वप्न जनित्रं देवजामीनां पुत्रोऽसि यमस्य करणः ॥८॥

पदपाठः

विद्म । ते । स्वप्न । जनित्रम् । देवजामीनाम् । पुत्रः । असि । यमस्य । करणः ॥८॥

हे स्वप्न ! त्वं देवजामीनां देवभक्षिकाणाम्, देवानामपि विनाशकारिणीनामित्यर्थः । जमु अदने (भ्वा०) धातोः बाहुलकाद् औणादिक इञ् प्रत्ययः । 'देवजामीनां देवस्त्रीणां वरुणानीप्रभृतीनाम्' इत्यन्यत्र सायणः (अथर्व०) ६।४६।२) । पुत्रोऽसि । शेषं पूर्ववत् ।

अन्तकोऽसि मृत्युरसि ॥९॥

पदपाठः

अन्तकः । असि । मृत्युः । असि ॥९॥

मन्त्रोऽयं पूर्वं व्याख्यातः (अथर्व० १६।२।१।२) ।

तं त्वा स्वप्न तथा सं विद्म स नः स्वप्न दुष्वप्न्यात् पाहि ॥१०॥

पदपाठः

तम् । त्वा । स्वप्न । तथा । सम । विद्म । सः । नः । स्वप्न । दुःऽस्वप्न्यात् । पाहि ॥१०॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

मन्त्रोऽयं पूर्वं व्याख्यातः (अथर्व० १६।२।१।३)।

इति द्वितीयेऽनुवाके प्रथमं पर्यायसूक्तम् ।

षष्ठं पर्यायसूक्तम्

एकादशर्चस्यास्य पर्यायस्य यम ऋषिः । उषा देवता । प्रथमादिचतसृणामृचां प्राजापत्यानुष्टुप्, पञ्चम्याः साम्नी पङ्क्तिः, षष्ठ्या निचृदार्ची बृहती, सप्तम्या द्विपदा साम्नी बृहती, अष्टम्या आसुरी जगती, नवम्या आसुरी बृहती, दशम्या आर्च्युष्णिक्, एकादश्याश्च त्रिपदा यवमध्या गायत्री आर्च्यनुष्टुब् वा छन्दांसि ।

अभिचारकर्मणि 'अजैष्म' इत्यादिपर्यायसूक्तचतुष्टयेन शत्रुषु पाशान् बद्ध्वाभिमन्त्र्य निखनति ।

तथा तत्रैव कर्मणि अनेन पर्यायचतुष्टयेन 'अगन्म स्वः' इति अवसानद्वय-वर्जितेन पदे पदे पाशान् वृश्चति ।

तथा तत्रैव कर्मणि अनेन अवसानद्वयवर्जितेन अधिपाशान् बाधकान् शङ्कून् संक्षुद्य भ्राष्ट्रेऽभ्यस्यति ।

तथा तत्रैव कर्मणि एतैश्चतुर्भिः पर्यायैः 'अगन्म स्वः' इत्यवसानद्वयवर्जितैः रक्तशालिक्षीरौदनम् अभिमन्त्र्य ददाति ।

तथा तत्रैव कर्मणि उक्तैरेव पर्यायैर्वृषभं संपातवन्तं कृत्वा शत्रुगृहान् अभि सृजति ।

तथा तत्रैव कर्मणि उक्तैः पर्यायैर्गर्तेध्मावन्तरेणावलेखनीं स्थाणौ निबध्य द्वादशरात्रं संपातान् आनयति ।

सूत्रितं हि—"'अजैष्म' इत्यधिपाशान् आदधाति । पदे पदे पाशान् वृश्चति । अधिपाशान् बाधकांछङ्कूंस्तान् संक्षुद्य संनह्य भ्राष्ट्रेऽभ्यस्यति । अशिशिषोः क्षीरौद-नादीनि त्रीणि । गर्तेध्मावन्तरेणावलेखनीं स्थाणौ निबध्य द्वादशरात्रं संपातान् अभ्यतिनयति" (कौ० सू० ४९, १९–२३) इति ।

'अगन्म स्वः' इत्यवसानद्वयेन आदित्यम् ईक्षते सर्वेषु तन्त्रेषु । तदुक्तं कौशि-केन– "'अगन्म स्वः' इत्यादित्यमीक्षते" (कौ० सू० ६।१६) इति ।

अजैष्माद्यासनामाद्याभूमानागसो वयम् ॥१॥

पदपाठः

अजैष्म । अद्य । असनाम । अद्य । अभूम । अनागसः । वयम् ॥१॥

वयं स्तोतारः **अद्य** साम्प्रतं दुःस्वप्नजनित-दुरिष्ट-शान्तिकर्मणि **अजैष्म** दुष्टफलानि जयेम । यद्वा दुःस्वप्ने नष्टे निखिलानि जेतव्यानि वयं जितवन्तः ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

तथा **असनाम** सुखान्यपि संभजेम । यद्वा दुरिष्टे प्रणष्टे संप्रति संभक्तव्यानि च समभजाम । असनाम इति षण संभक्तौ (भ्वा०) धातोः रूपम् । अतो वयमिदानीम् **अनागसः** निष्पापाः **अभूम** भवेम । यद्वा नष्टेषु दुष्टफलेषु वयमद्य निरपराधाः सञ्जाताः पापफलसाधनभूतस्य दुःस्वप्नस्य नष्टत्वात् ।

उषो यस्माद् दुष्वप्न्यादभैष्माप तदुच्छतु ॥२॥

पदपाठः

उषः । यस्मात् । दुःऽस्वप्न्यात् । अभैष्म । अप । तत् । उच्छतु ॥२॥

उषः ! उषाः कस्मादुच्छतीति सत्या रात्रेरपरः कालः' (निरु० २।८) हे रात्रेः अपरकाल ! 'रात्रिर्वा उषाः' इति तैत्तिरीयब्राह्मणम् (३।८।१६।४) । वयं **यस्माद् दुःस्वप्न्यात्** दुःस्वप्नजनितदुष्टफलात् **अभैष्म** भीताः स्म, **तत्** दुष्टफलम् **अप उच्छतु** दूरमपयातु ।

द्विषते तत् परावह शपते तत् परा वह ॥३॥

पदपाठः

द्विषते । तत् । परा । वह । शपते । तत् । परा । वह ॥३॥

हे उषः ! **तत्** दुष्टफलं त्वं **द्विषते** द्वेषकारिणे जनाय **परावह** अस्मत्तो दूरमपनय । तथा **तत्** दुष्फलं **शपते** शापं कुर्वते दुष्टाय **परावह** अस्मत्तो दूरं नय । अर्थात् दुःस्वप्नजनितं दुष्टं फलम् अस्मद्द्वेषी प्राप्नोतु इति ।

यं द्विष्मो यश्च नो द्वेष्टि तस्मा एनद् गमयामः ॥४॥

पदपाठः

यम् । द्विष्मः । यः । च । नः । द्वेष्टि । तस्मै । एनत् । गमयामः ॥४॥

वयं **यं** वैरिणं **द्विष्मः** । द्विष अप्रीतौ (अ०) धातोर्लटि रूपम् । तुतुत्सामः, हन्तुमिच्छामः इत्यर्थः । **यश्च नः** अस्मान् **द्वेष्टि** बाधते जिघांसतीत्यर्थः । **तस्मै** उभयविधवैरिणे **एनत्** दुःस्वप्नजनितं दुष्टफलं **गमयामः** प्रेषयामः ।

उषा देवी वाचा संविदाना वाग् देव्यु१षसा संविदाना ॥५॥

पदपाठः

उषाः । देवी । वाचा । सम्ऽविदाना । वाक् । देवी । उषसा । सम्ऽविदाना ॥५॥

उषाः देवी द्योतमाना प्रभातवेला **वाचा** अस्मत्स्तुतिरूपया वाण्या **संविदाना** परस्परमैकमत्यं प्राप्ता भवेदिति शेषः । **देवी वाक्** अस्मत्स्तुतिरूपा द्योतमाना वाणी

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अपि उषसा संविदाना सङ्गच्छमाना भवेत् । यतो द्वयोरैकमत्ये एवास्माकं श्रेयः इत्यर्थः ।

उषस्पतिर्वाचस्पतिना संविदानो वाचस्पतिरुषस्पतिना संविदानः ।।

पदपाठः

उषः । पतिः । वाचः । पतिना । सम्ऽविदानः । वाचः । पतिः । उषः । पतिना । सम्ऽविदानः ।।६।।

उषस्पतिः उषसां नाथः सूर्यः **वाचस्पतिना** वाचां स्वामिना वृहस्पतिना **संविदानः** सङ्गच्छमानः अस्मच्छ्रेयो विदध्यात् । वृहस्पतिश्च **उषस्पतिना** वाचस्पतिः सूर्येण सङ्गच्छमानोऽस्मच्छ्रेयो विदध्यात् इत्यर्थः ।

ते॒ऽमुष्मै परा वहन्त्वरायान् दुर्णाम्नः सदान्वाः ।।७।।

पदपाठः

ते । अमुष्मै । परा । वहन्तु । अरायान् । दुःऽनाम्नः । सदान्वाः ।।७।।

ते देवाः **अमुष्मै** जनाय, **दुर्नाम्नः** अपनामधारिणः, **अरायान्** अधनान् कृपणान् इत्यर्थः । अहविष्कान् वा । 'अरायाः अहविष्याः' इत्यन्यत्र सायणः (अथर्व० ८।६१।११) तथा **सदान्वाः** सदा शब्दायमानान्, 'सदान्वे सदा शब्दकारिणे' इति यास्कः (निरु० ६।६) । कोलाहलं कुर्वतः इत्यर्थः । **परावहन्तु** अस्मत्तो दूरं नयन्तु ।

कुम्भीका दूषीकाः पीयकान् ।।८।।

पदपाठः

कुम्भीकाः । दूषिकाः । पीयकान् ।।८।।

कुम्भीकाः कुम्भवद् आध्मानकारिण्यः उदररुजः, **दूषीकाः** देहदूषणकारिण्यो गलितकुष्ठादिरुजः, **पीयकान्**, पीयतिर्हिंसाकर्मेति निघण्टुः (४।२५), प्राणघातिनो रोगांश्च ....

जाग्रद्दुष्वप्न्यं स्वप्नेदुष्वप्न्यम् ।।९।।

पदपाठः

जाग्रत्ऽदुस्वप्न्यम् । स्वप्नेऽदुस्वप्न्यम् ।।९।।

जाग्रद्दुस्वप्न्यम् अर्धजाग्रदवस्थायाः दुःस्वप्नान् **स्वप्नेदुस्वप्न्यम्** स्वापावस्थायाः दुःस्वप्नान् ....

अनागमिष्यतो वरानवित्तेः संकल्पानमुच्या द्रुहः पाशान् ।।१०।।

पदपाठः

अनागमिष्यतः । वरान् । अवित्तेः । सम्ऽकल्पान् । अमुच्याः । द्रुहः । पाशान् ।।१०।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

अनागमिष्यतः वरान् अप्राप्तव्यान् प्राप्तुमयोग्यान् वरान् इत्यर्थः । **अवित्तेः** दरिद्रतायाः **सङ्कल्पान्** विचारान्, **अमुच्याः** अमोचनशीलायाः **द्रुहः** द्रोहचिन्तायाः **पाशान्** बन्धांश्च ......

तदमुष्मा अग्ने देवाः परा वहन्तु वध्रिर्यथासद् विथुरो न साधुः ॥११॥

पदपाठः

तत् । अमुष्मै । अग्ने । देवाः । परा । वहन्तु । वध्रिः । यथा । असत् । विथुरः । न । साधुः ॥११॥

तत् तदेतत् सर्वं दुष्टफलजातम् **अग्ने** हे अग्निभगवन् ! **देवाः** द्योतमानाः इन्द्रादयः सर्वे देवाः **अमुष्मै** अमुकनाम्ने तस्मै शत्रवे अमुकशत्रुं प्रति इत्यर्थः । **परा वहन्तु** दूरं नयन्तु । उपर्युक्तानि सर्वाणि अनिष्टफलानि अस्माकं शत्रुर्लभताम्—इति भावः । **यथा** येन प्रकारेण सोऽस्माकं शत्रुः **वध्रिः** नपुंसक इव निर्वीर्यः **विथुरः** व्यथितश्च सन् **साधुः न असत्** साधुस्वभावो न स्यात् । वध्रिः बन्ध धातोर्बाहुलकाद् औणादिकः क्रिन् ।

इति द्वितीयेऽनुवाके द्वितीयं पर्यायसूक्तम् ।

सप्तमं पर्यायसूक्तम्

त्रयोदशर्चस्यास्य पर्यायस्य यम ऋषिः । दुःस्वप्ननाशनं देवता । प्रथमर्चः पङ्क्तिः, द्वितीयायाः साम्न्यनुष्टुप्, तृतीयाया आसुर्युष्णिक्, चतुर्थ्याः प्राजापत्या गायत्री, पञ्चम्या आर्च्युष्णिक्, षष्ठी-नवम्येकादशीनां साम्नी बृहती, सप्तम्या याजुषी गायत्री अष्टम्याः प्राजापत्या बृहती, दशम्याः साम्नी गायत्री, द्वादश्या भुरिक्प्राजापत्यानुष्टुप्, त्रयोदश्याश्चासुरी त्रिष्टुप् छन्दांसि ।

तेनैनं विध्याम्यभूत्यैनं विध्यामि निर्भूत्यैनं
विध्यामि पराभूत्यैनं विध्यामि ग्राह्यैनं
विध्यामि तमसैनं विध्यामि ॥१॥

पदपाठः

तेन । एनम् । विध्यामि । अभूत्या । एनम् । विध्यामि । निःऽभूत्या । एनम् । विध्यामि । पराऽभूत्या । एनम् । विध्यामि । ग्राह्या । एनम् । विध्यामि । तमसा । एनम् । विध्यामि ॥१॥

तेन पाशेन अहम् **एनं** वैरिणं **विध्यामि** विदारयामि बध्नामीत्यर्थः । **अभूत्या** दुर्गत्या असमृद्ध्या **एनं** शत्रुं **विध्यामि** संयोजयामीत्यर्थः । **निर्भूत्या** दरिद्रतया **एनं विध्यामि, ग्राह्या** पिशाच्या प्राणान्तकारिण्या विपदेत्यर्थः, **एनं विध्यामि, तमसा** घोरान्धकारेण चापि **एनं** शत्रुं **विध्यामि** ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

देवानामेनं घोरैः क्रूरैः प्रैषैरभिप्रेष्यामि ॥२॥

पदपाठः

देवानाम् । एनम् । घोरैः । क्रूरैः । प्रऽएषैः । अभिऽप्रेष्यामि ॥२॥

अहं वैरिणमेनं **देवानां** द्योतमानानाम् इन्द्रादिदेवानां **घोरैः** भयङ्करैः **क्रूरैः** च अनिष्टकर्मकारिभिः **प्रैषैः** प्रेषणैः प्रेरणाभिरित्यर्थः। प्रपूर्वकात् इष गतौ (दि०) धातोर्घञ्। **अभिप्रेष्यामि** आभिमुख्येन प्रेरयामि।

वैश्वानरस्यैनं दंष्ट्रयोरपि दधामि ॥३॥

पदपाठः

वैश्वानरस्य । एनम् । दंष्ट्रयोः । अपि । दधामि ॥३॥

अहमेनं वैरिणं **वैश्वानरस्य** अग्नेः **दंष्ट्रयोः** दंष्ट्राद्वयमध्ये, अग्नेर्मुखे इत्यर्थः। **अपि दधामि**, अपिशब्दो निश्चयार्थोऽपि पठ्यते। निश्चयेन स्थापयामीत्यर्थः। यद्वा 'अपीति संसर्गम्' (निरु० १।१)। वैरिणं वैश्वानरमुखेऽपि पातयामि।

एवानेवाव सा गरत् ॥ ४ ॥

पदपाठः

एव । अनेव । अव । सा । गरत् ॥ ४ ॥

सा वैश्वानरदंष्ट्रा अस्मद्वैरिणम् **एव** एवंप्रकारेण **अनेव** अन्येन केनापि प्रकारेण वा **अवगरत्** निगरेत्, आत्मसात् कुर्यादित्यर्थः।

यो॒३ऽस्मान् द्वेष्टि तमात्मा द्वेष्टु यं वयं
द्विष्मः स आत्मानं द्वेष्टु ॥ ५ ॥

पदपाठः

यः । अस्मान् । द्वेष्टि । तम् । आत्मा । द्वेष्टु । यम् । वयम् । द्विष्मः । सः । आत्मानम् । द्वेष्टु ॥ ५ ॥

यो दुर्जनः **अस्मान् द्वेष्टि** बाधते जिघांसतीत्यर्थः, **तं** दुष्टम् **आत्मा** तदन्तःस्थितः परमेश्वर अन्तरात्मा **द्वेष्टु** बाधताम्, हन्तु इत्यर्थः। **यं** च **वयं** स्तोतारः **द्विष्मः** बाधामहे तोत्तुं वाञ्छामः इत्यर्थः, **स** अपि दुष्टः **आत्मानं** स्वान्तःस्थितं परमात्मानं **द्वेष्टु** बाधताम् आत्मद्वेषी स स्यादित्यर्थः।

निर्द्विषन्तं दिवो निः पृथिव्या निरन्तरिक्षाद् भजाम ॥ ६ ॥

पदपाठः

निः । द्विषन्तम् । दिवः । निः । पृथिव्याः । निः । अन्तरिक्षात् । भजाम ॥ ६ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

वयं **द्विषन्तं** द्वेषमाचरन्तं शत्रुं **दिवः** द्युलोकात् **निर्भजाम** विभक्तं करवाम। स द्युलोकात् पृथग् भवेदित्यर्थः। **पृथिव्याः** भूलोकादपि तं **निर्भजाम** पृथक् कुर्मः। **अन्तरिक्षात्** मध्यमलोकादपि च तं **निर्भजाम**। अर्थात् अस्माकं द्वेषी लोकत्रयेऽपि स्थानं न लभेतेति।

सुयामंश्चाक्षुष ॥ ७ ॥

पदपाठः

सुऽयामन् । चाक्षुष ॥ ७ ॥

सुयामन्। या गतौ (अ०) धातोः मनिन्। हे सुन्दरमार्गगामिन्! **चाक्षुष** हे सुनेत्र! दूरदर्शिन् ·········

इदमहमामुष्यायणे३मुष्याः पुत्रे दुष्वप्न्यं मृजे ॥ ८ ॥

पदपाठः

इदम् । अहम् । आमुष्यायणे । अमुष्याः । पुत्रे । दुःऽस्वप्न्यम् । मृजे ॥ ८ ॥

इदानीम् **अहम्** आमुष्यायणे अमुकव्यक्तेः मार्गभूते, वंशजे इत्यर्थः, **अमुष्याः** अमुकव्यक्तेश्च **पुत्रे** तनये इदं **दुःस्वप्न्यं** एतदात्मनो दुःस्वप्नजनितं दुष्टफलं **मृजे** प्रोञ्छामि शोधयामीत्यर्थः।

यददोअदो अभ्यगच्छं यद् दोषा यत् पूर्वां रात्रिम् ॥ ९ ॥

पदपाठः

यत् । अदःऽअदः । अभिऽअगच्छम् । यत् । दोषा । यत् । पूर्वाम् । रात्रिम् ।

यत् च **अदः अदः** यान् यान् दुष्टपरिणामान्, **अभ्यगच्छम्** अहम् अलभे, यैर्दुष्टफलैरहमभिभूत इत्यर्थः। **यत् यत्** यदा यदा च ये दोषा मां **पूर्वां** रात्रिं रात्रि-पूर्वभागे प्राप्नुवन्·········(अग्रिमेण सम्बन्धः)

यज्जाग्रद् यत् सुप्तो यद् दिवा यन्नक्तम् ॥ १० ॥

पदपाठः

यत् । जाग्रत् । यत् । सुप्तः । यत् । दिवा । यत् । नक्तम् ॥१०॥

यत् दुष्टं फलं **जाग्रद्** जाग्रदवस्थायां, **यत्** दुष्टं फलं **सुप्तः** स्वापस्थितौ, **यत् च दिवा** दिने **यत्** दुष्टं फलं च **नक्तं** रात्रौ·········(अग्रिमेण सम्बन्धः)।

यदहरहरभिगच्छामि तस्मादेनमव दये ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

यत् । अहःऽअहः । अभिऽगच्छामि । तस्मात् । एनम् । अव । दये ॥ ११ ॥

यत् च अनिष्टं फलम् **अहः अहः** प्रतिदिनमहम् **अभिगच्छामि** प्राप्नोमि **तस्मात्** एव **एनम्** अनिष्टपरिणामम् **अवदये** खण्डयामि, अनेन प्रयोगेण विनाशयामीत्यर्थः ।

तं जहि तेन मन्दस्व तस्य पृष्टीरपि शृणीहि ॥१२॥

पदपाठः

तम् । जहि । तेन । मन्दस्व । तस्य । पृष्टीः । अपि । शृणीहि ॥ १२ ॥

हे आदित्य ! **तम्** अस्मदनिष्टभूतं सर्वं दुष्टपरिणामं शत्रुसमूहं वा **जहि** नाशय । **तेन** तस्य नाशेन कर्मणा **मन्दस्व** त्वं मोदस्व, तं हत्वा प्रसन्नो भवेत्यर्थः । साम्प्रतं **तस्य** दुष्परिणामस्य शत्रोर्वा **पृष्टीः** पार्श्वास्थीनि अपि सर्वथैव **शृणीहि** विदारयेत्यर्थः ।

स मा जीवीत् तं प्राणो जहातु ॥ १३ ॥

पदपाठः

सः । मा । जीवीत् । तम् । प्राणः । जहातु ॥ १३ ॥

सः अस्माकम् अनिष्टकारी दुःस्वप्नपरिणामो वैरी वा **मा जीवीत्** । न जीवेत् । जीव प्राणधारणे (भ्वा०) धातोः छान्दसं रूपम् । **प्राणः** जीवनञ्च **तं** दुष्टं **जहातु** परित्यजतु । स म्रियतामित्यर्थः ।

इति द्वितीयेऽनुवाके तृतीयं पर्यायसूक्तम् ।

अष्टमं पर्यायसूक्तम्

त्रयस्त्रिंशदृचस्यास्य पर्यायस्य यम ऋषिः । दुःस्वप्ननाशनं देवता । **प्रथमर्चः** पञ्चम्यादिपञ्चविंशतेः प्रथमावसानर्चां त्रिंश्याश्चैकपदा यजुर्ब्राह्म्यनुष्टप्, द्वितीयायाः पञ्चम्यादिपञ्चविंशतेर्द्वितीयावसानर्चामेकत्रिंश्याश्च त्रिपदा निचृद् गायत्री, तृतीयायाः प्राजापत्या गायत्री, चतुर्थ्याः पञ्चम्यादिपञ्चविंशतेश्चतुर्थावसानर्चां त्रयस्त्रिंश्याश्च त्रिपदा प्राजापत्या त्रिष्टुप्, पञ्चम्यादितृचस्य द्वादशी-त्रिंशी-द्वाविंशी-सप्तविंशीनाञ्च तृतीयावसानर्चामासुरी जगती, अष्टमी-दशम्येकादशी-चतुर्दशी-षोडश्येकविंशीनां तृतीयावसानर्चामासुरी त्रिष्टुप्, नवमी-पञ्चदश्योः सप्तदश्यादितृचस्य त्रयोविंश्यादिचतसृणाञ्च तृतीयावसानर्चां द्वात्रिंश्याश्चासुरी पङ्क्तिः, अष्टाविंश्येकोनत्रिंश्योश्च तृतीयावसानर्चोरासुरी बृहती छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जितमस्माकमुद्‌भिन्नमस्माकमृतमस्माकं तेजोस्माकं ब्रह्मास्माकं स्व१ऽरस्माकं यज्ञो३ऽस्माकं पशवोस्माकं प्रजा अस्माकं वीरा अस्माकम् ॥१॥

पदपाठः

जितम् । अस्माकम् । उत्ऽभिन्नम् । अस्माकम् । ऋतम् । अस्माकम् । तेजः । अस्माकम् । ब्रह्म । अस्माकम् । स्वऽरिति स्वः । अस्माकम् । यज्ञः । अस्माकम् । पशवः । अस्माकम् । प्रऽजाः । अस्माकम् । वीराः । अस्माकम् ॥ १ ॥

हे आदित्य ! दुःस्वप्नादिजनितदुष्टफलप्रभावाद् **अस्माकं** किमप्यनिष्टं फलं न भवेत् । साम्प्रतं त्वदनुग्रहेण **जितं** विजितं सर्वं वस्तुजातम् **अस्माकं** स्तोतॄणामेव भवतु । **उद्‌भिन्नम्** अङ्कुरितं नवोत्पन्नमपि वस्तु **अस्माकं** भवतु । **ऋतम्** 'सत्यं वा ऋतम्' (तै० सं० ६।३।६।३) इति श्रुतेः सत्यम् **अस्माकं** स्यात् । **तेजः** 'तेज एव श्रद्धा' (श० ब्रा० ११।३।१।१) श्रद्धा प्रकाशो वा **अस्माकं** भवतु । **ब्रह्म अस्माकं** ज्ञानं बलं वा भवतु । यथा च श्रुतिः 'विज्ञानं ब्रह्मेति व्यजानात्' (तै० आ० ६।५।१) तथा 'बलं वै ब्रह्म' (तै० ब्रा० ३।८।५।२) इति । **स्वः** धनमैश्वर्यादिकमपि **अस्माकं** स्तोतॄणां भवतु । **यज्ञः** यजनम् **अस्माकं** भवेत् । **पशवः** पशुधनम् **अस्माकं** भवतु । **प्रजाः** 'प्रजा वै भूतानि' (श० ब्रा० २।४।२।१) समस्तानि भूतान्यपि, यद्वा 'प्रजा वै मतयः' (तै० आ० ५।६।८) बुद्धयः **अस्माकं** सन्तु तथा **वीराः** 'पुत्रो वै वीरः' (श० ब्रा० ३।३।१।१२) इति श्रुतेः पुत्राः **अस्माकं** भवन्तु इति । किन्तु ······ (अग्रिमेण सम्बन्धः)

तस्मादमुं निर्भजामोमुमामुष्यायणममुष्याः पुत्रमसौ यः ॥ २ ॥

पदपाठः

तस्मात् । अमुम् । निः । भजामः । अमुम् । आमुष्यायणम् । अमुष्याः । पुत्रम् । असौ । यः ॥ २ ॥

तस्मात् पूर्वोक्तशुभफलप्राप्तिलाभात् वयम् **आमुष्यायणम्** अमुकव्यक्तेः मार्गभूतं वंशजमित्यर्थः । **अमुष्याः पुत्रम्** अमुकव्यक्तेश्च तनयम् **अमुम्** अस्माकं शत्रुं **निर्भजामः** पृथक् कुर्मः । असौ पूर्वोक्तानि शुभफलानि नैव लभताम्, **यः असौ** योऽयं अस्माकं शत्रुर्वर्त्तते ।

स ग्राह्याः पाशान्मा मोचि ॥ ३ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

सः । ग्राह्याः । पाशात् । मा । मोचि ।। ३ ।।

सः अस्माकं शत्रुः **ग्राह्याः** पिशाच्याः प्राणान्तकारिण्या विपद इत्यर्थः । **पाशात्** जालबन्धनात् **मा मोचि** विमुक्तो न भवेत् ।

तस्येदं वर्चस्तेजः प्राणमायुर्नि
वेष्टयामीदमेनमधराञ्चं पादयामि ।। ४ ।।

पदपाठः

तस्य । इदम् वर्चः । तेजः । प्राणम् । आयुः । नि । वेष्टयामि । इदम् । एनम् । अधराञ्चम् । पादयामि ।।४।।

तस्य शत्रोः **इदं वर्चः** एतदोजः, **तेजः** बलं तेजस्वित्वं वा । यद्वा 'तेजो वै हिरण्यम्' (तै० सं० ५।१।१०।५) इति श्रुतेः हिरण्यं धनम्, **प्राणम्** 'एको ह्येवैष पुत्रो यत्प्राणः' (जै० उ०, २।२।३।२) इति वचनात् पुत्रम् । यद्वा बलम् । **आयुः** जीवनं च **निवेष्टयामि** नितान्तमाच्छ दयामि, सर्वमिदं स्वाधिकारे एव करोमीत्यर्थः । शत्रोः **इदम्** उपर्युक्तं निखिलं वस्तुजातम् **एनम्** तथा वस्तुभिः सहितं शत्रुमपि च **अधराञ्चम्** अधःप्रदेशमञ्चतीति तादृशं **पादयामि** पादैः प्रहरामि ।

जितम्० । तस्मादमुं० । स निर्ऋत्याः
पाशान्मा मोचि । तस्येदं० ।। ५ ।।

पदपाठः

० । ० ।। सः । निःऽऋत्याः । पाशात् । ० ।। ५ ।।

………**सः** अस्माकं शत्रुः **निर्ऋत्याः** कार्यविघातिकायाः निर्ऋतिदेव्याः, भवति चात्र श्रुतिः "निर्ऋतिर्वै कर्मण उपद्रष्टिका" (मै० ३।२।४) इति । यद्वा "पाप्मा वै निर्ऋतिः" (श० ब्रा० ७।२।१।१) पापरूपिण्याः **पाशात्** जालबन्धनात् **मा मोचि** विमुक्तो न भवेत् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । सोभूत्याः
पाशान्मा मोचि । तस्येदं० ।। ६ ।।

पदपाठः

० । ० । सः । अभूत्याः । पाशात् । ० ।। ६ ।।

………**सः** शत्रुः **अभूत्याः** दुर्गतेः असमृद्धेर्वा **पाशात्** बन्धनात् **मा मोचि** विमुक्तो न भवेत् । शेषं पूर्ववत् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जितम्० । तस्मादमुं० । स निर्भूत्याः
पाशान्मा मोचि । तस्येदं० ॥ ७ ॥

पदपाठः

० । ० । सः । निःऽभूत्याः । पाशात् । ० ॥ ७ ॥

.... सः अमाकं शत्रुः निर्भूत्याः दरिद्रतायाः **पाशात्** बन्धनात् **मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स पराभूत्याः
पाशान्मा मोचि । तस्येदं० ॥ ८ ॥

पदपाठः

० । ० । सः । पराऽभूत्याः । पाशात् । ० ॥ ८ ॥

....**सः** अस्मद्वैरी पराभूत्याः पराजयस्य **पाशाद्** बन्धनात् **मा मोचि** न मुक्तः स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स देवजामीनां
पाशान्मा मोचि । तस्येदं० ॥ ९ ॥

पदपाठः

० । ० । सः । देवऽजामीनाम् । पाशात् । ० ॥ ९ ॥

.... **सः** अस्माकं द्वेष्टा **देवजामीनां** देवानामपि भक्षिकाणाम्, देवानामपि नाशकारिणीनामित्यर्थः । देवोपपदात् जमु अदने (भ्वा०) धातोः औणादिको बाहुलकात् इञ् प्रत्ययः । **पाशात्** बन्धनात् **मा मोचि** मुक्तो न स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स बृहस्पतेः
पाशान्मा मोचि । तस्येदं० ॥ १० ॥

पदपाठः

० । ० । सः । बृहस्पतेः । पाशात् । ० ॥ १० ॥

.... **सः** शत्रुः **बृहस्पतेः** बृहतां पालकस्य देवस्यापि **पाशात् मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स प्रजापतेः
पाशान्मा मोचि । तस्येदं० ॥ ११ ॥

पदपाठः

० । ० । सः । प्रजाऽपतेः । पाशात् । ० ॥ ११ ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

..........सः द्वेष्टा **प्रजापतेः** प्रजानां पालकस्य देवस्य **पाशात् मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम् । तस्मादमुं० । स ऋषीणां
पाशान्मा मोचि । तस्येदं० ॥ १२ ॥

पदपाठः

० । ० । सः । ऋषीणाम् । पाशात् । ० ॥ १२ ॥

..........**सः** शत्रुः **ऋषीणां** 'प्राणा वा ऋषयः' (श० ब्रा० ७।२।३।५) प्राणानां **पाशात्** बन्धनात् **मा मोचि** न मुक्तो भवेत् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स आर्षेयाणां
पाशान्मा मोचि । तस्येदं० ॥ १३ ॥

पदपाठः

० । ० । सः । आर्षेयाणाम् । पाशात् । ० ॥ १३ ॥

..........**सः** शत्रुः **आर्षेयाणाम्** ऋषिसम्बन्धिनां प्राणानां **पाशात्** जाल-बन्धनात् **मा मोचि** न विमुक्तः स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । सोऽङ्गिरसां
पाशान्मा मोचि । तस्येदं० ॥ १४ ॥

पदपाठः

०।० सः । अङ्गिरसाम् । पाशात् । ०॥१४॥

..........**सः** शत्रुः **अङ्गिरसाम्** एतेषां महर्षीणां **पाशात्** बन्धनात् **मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स आङ्गिरसानां
पाशान्मा मोचि । तस्येदं० ॥१५॥

पदपाठः

०।०। सः । आङ्गिरसानाम् । पाशात् ।० ॥१५॥

..........**सः** शत्रुः **आङ्गिरसानाम्** अङ्गरसानाम् । भवति चात्रोपनिषदेषा— 'स एष एवाङ्गिरसः (अन्नाद्यम्) अतो हीमान्यङ्गानि रसं लभन्ते, तस्मादाङ्गिरसः । यद्वे-वैषामङ्गानां रसस्तस्मादेवाऽऽङ्गरसः' (जै०उ० २।४।२।६) इति । **पाशाद्** बन्धात्, **मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । सोथर्वणां पाशान्मा मोचि । तस्येदं०॥१६

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

०।०। सः । अथर्वणाम् । पाशात् ।० ॥१६॥

......सः अस्मद्द्वेषी **अथर्वणाम्** एतेषां महर्षीणां **पाशात् मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स आथर्वणानां
पाशान्मा मोचि । तस्येदं० ॥१७॥

पदपाठः

०।० । सः । आथर्वणानाम् । पाशात् ।० ॥१७॥

.... **सः** द्वेष्टा **आथर्वणानाम्** अथर्ववंशजानां **पाशान्मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स वनस्पतीनां
पाशान्मा मोचि । तस्येदं० ॥१८॥

पदपाठः

०।०। सः । वनस्पतीनाम् । पाशात् ।० ॥१८॥

...... **सः** शत्रुः **वनस्पतीनाम्** 'ओषधयो वै वनस्पतयः' (काठ० २६।३) ओषधीनां **पाशात्** जालबन्धनात् **मा मोचि** मुक्तो न भवेत् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स वानस्पत्यानां
पाशान्मा मोचि । तस्येदं० ॥१९॥

पदपाठः

०।०। सः । वानस्पत्यानाम् । पाशात्० ।० ॥१९॥

...... **सः** शत्रुः **वानस्पत्यानाम्** ओषधिसमुद्भवानां पदार्थानाम् उपद्रवाणां वा **पाशात् मा मोचि** न मुक्तो भवेत् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स ऋतूनां पाशान्मा
मोचि । तस्येदं० ॥२०॥

पदपाठ;

०।० । सः । ऋतूनाम् । पाशात् ।० ॥२०॥

...... **सः** द्वेषी जनः षण्णाम् **ऋतूनां पाशान्मा मोचि** न मुच्यात् । शेषं समानम् ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जितम्० । तस्मादमुं० । स आर्तवानां पाशान्मा मोचि । तस्येदं० ॥२१॥

पदपाठः

०।० । सः । आर्तवानाम् । पाशात् । ० ॥२१॥

...... **सः** दुष्टः **आर्तवानाम्** ऋतूद्भवानां पदार्थानाम् उत्पातानां वा **पाशात्** बन्धनात् **मा मोचि**, न मुक्तः स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स मासानां पशान्मा मोचि । तस्येदं० ॥२२॥

पदपाठः

०।० । सः । मासानाम् । पाशात् । ० ॥२२॥

.... **सः** दुष्टो जनः **मासानां** द्वादशमासानां त्रयोदशमासानां वा **पाशान्मा मोचि**, न मुक्तो भवतु । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । सोऽर्धमासानां पाशान्मा मोचि । तस्येदं० ॥२३॥

पदपाठः

०।० । सः । अर्धऽमासानाम् । पाशात् । ० ॥२३॥

........**सः** सपत्नः **अर्धमासानां** पक्षाणामित्यर्थः । **पाशात्** बन्धात् **मा मोचि** मुक्तो न स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । सोऽहोरात्रयोः पाशान्मा मोचि । तस्येदं० ॥२४॥

पदपाठः

०।० । सः । अहोरात्रयोः । पाशात् ।० ॥२४॥

सः अस्माकं द्वेषी **अहोरात्रयोः** अह्नां रात्रीणां च **पाशात्** जालचक्रतः **मा मोचि** मुक्तो न भवतु । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० सोऽह्नोः संयतोः पाशान्मा मोचि । तस्येदं० ॥२५॥

पदपाठः

० । ० । सः । अह्नोः । सम्ऽयतोः । पाशात् ० । ॥२५॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सः अस्मद्वैरी संयतोः संयुक्तयोः **अह्नोः** दिवसयोः, दिवसारम्भावसानयोः, उभयोः सन्ध्ययोरित्यर्थः । **पाशान्मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स द्यावापृथिव्योः
पाशान्मा मोचि । तस्येदं० ॥२६॥

पदपाठः

० । ० । सः । द्यावापृथिव्योः । पाशात् । ० ॥२६॥

सः द्वेषी **द्यावापृथिव्योः** द्युलोक-पृथ्वीलोकयोः **पाशात्** बन्धात् **मा मोचि** न मुक्तः स्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स इन्द्राग्न्योः
पाशान्मा मोचि । तस्येदं० ॥२७॥

पदपाठः

० । ० । सः । इन्द्राग्न्योः । पाशात् । ० ॥२७॥

सः अस्मद्विद्वेषी **इन्द्राग्न्योः** अनयोः युग्मदेवतयोः **पाशात् मा मोचि** न मुक्तो भवेत् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स मित्रावरुणयोः
पाशान्मा मोचि । तस्येदं० ॥२८॥

पदपाठः

० । ० । सः । मित्रावरुणयोः । पाशात् । ० ॥२८॥

सः शत्रुः **मित्रावरुणयोः** संवत्सरस्वामिनोः मित्रस्य वरुणस्य च । भवति चात्र श्रुतिः "एतौ मित्रावरुणौ वर्षस्येशाते" (काठ० ११।१०) इति । **पाशात् मा मोचि** न मुच्यात् । शेषं पूर्ववत् ।

जितम्० । तस्मादमुं० । स राज्ञो वरुणस्य
पाशान्मा मोचि । तस्येदं० ॥२९॥

पदपाठः

० । ० । सः । राज्ञः । वरुणस्य । पाशात् । ० ॥२९॥

सः शत्रुः **राज्ञो वरुणस्य** 'वरुणः सम्राट् सम्राट्पतिः' (तै० ब्रा० २।५।७।३) इति श्रुतेः सम्राजो वरुणस्य **पाशात्** बन्धात् **मा मोचि** न मुक्तः स्यात् । शेषं पूर्ववत् ।

जितमस्माकमुद्भिन्नमस्माकमृतमस्माकं तेजोस्माकं
ब्रह्मास्माकं स्व॒ऽरस्माकं यज्ञो॒३॒ स्माकं पशवोस्माकं
प्रजा अस्माकं वीरा अस्माकम् ॥ ३० ॥

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

पदपाठः

जितम् । अस्माकम् । उत्ऽभिन्नम् । अस्माकम् । ऋतम् । अस्माकम् । तेजः । अस्माकम् । ब्रह्म । अस्माकम् । स्वऽः । अस्माकम् । यज्ञः । अस्माकम् । पशवः । अस्माकम् । प्रऽजाः । अस्माकम् । वीराः । अस्माकम् ॥ ३० ॥

पूर्वं व्याख्यातः ।

तस्मादमुं निर्भजामोमुमामुष्यायणममुष्याः
पुत्रमसौ यः ॥ ३१ ॥

पदपाठः

तस्मात् । अमुम् । निः । भजामः । अमुम् । आमुष्यायणम् । अमुष्याः । पुत्रम् । असौ । यः ॥ ३१ ॥

पूर्वं व्याख्यातः ।

स मृत्योः पड्वीशात् पाशान्मा मोचि ॥ ३२ ॥

पदपाठः

सः । मृत्योः । पड्वीशात् । पाशात् । मा । मोचि ॥ ३२ ॥

सः अस्मद्द्वेषी पुरुषः **मृत्योः** मरणस्य **पड्वीशात्** पादबन्धनसाधनभूतात् **पाशात्** जालपाशात् **मा मोचि** मुक्तो न भवतु । पड्वीशात्, पादोपपदात् विश प्रवेशने (तु०) धातोः मूलविभुजादित्वात् कः, पादस्य पदादेशः, धातोरिकारस्य च दीर्घश्छान्दसः ।

तस्येदं वर्चस्तेजः प्राणमायुर्नि वेष्टयामी–
दमेनमधराञ्चं पादयामि ॥ ३३ ॥

पदपाठः

तस्य । इदम् । वर्चः । तेजः । प्राणम् । आयुः । नि । वेष्टयामि । इदम् । एनम् । अधराञ्चम् । पादयामि ॥ ३३ ॥

पूर्वं व्याख्यातः ।

इति द्वितीयेऽनुवाके चतुर्थं पर्यायसूक्तम् ।

नवमं पर्यायसूक्तम्

चतुर्ऋचस्यास्य पर्यायस्य यम ऋषिः । प्रथमर्चः प्रजापतिः, द्वितीयायाः मन्त्रोक्ताः, तृतीयाचतुर्थ्योश्च सूर्यो देवताः । प्रथमाया आर्च्यनुष्टुप्, द्वितीयाया आर्च्युष्णिक्, तृतीयायाः साम्नी पङ्क्तिः, चतुर्थ्याश्च परोष्णिक् छन्दांसि ।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

जितमस्माकमुद्भिन्नमस्माकमभ्य॑ष्ठां
विश्वाः पृतना अरातीः ।। १ ।।

पदपाठः

जितम् । अस्माकम् । उद्ऽभिन्नम् । अस्माकम् । अभि । अस्थाम् । विश्वाः । पृतनाः । अरातीः ।। १ ।।

हे आदित्य ! **जितं** विजितं सर्वम् **अस्माकं** स्तोतॄणाम् भवेत् । **उद्भिन्नम्** अङ्कुरितं धान्यादिकम् **अस्माकं** स्यात् । साम्प्रतमहं **विश्वाः** सर्वाः **अरातीः पृतनाः** शत्रुसेनाः । यद्वा **विश्वाः पृतनाः** समस्ताः शत्रुसेनाः, **अराती** अदानशीलाश्च व्यक्तीः **अभि अस्थाम्** अभिभूतवानस्मि । आक्रान्तवानस्मीत्यर्थः । "अरातयोऽदानकर्माणः" इति निरुक्तम् (३।२) तथा अरातीः "अमित्रान् अदानान् इति वा" (निरु० ११।१) इति च । पृतना, पृङ् व्यायामे (तु०) धातोः बाहुलकात्तनन्, गुणाभावश्च ।

तदग्निराह तदु सोम आह पूषा
मा धात् सुकृतस्य लोके ।। २ ।।

पदपाठः

तत् । अग्निः । आह । तत् । ऊं इति । सोमः । आह । पूषा । मा । धात् । सुऽकृतस्य । लोके ।। २ ।।

तत् एतदेव **अग्निः** पृथ्वीस्थानीयोऽयम् अग्निदेवः **आह** वदतु मत्समर्थनं करोत्वित्यर्थः । **तद् उ** तदेव च **सोमः** सोमो राजा आह कथयतु । **पूषा** "असौ वै पूषा योऽसौ तपति" (गो० ब्रा० २।१।२०) इति श्रुतेः सूर्यो देवः **मा** मां स्तोतारं **सुकृतस्य लोके** पुण्यवतां स्वर्गे लोके **धात्** स्थापयतु । आदित्यानुग्रहेणाहं स्वर्गं लभेय, मत्प्रार्थनासमर्थनञ्च अग्निः सोमश्च कुरुतामित्यर्थः । पूषा, पुष्णाति पूषति वा । पुष पुष्टौ (क्र्या०) धातोः, यद्वा पूष वृद्धौ० (भ्वा०) धातोः " श्वन्नुक्षन्० " (उ० १।१५९) सूत्रेण निपातितः ।

अगन्म स्व१ः स्व॑रगन्म सं सूर्यस्य
ज्योतिषागन्म ।। ३ ।।

पदपाठः

अगन्म । स्व१रिति । स्वः । अगन्म । सम् । सूर्यस्य । ज्योतिषा । अगन्म ।। ३ ।।

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

सम्प्रति वयं स्तोतारः **सूर्यस्य** सरणशीलस्य आदित्यस्य **ज्योतिषा** आलोकेन **समगन्म** संमिलिता अभूम । यद्वा । "छन्दसि लुङ्लङ्लिटः" (पा० सू० ३।४।६) इति लिङर्थे लुङ् । सूर्यज्योतिषा सङ्गता भवेम । अत एव **स्वः** "देवा वै स्वः" (श० ब्रा० १।९।३।१४) देवान् **अगन्म** अगच्छाम यद्वा गच्छेम प्राप्नुयाम इत्यर्थः । तथा **स्वः** "स्वर्गो लोको स्वः" (जै० ब्रा० ३।६९) इति श्रुतेः स्वर्गं लोकम् **अगन्म** अगमाम, गच्छेम, लभेमहीत्यर्थः ।

वस्योभूयाय वसुमान् यज्ञो वसु वंसिषीय
वसुमान् भूयासं वसु मयि धेहि ॥ ४ ॥

पदपाठः

वस्यःऽभूयाय । वसुऽमान् । यज्ञः । वसु । वंसिषीय । वसुऽमान् । भूयासम् । वसु । मयि । धेहि ॥ ४ ॥

वस्योभूयाय वसुमत्तरत्वलक्षणश्रेयोलब्धये **यज्ञः** अस्माकं यजनं **वसुमान्** "प्राणा वै वसवः" (तै० ब्रा० ३।२।३।३) इति श्रुतेः **स**प्राणः सशक्तः इत्यर्थः, भवेदिति शेषः । यद्वा वसुशब्दस्य धननामसु (निघं० २।१०) पाठात् धनसमृद्धो भवेत् । अहञ्च वसु धनं प्राणसामर्थ्यं वा **वंसिषीय** याचे । वनु याचने (त०) धातोः आशीर्लिङि रूपम् । येनाहं **वसुमान्** धनवान् प्राणसामर्थ्यवान् वा **भूयासम्** भवानि । हे आदित्य ! **मे** मह्यं **वसु** धनं प्राणशक्ति वा **धेहि** देहि, मयि धनं स्थापय वा । वसु, वस निवासे (भ्वा०) धातोः "शॄ-स्वृ-स्निहि-त्रप्यसि-वसि-हनि-क्लिदि-बन्धि-मनिभ्यश्च" (उ० १।१०) इति उः । "विश्वस्य वसुराटोः" (पा० स० ६।३।१२८) इति दीर्घो न असंज्ञत्वात् । यज्ञः । इज्यते अनेन, अत्र वा । "यज देवपूजासङ्गतिकरणदानेषु (भ्वा०) धातोः "यज-याच-यतविच्छप्रच्छरक्षो नङ्" (पा० सू० ३।३।९०) इति नङ् ।

इति द्वितीयेऽनुवाके पञ्चमं प्रारम्भतश्च नवमं पर्यायसूक्तम् ।

इति द्वितीयोऽनुवाकः ।

इति षोडशं काण्डं समाप्तम्

Bhawan's Sri Sankaracharya Sanskrit Mahavidyalaya
1039

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Mahavidyalaya

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh.

Funding by IKS-MoE